श्रीविष्णोर्नामसहस्राणिविशिष्टाद्वैत सम्मतार्थस्यानुशीलनम्

सम्पूर्णानन्द-संस्कृत-वि[illegible]विद्यालयस्य विद्यावारिधिः (पी-एच० डी०)
[illegible]ये प्रस्तुत[illegible] शोधप्रबन्धः

निर्देशकः
[illegible] गोस्वामी
पी-एच० डी०
[illegible] एवं अध्यक्षः
दर्शन विभाग
[illegible]संस्कृत-विश्वविद्यालय, वाराणसी

अनुसन्धाता-
[illegible] मोहन [illegible]
वे[illegible]चार्य, नव्यन्याय,
मीमांसा, शास्त्री

[illegible]-संस्कृत-विश्वविद्यालय, वाराणसी
[illegible]

श्रीविष्णोर्नामसहस्राणिविशिष्टाद्वैत सम्मतार्थस्यानुशीलनम्

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य विद्यावारिधिः (पी-एच० डी०)

इत्युपाधये प्रस्तुतः शोधप्रबन्धः

निर्देशकः

डॉ० महाप्रभुलाल गोस्वामी

पी-एच० डी०

आचार्य एवं अध्यक्षः

दर्शन विभाग

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी

अनुसन्धाता-

केशव मोहन पाण्डेय

वेदान्ताचार्य, नव्यन्याय,

मीमांसा, शास्त्री

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी

मई, १९८६ ई०

श्री केशवमोहन पाण्डेय:, श्रीविष्णोर्नाम सहस्राणि विशिष्टाद्वैत सम्मतार्थस्यानुशीलनम्' इति विषयमधिकृत्यमन्निर्देशने विद्यावारिधिरित्युपाधये शोधप्रबन्धं प्रणीतवान् । सुशील: सुचरित्र: दर्शनज्ञान सम्पन्न: सर्वथोपयुक्तो यमनुसन्धानायेति शोधप्रबन्ध समुपस्थापनाय संस्तौति -

महाप्रभुलाल गोस्वामी
(महाप्रभुलाल गोस्वामी) 1/4/1-८६

मंगलाचरण

त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधाने ।
वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या ॥
युधि तुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलङ्कृतास्ये ।
मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा ॥१॥

तस्मै रामानुजार्याय नमः परमयोगिने
यः श्रुतिस्मृतिसूत्राणामन्तर्ज्वरमशीशमत् ॥२॥

वन्दे गोविन्दतातौ मुनिमथ,मनवै लक्ष्मणार्यं महान्तं
ध्यायेयं यामुनार्यं मम हृदि तनवै राममेवाभियायाम् ।
पद्माक्षं प्रेक्षिषीय प्रथममपि मुनिं नाथमीडे शठारिं
स्तौमि प्रेक्षीय लक्ष्मीं शरणमशरणः श्रीधरं संश्रयेयम् ॥३॥

नमो नारायणायेदं कृष्णद्वैपायनात्मने ।
यदामुष्यायणा वेदा महाभारतपञ्चमाः ॥४॥

जातो लक्ष्मणमिश्रसंश्रयधनाच्छ्रीवत्सचिह्नाद्गुणैः
भूयो भट्टपराशरेति भणितः श्रीरङ्गभर्त्रा स्वयम् ।
श्री श्रीरङ्गपतिप्रसादतृणया श्रीरङ्गनाथाह्वयः
श्री रङ्गेश्वरकारितो विवृणुते नाम्नां सहस्रं हरेः ॥५॥

संसारे यमपण्डिते भगवति प्रागेवभूय: कलौ ।
पूर्णमन्यतमे जने श्रुतिशिरोगुह्यं ब्रुवे साहसात् ।।
तत्रस्तोत्रमिदंप्रकाशयति यस्स्तुत्यश्च यस्तावुभौ ।
व्यास: कारुणिकौ हरिश्च तदिदं मौर्ख्यं सहेतां मम् ।।६।।

कूर्मादीन् दिव्यलोकं तदनुमणिमयं मंडपं तत्र शेषं ।
तस्मिन्धर्मादिपीठं तदुपरिकमलं चामरग्राहिणीश्च ।।
विष्णुं देवीविभूषायुधगणमुरगं पादुके वैनतेयं ।
सेनेशं द्वारपालान् कुमुदमुखगणान्विष्णुभक्तान् प्रपद्ये ।।७।।

रमादिसंलालितपादपद्मं रमानिवासं रमणीयकीर्तिम् ।
अहेतुसंपालितभक्तजालं मृदुं दयालुं शरणं प्रपद्ये ।।८।।

भू: पादौ यस्य नाभिर्वियदसुरनिलश्चन्द्रसूर्यौ च नेत्रे ।
कर्णावाशा: शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धि: ।।
अन्तस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यै: ।
चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि ।।९।।

केनोपायेन लघुना विष्णोर्नामसहस्रकम् ।
पठ्यते पण्डितैर्नित्यं श्रोतुमिच्छाम्यहं प्रभो।।१०।।

नमो स्त्वनन्ताय सहस्रमूर्तये, सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नम:।।११।।

अर्थे हरौ तदभिधायिनि नामवर्गे,

तद्वचन्कै मयि च वन्धविशीर्णमेत्य ।

सेव्यमेतदमु तं प्रणिपत्य याचे ।

मध्यस्थतारिजना इह मा च भूवन् ।।१२।।

श्रीकाश्यपन्वयपयोनिधि पूर्णसोमम् ।

वाना द्विवौगिपदपंकज भृङ्गराजम् ।

श्री वालदेशिकमहं शरणं प्रपद्ये ।

श्रीशालग्रामगुरुवर्य महं नमामि ।।१३ ।।

00000000000
00000000
000000
000

विषयानुक्रमणिका

पृष्ठ संख्या

विजयः, पुनर्वसुः, उपेन्द्रः, वामनः, शुचिः, ऊर्जिः, पूतात्मा, नियमः, यमः, वैद्यः वीरहा, माधवः, मधुः, महाबलः, महाशक्तिः, महाद्युतिः, श्रीमान्, अमेयात्मा, सतांगतिः, सुरानन्दः, गोविन्दः, गोविन्दांपतिः, दमनः, हंसः, सुपर्णः, पद्मनाभः, अमृत्युः।

तृतीयो ध्यायः

तृतीयशतकम्

वक्ष्यमाणानां शब्दानामध्ययनम् -

सर्वकृत्, सिंहः, संधाता, स्थिरः, अजः, शास्ता, विश्रुतात्मा, धामः, सत्यः, निमिषः, अनिमिषः, वाचस्पतिः, ग्रामणी, न्यायः, नेता, आवर्तनः, संवृतः, वह्निः, अनिलः, धरणीधरः, सुप्रसादः, प्रसन्नात्मा, सत्कर्ता, सत्कृतः साधुः, जह्नुः नारायणः, नरः, सिद्धार्थः, सिद्धिसाधनः, वृषभः, विष्णुः वृषोदरः, विविक्तः, श्रुतिसागरः, दुर्धरः, वाग्ग्मी, महेन्द्रः, वसुदः, वसुः, प्रकाशनः, प्रतापनः, मन्त्रः, भास्करद्युतिः, भानुः, सुरेश्वरः, पवनः, पावनः, कामहा, कामकृत्, कान्तः, कामप्रदः, प्रभुः।

चतुर्थो ध्यायः

चतुर्थशतकम्

वक्ष्यमाणानां शब्दानामध्ययनम् -

युगादिकृत्, नैकमायः, महाशनः, अनन्तजित्, इष्टः, शिखण्डी, वृषः, महीधरः, प्रथितः, प्राणः, अपांनिधिः, अप्रमत्तः, स्कन्दः, वरदः, बृहद्भानुः आदिदेवः, तारणः, तारः, शौरिः, पद्मी, अरविन्दाक्षः, ऋद्धः, महाक्षः, शरभः, लक्ष्मीवान्, विदारः, रोहितः, हेतुः, वेगवान्, उद्भवः, श्रीगर्भः, परमेश्वरः, गहनः, गुहः, संस्थानः, तुष्टः, रामः, विरतः, नेयः, नयः।

पञ्चमो ध्याय:

पञ्चमशतकम्

वक्ष्यमाणानां शब्दानामध्ययनम् -

अनय:, वीर:, धर्मी:, वैकुण्ठ:, पुरुष:, पृथु, व्याप्त:, वायु:, ऋतु:, काल:, परिग्रह:, उग्र:, दक्ष:, विश्राम:, अर्थ:, अनर्थ:, महाभोग:, स्थविष्ठ:, भू:, महामख:, नक्षत्री, क्षाम:, यज्ञ:, महेज्य:, सतांगति सर्वज्ञ:, सुमुख: सुखद:, सुहृत् वीरबाहु, स्थापन:, व्यापी, वत्सल:, रत्नगर्भ:, धर्मी, सत्, अविज्ञाता, विधाता, कृतलक्षण:, सत्त्वस्थ:, महादेव:, देवेश:, देवभृत्, गुरु:, गोपति:, गोप्ता, ज्ञानगम्य, पुरातन:,

षष्ठो ध्याय:

षष्ठशतकम्

वक्ष्यमाणानां शब्दानामध्ययनम्

शरीरभूतभृत्, भोक्ता, कपीन्द्र:, सोमप:, अमृतप:, पुरुषोत्तम:, विनय:, सात्त्वतांपति, जीव:, मुकुन्द:, अनन्तात्मा, अज: महार्ह:, जितामित्र, नन्दन:, नन्द:, महर्षि:, कृतज्ञ:, त्रिपद:, गुह्य:, गहन:, चक्रगदाधर:, अजित: दृढ:, वार्ष्ण:, महामना:, नन्दी, सहिष्णु: गतिसत्तम:, दारुण:, द्रविणप्रद:, व्यास:, त्रिसामा, सामग:, भेषजम्, शम:, शान्त:, शुभाङ्ग:, कुमुद:, गोहित:, गोप्ता ।

सप्तमो ध्याय:

सप्तमशतकम्-

वक्ष्यमाणानां शब्दानामध्ययनम्-

गुणभाग:, गुणप्रिय:, निवृत्तात्मा, श्रीवास:, श्रीमतां वर:, श्रीद:, श्रीनिधि:, श्रीधर:, स्वक्ष:, शतानन्द:, सत्कीर्ति, भूशय:, भूषण:, भूति, अशोक:, अर्चित:, कुम्भ:, विशोधन:, अनिरुद्ध:, शौरि, शूर:, केशव:, हरि:, कामदेव:, कामी, विष्णु:, कि वीर:, अनन्त:, ब्रह्मण्य:, ब्रह्म, ब्रह्मी, ब्रह्मज्ञ:, ब्राह्मणप्रिय:, महाकर्मा, महोरग:, महाकवि: स्तवप्रिय:, स्तोत्रम्, स्तुत: रणप्रिय:, पूरयिता, पुण्यकीर्ति:, नोष्किर:, वसुरेता, वसुप्रद: वासुदेव: ॥

अष्टमो ध्याय:

अष्टमशतकम्

वक्ष्यमाणानां शब्दानामध्ययनम्

वसु:, वसुमना:, हवि:, सद्गति:, सता, सद्भूति, शूरसेन:, सन्निवास:, सुयामुन:, भूतावास:, वासुदेव:, दर्पहा, अदृप्त:, दुर्धर:, विश्वमूर्ति, दीप्तमूर्ति:, अनेकमूर्ति: अव्यक्त:, एक:, नैक:, स:, व:, क:, किम् यत्, तत्, लोकनाथ: हेमाङ्ग: वराङ्ग:, विषम:, शून्य:, घृताशी, अचल:, मानद:, मेधज:, धराधर:, तेजोवृष:, प्रग्रह:, निग्रह:, व्यग्र:, नैकशृङ्ग:, गदाग्रज:, चतुर्मूर्ति:, चतुर्बाहु:, चतुर्व्यूह:, चतुर्गति: चतुरात्मा, चतुर्भाव:, सुतन्तु:, इन्द्रकर्मा, कृतकर्मा, उद्भव:, सुन्दर: सुन्द:, सुलोचन: ।

नवम् अध्यायः

नवमशतकम्

वक्ष्यमाणानां शब्दानामध्ययनम्

अर्कः, वाजसनिः, अनन्तः, अक्षोभ्यः, महाहृदः, महागर्तः, महाभूतः, महानिधिः, कुमुदः, कुन्दरः, कुन्दः, पर्जन्यः पावनः, सर्वतोमुखः, सुलभः, सिद्धः, न्यग्रोधोदुम्बरः, अश्वत्थः, सहस्रार्चिः, सप्तैधाः, सप्तवाहनः, अणुः, बृहत्, कृशः, स्थूलः, निर्गुणः, महान्, अधृतः, स्वधृतः, स्वास्य, भारभृत्, योगी, दानः, सुपर्णः, धनुर्वेदः, अदमः, अनिलः, नियन्ता, यमः, सात्त्विकः, सत्यः, अर्हः, प्रीतिवर्धनः, विहायसगतिः, रविः, विरोचनः, सूर्यः, सविता, सुखदः, नैकदः, अग्रजः, सदामर्षी, अद्भुतः, सनात्, सनातनतमः, कपिलः, कपिरव्ययः ।

दशमोऽध्यायः-

दशमशतकम्

वक्ष्यमाणानां शब्दानामध्ययनम्

स्वस्तिदः, स्वस्तिकृत्, स्वस्ति, स्वस्तिभुक्, स्वस्तिदक्षिणः, कुण्डली, चक्री, विक्रमी, शब्दातिगः, शब्दसहः, शिशिरः, शर्वरीकरः, अक्रूरः, पेशलः, दक्षः दक्षिणः, क्षमिणां वरः, विद्वत्तमः, उत्तारणः, पुण्यः, दुःस्वप्ननाशनः, वीरहा, रक्षणः, जीवनः, अनन्तरूपः, जितमन्युः, भयापहः, विदिशः, व्यादिशः, अनादिः, लक्ष्मीः, सुवीरः, जननः, भीमः, धाता, पुष्पहासः, प्रजागरः प्रणवः, पणः, प्राणभृत्, प्राणजीवनः, तत्त्वम्, एकात्मा, तारः, सविता, प्रपितामहः, यज्ञः, यज्वा, यज्ञवाहनः, यज्ञभृत्, यज्ञी, यज्ञसाधनः, अन्नम्, अन्नादः,

आत्मयोनिः, स्वयंजातः, वैखानः, शितासिः, नन्दकी, चक्री, शार्ङ्गधन्वा, गदाधरः, रथाङ्गपाणि, अक्षोभ्यः, सर्वप्रहरणायुधः ।

उपसंहारः

पुस्तकानां सूची

भूमिका

भूमिका

भक्तिशास्त्रमवलम्ब्य अनेके ग्रन्थाः मनीषिभिः प्रणीताः विद्वद्भिः समादृता । परन्तु नात्र सन्देहो यत् आचार्यवर्यैः रामानुज महोदयैः भक्तेः समीक्षात्मकं षाड्गुण्योपाङ्गं विश्लेषणं प्रस्तुतम् । न तथा तत्पूर्ववर्तिभिः कश्चिदपि मनीषिभिः तथा निरूपितमपितु तदनन्तरमेव अन्यैः आचार्यैः तद्विश्लेषणं महता क्रमेण वैज्ञानिक दृष्ट्या प्रस्तुतम् । आचार्येण च तथा कर्तुं दीक्षितुं शिक्षितुञ्च ।

एतत् तु अवितथं वचः यद्भक्तेः समीक्षात्मकं निरपेक्षं तुलनात्मकमध्ययनं रामानुजाचार्य दृष्ट्या प्रतिनाम विवरणपूर्वकं नानुष्ठितं न वा सम्यक् विचिन्तितम् ।

वर्तमान युगे यद्यपि वैज्ञानिकाः पूर्णतया लोके (प्रथिताः विभान्ति विज्ञान प्रभावश्च भुवि देदीप्यमानः दृश्यते ।

एतदपि सत्यमेव यत् विभिन्न देशेषु आध्यात्मिक चिन्तया मनुष्या जीवनमापनाय सर्वथा सन्नद्धं धारावाहिक् रूपेण विद्यते ।तत्र भक्तेः प्राधान्यम् इदानीं तने काले वर्तते ।आगामिनि च भविष्यति । एवञ्जातीया चिन्ता यावत् मानव सभ्यता आर्य संस्कृतिः च पूर्णतया विराजते ।भवतुनाम कालकवलितं मानव सभ्यता परिवर्तनं नामपि सभ्यसमाजेषु भक्तेः पूर्णप्रवणता अन्यथानैव स्यादिति ।

तादृशाः भक्तिःप्रवाहः मानवः समाजे सुदृढो विद्यते ।अतः मानव मनसः उच्छेदनात्पूर्वमसम्भव एव तदुच्छेदः आनयति तत्र भवन्तो भवन्तः यत् इदानीमपि मनीषिणां भक्ति सम्बन्धिनि जिज्ञासा विद्यते । अतः प्रायशः तदनुकूला कृतिश्च उपलभ्यते ।शोधप्रबन्धस्यास्य आलोच्य विषयः भक्ति दर्शनस्य समीक्षात्मकः विमर्शः । नात्रसन्देहः यत्भारतीय संस्कृतिः अखण्ड सत्याराधिकापि परं खण्ड सत्यस्य महत्त्वमप्यूर्णं स्वीकरोति ।

अस्य देशस्य विधा कला सर्वापि दृष्टिः भक्ति रसानुप्राणिता एव विराजते । व्यष्टि समूहेन समष्टेः स्वातिविमूल सत्तायाः वस्तुतः समन्वयः विलक्षणं विवक्षणान्च सामञ्जस्यं विशिष्टाद्वैत दर्शनस्य वैशिष्ट्यम् ।

नूनमेव अखण्ड सत्यस्य स्वरूपमुदाहितम् आचार्यवरेण परं भारतीय लोकस्य सर्वथा समन्वय विश्वं प्रति स्वात्म्यभावः सर्वस्य ब्रह्माण्डान्तर्गतस्य चिदचिद्रूपस्य रक्षणाय सम्वर्धनाय राष्ट्रस्य परिपोषणाय च वाञ्छित विर्तो भवेत् । साधनायाः कश्चिन्मूलाधारो भवति यमवलम्ब्य लोकालोकाय जनाःप्रवर्तन्ते ।

अत एव नु उक्तं उपनिषदि

'भूमैव सुखं नाल्पे सुखास्ति'

सत्यशिवसुन्दरस्य आनन्दात्मकस्य प्राप्तये सदा मानवः चेष्टः विद्यते । यं प्राप्य च नान्यत्किमपि प्राप्य अवशिष्यते । यमवाप्य सर्वथाभाव एव दूरीकृतो भवति । जीवनं प्रतिपदं भगवत्पदप्राप्तये तत्स्मरणार्थमेव यंयते ।

भारतीय साहित्यं वागर्थाविव संपृक्तम् ।

तत् एव च समुद्भूतम् ।यथा चितः महत्त्वं तथैव अङ्गभूतायाः प्रकृतेरपि अपरिहार्यं महत्त्वम् । अतएव चिदचिद्विशिष्टमेव ईश्वरमामनन्ति मनीषिणः । विभिन्नेषु अध्यात्ममार्गेषु धर्मज्ञान भक्तीनां ज्ञानं वैशिष्ट्यं उद्घोषित तत्त्वाचार्यवर्यैः ।परन्तु अस्मिन् समोद्यात्मके निबन्धे भक्तेः सर्वातिशायि निमहत्वा या श्रुतिषु प्रकटिताः ता पुनः पुनः समर्थ्यते ।

मोक्ष साधनेषु भक्ते विशिष्टं महत्त्वं विद्यते । भक्तिरेव चरमं परं च साधनं जीवनस्य स्तस्याः भक्तेः त्रयाः विभागः प्रदर्शितः आचार्यैः प्रवर्तकावस्था साधका-वस्था सिद्धावस्था च ।प्रथमावस्थायां साधनायाः प्राधान्यम्,दार्शनिकैः शब्दार्थैः तदात्म्यमङ्गीकृतम् ।तथा च नामोच्चारणे भगवतः स्वरूपस्य स्थायि संस्कारः अन्तःकरणे प्रतिबिम्बितो भवति ।भगवतः मंगलमधुराकृति वक्तुः श्रोतुश्च मनोमुकुरे प्रतिष्ठिताः मनोमय मूर्तिः स्वरूपतामापद्यते ।

मानस: आपूर्णमभिन्नत्वं तत्स्वरूपेण जायते ।येन कदापि विस्मृति पथं नायतै । सर्वत्र तत्स्वरूपमेव परिदृश्यते । प्रतिबिम्बा ग्रहणान्च द्रुतचित्ते द्रवित लाक्षादिषु रागवद् भवति ।येन सर्वत्र स एव राग: उपलभ्यते ।एवमेव अन्त:करणे प्रतिष्ठित स्वरूपमेव सर्वत्र भक्त: आदधाति ।कदाचित् आह्लादिनी प्रेममयी घृणिमाश्रिता ।भूत तत्त्व कणिकास्वपि चैतन्यरूपेण परिव्याप्नोति । उष्ण: कालस्येव जीवने काचिन्मोहमयीमधुरामा विराजते । सर्वत्र एकमेव तत्त्वमवलोकयति आर्द्र: भक्त: ।

एवमेव रागिणां भगवद्रागिणां चरमापरमावस्था ।एतामेवावस्थामासाद्यनवद

उद्धव: ज्ञान सम्पन्नो पि भक्ति: प्राप्तौ प्राक्षित: ज्ञान्निधाप्य रसमयीं अनुरक्तामावं सम्प्राप्य धन्योभवति कृतकृत्यो भवति ।

एवमेव भक्तानाम् अनन्यावस्था अपूर्वा अनिर्वचनीयाचावस्था तत्त्वं सम्प्राप्य भेदज्ञानम् समाप्तिमायाति । एतस्यामेवावस्थायां ज्ञानिन: ज्ञानस्य ज्ञेयस्य च सर्वथा अभिन्नत्वमनुभाव्यते ।नात्र संदेहो यत्भगवत्स्वरूपं अप्राकृतं तत्त्वम् । परमपि शब्दश्रोतभेदात् यथा चिदानन्दमयो भगवान् तथैव तन्नाम्नापि भक्तानां पुर: चिदानन्दरूपेण अभिव्यज्यते ।

प्रथमावस्थायां चित: आनन्दस्य च अभिव्यक्तिर्भवति । किन्तु साधना प्रभावात् अनभिव्यक्तरूपमप्यभिव्यक्तं भवति ।नियमेन प्रवहमानेयम् चिदकाल साधना कणादिकस्य कारणं भवति ।इदन्च कर्म साधना यस्या नाम साधनयापि निरूपणं भवति ।सा चित्शुद्धिं शरीरशुद्धिन्च सम्पादयति ।

साधनावशादेव नवधाभेदभिन्नयापभक्त्या मनसा,वाचा,कर्मणा, आराधनतत्परा-यणानां जनानां न केवलं चित्शुद्धिरपि तु भूत शुद्धिरपि जायते ।

फलत: भौतिकमशुद्धं शरीरं विगलितं सत्स्यावभिनवं चिन्मयशरीररूपता-मायते ।बहुधा श्रूयते यद्भक्त: क्षुधा पिपासादि शून्य: अर्थामुक्त: समस्त भौतिक दुःखविरहित: उन्मत्तोभवति ।

प्राकृत दृष्ट्यावलोकयन् जनः प्राकृतकर्मविवर्जितं निर्मलम् अपरम् अमरं भावशरीर धारिणं भक्तं उन्मत्तमेव कथयेत् । अत एव नु भागवतोक्तम् -

क्वचिद् रुदन्त्यच्युत् चिन्तया क्वचिद्
हसन्ति नन्दन्ति वदन्ति अलौकिकाः ।
नृत्यन्ति गायन्त्यनुशीलयन्त्यजम्
भवन्ति तूष्णीं परमेत्य निर्वृताः ।

अत एव ईश्वर प्रणिधानाद् वा इति योगसूत्रे उक्तम् । किमन्यत् अद्वैतविधि-पथिकैःउपास्यः मधुसूदनो पि कथयति -

ध्यानाभ्यासवशीकृते न मनसा तन्निर्गुणं निष्क्रियं
ज्योतिः किंचन योगिनो यदिपरं पश्यन्ति पश्यन्तु ते ।
अस्माकं तु तदेव लोचन चमत्काराय भूयाच्चिरं
कालिन्दीपुलिनेषु यत्किमपि तन्नीलं महोधावति ।।

एवमेव भक्तेः विश्लेषणमद्वैताचार्यैरपि कृतम् । पञ्चदश्यामपि-

मूषासिक्तं यथा ताम्रं तन्निभं जायते यथा ।
रूपादीन् व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम् ।

एवमेव बहुभि आचार्यैः भक्ति विषयेः बहुधा समीधितम् आचारितञ्च अस्माभिरपि वाङ्मनः कायनिष्पाद्यजपध्यानार्चनप्रभृतिर्देवताराधनात्मको धर्मः, तत्र परमं पृच्छति -

'को धर्मः सर्वधर्माणां भवतः परमो मतः ।

अपि संसारबन्धनात् मुक्तिसाधनप्रदर्शने प्रश्ने भीष्मेणोक्तं

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ॥

जंगमाजंगमस्य स्वामिनं सततं नवरूपेणेभवम् परामोदात् आत्मनीकृतेन मनुष्यः सर्वदुःखातिगो भवति । अपि च – भक्त्या तद्वर्णनमेव सकल फलदायकं इति, विष्णुसहस्रनामाख्ये ग्रन्थे प्रदर्शितम् ।

अस्माभिः रामानुजप्रणीतस्य विष्णुसहस्रनामभाष्यस्य परमां प्रीतिमासाद्य लोकालोकाय लोकनाथस्य विष्णोः तत्कृतं व्याख्यानमेव अस्मदनुसंधान विषयत्वेन स्वीकृतं विदुषां पुरतश्च उपस्थापयन् इयं प्रबन्धं अतुलमानन्दं विन्दामि ।

अस्मिन् प्रश्ने कानिचित्प्रमाणानि विदुषामामोदाय प्रस्तूयते –यथा–

इह खलु निखिलोऽपि चेतयमानः प्रमाणतः प्रमेयं परिच्छिन्दन्, तच्चेत् प्रमेयमनुकूलं तदुपादत्ते, यथा स्रक्चन्दनवनितादिकम्, तच्चेद्विपरीतम् अपोहति, यथा क्षुरकण्टकादिकम्, तच्चेदनुभयरूपम् उपेक्षते, यथा काष्ठलोष्टादिकम् । तत्र प्रत्यक्षादिप्रमाणान्तरगोचरयोरर्थकामयोः अत्यल्पत्वानर्थकरत्वबीभत्स्यत्वभङ्गुरत्वदुःखमिश्रत्वदुस्साधनत्वाद्यनेकदोषानुषङ्गेण त्याज्यत्वात्, शास्त्रप्रमेययोर्धर्मपरतत्त्वयोः तद्वैपरीत्यादनन्तमङ्गलसंगतत्वाच्च, शास्त्रतदर्थोपादेयत्वं प्रकृष्यते । यथाहुरैतिहासिकाः पौराणिकाश्चैककण्ठाः–

सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ।
वेदशास्त्रात्परं नास्ति न दैवं केशवात्परम् ॥ इति

तत्र चतुर्दशविद्यास्थानप्रधानभूतस्य वेदस्य इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् । बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति । इति प्रकारेणेतिहासपुराणाभ्यामर्थे निर्णेतव्ये पुराणेभ्य इतिहासोत्कर्षे च विवक्षिते श्रीमद्रामायणवन्महाभारतं

शरणम् ।

तत्र- महाभारतसारत्वात् ऋषिभिः परिगानतः ।
वेदान्तार्थप्रकाशात् मोक्षोत्कृष्टफलत्वतः ॥
परिशुद्धाशिवत्वतो गीताकाव्यत्वतश्च नः ।
सहृदामाम्नायव्याय उपादेयतमो मतः ॥

महाभारतं हि परिशुद्धविशेषावस्थितविप्रवचनधौरव्यापारात्मकत्वात् इतिहासत्वकृतात्प्राधान्यात्, पुराणेषु तावत् वायुप्रोक्तशैवयोः

मतिमन्थानमाविध्य येनासौ श्रुतिसागरात् ।
जगद्धिताय जनितो महाभारतचन्द्रमाः ॥

भविष्यत्पुराणे-

विभेति गहनाच्छास्त्रान्नरस्त्रीशूद्रादिदोषवान् ।
भारतः शास्त्रसारो यतः काव्यात्मना कृतः ॥

मात्स्ये-

यस्य द्वैपायनः पुत्रः स्वयं विष्णुरजायत ।
प्रकाशो जनितो येन महाभारतचन्द्रमाः ॥

वैष्णवे -

कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् ।
को ह्यन्यो भुवि मैत्रेय महाभारतकृद्भवेत् ॥

मार्कण्डेये-

व्यासवाक्यजलौघेन कुधर्मतरुहारिणा ।
वेदशैलावतीर्णेन नीरजस्का मही कृता ॥

तथा ऋषिभिः परिगृहीतः -

ऋषिभिः परिगृहीतानि इत्येतद्विवरणावसर एवैष हेतुरुपपादयिष्यते ।

किञ्च, वेदाचार्यसमाहारात् - भगवान् हि वेदाचार्यः कृष्णद्वैपायनः परमाप्ततमः, भगवन्नारायणावतारत्वेन निरतिशयज्ञानैश्वर्यादिकल्याणगुणतया निरस्तसमस्तविप्रलम्भादिदोषसंभावनत्वात्, कलिकल्मषाधिकारिमनुष्यानुग्रहाय व्यस्तसमस्तवेदत्वात्, वेदार्थेषु तत्त्वानुष्ठानयोर्ज्ञानसंशयविपर्ययपरिजिहीर्षया प्रणीतपञ्चमवेदत्वात्, स्ववचनेन क्षात्त्रियं विश्वामित्रं ब्राह्मणीकृतवतो भगवतो वसिष्ठस्य नप्तृत्वात्, वसिष्ठपुलस्त्यवरप्रदानलब्धदेवतापारमार्थ्यज्ञानपुराणसंहिता-कर्तृत्वादिविचक्षणतरातिशयवत्या वैष्णवादिष्वपि पुराणेषु प्रसिद्धस्य भगवतः पराशरस्य चापत्यत्वात्, अनन्यसाधारणतपस्समाधिविशेषैश्चाशेषपरमर्षिपरिषत्पुरस्कृ-त्वाच्च । एवंविधेन अनेन ऋषिभिः परिगृहीतानामेव भगवन्नाम्नामेतत्स्तोत्ररूपेण समाहृतत्वाच्चायमुपादेयतमः ॥

अपि च भीष्मोत्कृष्टमतत्वात्: - भीष्मोऽपि हि (प्रत्ययित) प्रतीततमः । तथा हि, राजधर्मेषु धर्मराजाय भगवता व्यासेन श्रोतुमिच्छसि चेद्धर्मान्निखिलेन नराधिप।
प्रैहि भीष्मं महाबाहो वृद्धं कुरुपितामहम् ॥
स ते सर्वरहस्येषु संशयान् मनसि स्थितान् ।
छेत्ता भागीरथीपुत्रः सर्वज्ञः सर्वतत्त्ववित् ।
साक्षाद्दर्शी यो देवान् सर्वान् शक्रपुरोगमान् ॥

यच्च त्वं वक्ष्यसे भीष्म पाण्डवायानुपृच्छते ।
वेदप्रलापा इव ते स्थास्यन्ति वसुधातले ॥

भगवता नारदेन च -

कृत्स्नान् हि विविधान् धर्मांश्चातुर्वर्ण्यस्य वेत्स्ययम् ।
तच्छीघ्रमनुजश्रेष्ठ संशयान् मनसि स्थितान् ॥

इत्यादौ च प्रपञ्च्य, एवं बहुमहर्षिवृन्देनापि ब्रह्मचर्यतपस्समाधिदिव्य-ज्ञानसाक्षात्कारादिप्रभावविशेषवत्तया प्रशस्य, परतत्त्वधर्मप्रवक्तृतया वरान् वितीर्य नियुक्तत्वात्, मातापितृशुश्रूषणात्तत्प्रसादवरलाभयोग्यात्, स्वयं च -

दाहो मोहः श्रमश्चैव क्लमो ग्लानिस्तथा रुजः ।
तव प्रसादाद्गोविन्द सद्यो व्यपगतानि मे ॥

एवंविधस्य भीष्मस्य -

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः"

इत्यादिना अधिकतमत्वमतत्त्वेन स्थापितत्वाच्च अयमध्यायः उपादेयतमः ।

परिग्रहातिशयः -

परिग्रहो हि सार्वभौमो भगवन्नामसहस्रस्य । शास्त्रेषु तावत् सभापर्वणि देवो नामसहस्रवान् इति भगवानपि नामसहस्रसंबन्धेन भूष्यते । श्रीविष्णुधर्मे च श्रीगजेन्द्रमोक्षणे- सहस्रशुभनामानमादिदेवमजं विभुम् । इति । अत्र चोपोद्घातफल-श्रुत्योर्गुणिप्रपन्नो दृश्यते । आयुर्वेदादिषु च दृष्टादृष्टशास्त्रेषु, यथा चरकसंहितायाम् ।

विष्णुं सहस्रमूर्धानं चराचरपतिं विभुम् ।
स्तुवन्नामसहस्रेण ज्वरान् सर्वान् व्यपोहति ॥

गीतार्थैकार्थ्यश्च -

भारतसिद्धान्तभूतभगवद्गीतानारायणीयवानसन्ध्यगुपूजोक्तमानुशासन-प्रभृतिप्रदेशानां तत्तात्पर्यनिष्कर्षकत्वेन तदैकार्थ्यत्वाच्च ।

एवमेभिः बहुभिर्हेतुभिः प्रमाणभूतकारिणां परमोपायत्वतया निर्णीतं, व्यासदेवभगवद्देवस्थाननारदवात्स्यायनमनुप्रभृतिभिः वत्सविषयादेशिकैः मुनिवर्य-प्रमाणिभिः स्वयं च भगवता सर्वेश्वरेण गीतोपनिषदाचार्येण पूर्वेषामपि गुरुणा पुण्डरीकविलोचनेन भोक्तृकोटिनिविष्टेन भीष्माच्युतानुमोदितं श्रीमन्नामसहस्राध्यायं भगवद्गुणतत्त्वप्रतिपत्त्यै व्याकुर्महे ।

प्रथम

श्रु

त

क

स्

प्रथमो ध्याय:

קאַפּ׳ זעקס:

विश्वं - ओं विश्वाय नम:

अर्चनोपयुक्तानां प्रणवपूर्वाणां नम: शब्दोत्तराणाम् अकारादि-वर्णान्तानां विश्वादिनाम्नां चतुर्थ्यन्तरुपादिप्रदर्शिका: । अथ पञ्च-सिद्धान्तनिष्ठानिर्णयेन पर, व्यूह विभवविशेषेण, स्वानाम अर्थप्रकरणौ-चित्यापौनरुक्त्यप्रभृतिभि: न्यायैर्व्यवस्थाप्य, व्याकरणानिरुक्तार्ण-निर्वचनप्रस्थानेन निरुच्यते, तत्र पूर्वं सर्वतोमुखं भगवत: पूर्णत्वमाह-

<u>विश्वम्</u> इति विशत्यवयवा नित्यर्थे

'अशूपुषिलटिकणिखटिविशिभ्य: क्वन्' उणादौ प्रथम पादे इति क्वन प्रत्यय: ।

यथा मोक्षधर्मे संयमाय पञ्चशिख:-

वेशनाद्विश्वमित्याहुर्लोकानां काशिसत्तम

लोकांश्च विश्वमेवेति प्रवदन्ति नराधिप ।। इति ।

भाष्यम् -

स्वाभाविकानवधिकातिशयमाङ्गल्यैकतानै: स्वरूपरुपगुण विभवै: परिपूर्ण इत्यर्थ: , कात्स्न्र्यवचनत्वादस्य, आदौ अनवच्छेद्यमहाविभूतित्वस्य संकीर्तनयोग्यत्वाच्च ।

'तद्शिष्यं संज्ञाप्रमाणत्वात्'[१]

'यथोपलम्भं सर्वत्र लिङ्गनियम:'

१- पा०अ० १।२।५३

'कार्यवाचि विश्वशब्दः कारणे वर्तते'[१]

इति केचित् तद्वार्त, सर्वेषां नाम्नाम्, योगरूढिभ्यां भगवति स्वशब्दत्वोपपादनात् जघन्यवृत्तेरयुक्तत्वाच्च ।

अन्ये विश्वमिति ब्रह्मप्रपन्चयोरभेदपरं प्रपन्चितवन्तः तत् वन्चनमात्रम्[२] ।

तथा हि- न तावत् विश्वपदम् अभेदवाचि न च[३]

तत्त्वमस्यादिवत् सामानाधिकरण्येनैक्यपरम्, साज्ञानां स्वातन्त्र्येण ऐक्यपरत्वाविवदाणात् अतएव हि (विश्वम विष्णुः इति अविशेष्य लिङ्गत्वम् निरस्तश्चायमर्वागेव पदाः अन्यत्र चानेकत्र इदमेव पूर्णत्वम् सर्वैनामभिः (विष्णुरित्यादिभिः) विशिष्यते ।

निरुक्ति-

विश्वम् सर्वत्रपूर्णत्वात् स्वरूपगुणवैभवैः ।

१- शंकरभाष्यम्

२- शंकरभाष्यम्

३- छान्दोग्योपनिषदि ६।८।७

विष्णुर्- ओं विष्णवे नम:

विभवानुप्रवेशेन तावद्विशिनष्टि-

(विष्णु:) इति- स्वविभूतिभूतं चिदचिदात्मकं सर्वं विशतीति यथा-

"विवेशभूतानि चराचराणि"[१]

"तदेवानुप्राविशत्"[२] इत्यादि

व्याप्य सर्वानिमांल्लोकान् स्थित: सर्वत्र केशव: ।
ततश्च विष्णुनामासि विशेर्धातो: प्रवेशनात् ।।

विश्, प्रवेशने इति धातु: तुदादि: तत्र क्नुप्रत्ययात् विष्णुरिति ।

श्रीवराहे ताच्छील्यादिविषयेणक्नुप्रत्ययेन अस्य महिम्न: स्वाभाविकत्वमुच्यते ।

पूर्णत्वव्याप्तिविषयत्वेन नाम्नोरपुनरुक्ति:

निरुक्ति-

चराचरेषु भूतेषु वेशनात् विष्णुरुच्यते ।

१- तै०ना० ६।१।४

२- तै०आ० २।६।२

वषट्कारो - ओं वषट्काराय नमः

आकाशादि वैलक्षण्येन एतद्व्याप्तेः प्रयोजनमुच्यते, वषट्कारः । सर्वं वशं स्वेच्छानुवर्ति करोतीति, करोतेः कर्मण्यण् ।

"वश कान्तौ" धातोः अदादिः इत्यस्मात् धातोः

निरुक्ति-

स्वेच्छयायो वशे सर्वं वषट्कारः करोतिसः

"सर्वस्य वशी सर्वस्येशानः"[1]

भूतभव्यभवत्प्रभु- ओं भूतभव्यभवत्प्रभवे नमः

अतः भूतभव्यभवत्प्रभुः कालत्रयवर्तिनां प्रभुः स्वामी शेषोति यावत् ।

"विप्रसंभ्योड्ढ्व संज्ञायाम्[2] इति डुः समुदायस्य संज्ञात्वात् प्रत्ययाविरोधः,

घुष्यन्ति हि शास्त्राणि

"पतिं पतीनाम्" परमं परस्ताद्विदाम देवं भुवनेशमीड्यम्[3]

१- बृ०उ० ४।४।२२

२- पा०अ० ३।२।१८०

३- श्वेत०उ०६-७

भूतभृद् - भावो - ओं भूतभृते नमः, ओं भावाय नमः

भूतानि बिभर्तीति - भूतभृत्

"विश्वं बिभर्ति भुवनस्य नाभिः"[1]

तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिताः
एवमेवैताभूतमात्राः प्रज्ञामात्रास्वर्पिताः -
प्रज्ञामात्राः प्राणेष्वर्पिताः"[2] इति

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः"[3] ।।

उक्तवक्ष्यमाण सर्वविभूतिभिः कलापीव प्रचलाकेन विशिष्टतया भवतीति भावः ।

"भवतेश्चेति वक्तव्यम्"[4] काशिकावृत्तौ इति ण प्रत्ययः तस्मिन् भगवतिप्रकारतया अन्तरभावादेव हि सर्वस्य तद्विभूतित्वव्यपदेशः।

१- तै०ना० १-२

२- कौषीतकि० ३-६

३- गीता १५-१७

४- पा०अ० ३।१।१४३

भूतात्मा - ओं भूतात्मने नमः

इयम् विभूतिविभूतिमद्भावं शरीरात्मभावलक्षणम् विशिनष्टि भूतात्मा इति ।

सर्वेषां भूतानां आत्मा, अशरात्मनोऽपि इदमेव स्वशरीरं प्रत्यात्मत्वम् यद्व्याप्य साक्षात्प्रवृत्त्यादिषु नियच्छति: ।

स्वं परस्सर्वमिति विशेषः, दारागारक्षेत्रादि विलक्षणेन अत्यन्तपारतन्त्र्येण अन्तरङ्गो हि देहस्यात्मविमतिभाव: ।

"य आत्मनि तिष्ठन्"[1]

"यस्यात्माशरीरम्"[2]

भूतभावन: - ओं भूतभावनाय नमः

एष सर्वभूतान्तरात्मा[3]

"जगत्सर्वं शरीरं ते"[4]

"तानि सर्वाणि तद्वपु:"[5]

१- माध्यन्दिनशाखायाम्

२- माध्यन्दिनशाखायाम्

३- सु०उ० ७

४-रामायण युद्ध १२०-२६

५- वि०पु० १-२२-८६

तानिधारकपोषकभोग्य प्रदानेन वर्धयतीतिभूतभावन:

"नन्द्यादिभ्यो ल्यु:"[1]

"कृत्यल्युटोबहुलम्"[2]

इति वा कर्तरि ल्युट्

एवं भावन: प्रतर्दन: इत्यादयोऽपि ल्युट्प्रत्ययान्ता: यथा-

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम्
भूतभावन भूतेश देवदेव जगत्पते[3] ।।

एवं स्वरूपस्थिति प्रवृत्तिपालनै: शेषित्वमुपपादितम्

"उत्पादनपोषणादिभिरुपादीयमानं प्रत्युद्देश्यं हि शेषी"
इति "शेष:परार्थत्वात्"[4] इति समर्थितम् ।

निरुक्ति-

धारकादिप्रदानेन यश्च वर्द्धयति स्वयम् ।
भूतानि नित्यं झटिति सतु स्यात् भूतभावन: ।।

१- पा०अ० ३।१।१३४

२- पा०अ० ३।३।११३

३- गीता १०।१५

४- पूर्वमीमांसा ३।१।१

पूतात्मा - ओं पूतात्मने नमः

आत्मत्वेऽपि संसारिवत् अस्य शरीरभूतचिद्चिद्दोषाननुषङ्गात् पूतात्मा शुद्धस्वभावः ।

परावरयोस्तुल्यत्वेऽपि शरीरसंबन्धे अवर एवात्माकर्म फलानि भुन्जानः क्लिश्यते ।

शंकरभाष्ये तु-

भूतकृदादिभिर्गुणातन्त्रत्वं प्राप्तं प्रतिषिध्यते पूतात्मा इति पूत आत्मा यस्य स पूतात्मा, कर्मधारयो वा "केवलो निर्गुणश्च"[१] इति श्रुतेः ।

गुणोपरागः स्वेच्छतः पुरुषस्येति कल्प्यते ।

"जहात्येनां भुक्तभोगामजोऽन्यः"[२]

भोजयिता तु परः स्वातन्त्र्येण न भुंक्ते चकास्ति च परम्, यथा शिष्यशासित्रोरविशिष्टेऽपि कशास्पर्शे, कर्मकर्तृभावभेदेन शिष्य, एक एव कशया पीड्यते न शासिता विशायते च ।

"अनश्नन्नन्योऽभिचाकशीति"[३]

१- श्वे०उ० ६।११

२- तै०ना० ६।१०।५

३- मु०उ० ३।१।१।

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते[१] ।।

"क्त, सातत्यगमे" धातोः भ्वादि का०

ततोमनिणन्तोयम व्युत्पादितः इत्थमयमुत्तरत्रापि(पूतात्मेत्यादौ)

"पूञ पावने" धातोः

"गत्यर्थाकर्मकश्लिष्शीङ्०स्था"[२]

इत्यादिना कर्मणात् कर्तरिक्तः भवन्तिह्यविवक्षितकर्माणोऽप्य कर्माणः ।

निरुक्ति-

शरीरत्वाच्च जातः तदोषैर्न कदाचन ।
लिप्यते यः स पूतात्मा न भुंक्ते च फलानि यः ।।

१- गीता ४।१४

२- आदि ३।४।७२

परमात्मा च - ओं परमात्मने नमः

भाष्य-

यथा सर्वाणि भूतानि अनेनात्मवन्ति, नैवमयमन्येन केनचित्, अतः (परमात्मा) परो मा अस्येति परमः पृषोदरादित्वेन साधुत्वम् परमश्चासावात्मा चेति, अनन्येश्वरः यथा-

"आत्मेश्वरम्"[1]

नापरं पुण्डरीकाक्षात् दृश्यते भरतर्षभ
न देवं केशवात्परम्[2]

"मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय।
मयि सर्वमिदं प्रोक्तं सूत्रे मणिगणा इव"[3]।।

"पॄ पालनपूरणयोः" इति जुहोत्यादि

निरुक्ति-

येन भूतान्यात्मवन्ति नायमन्येन चात्मवान्।
अतो ह्यात्मेश्वरत्वाच्च परमात्मा प्रकीर्तितः।।

१- तै०ना० ६।११
२- भा०आश्व २।२१
३- गीता ७।७

मुक्तानां परमागतिः - ओं मुक्तानां परमागतये नमः[1]

भाष्यम् -

एवं सवशेषिणमेव परमप्राप्यमाह मुक्तानां परमागतिः प्रकृतिबन्धाविधाकर्मसंस्काररुचिविपाकेभ्यः आवरणेभ्य एकान्ततो त्यन्ततश्च विश्लिष्टा मुक्ताः आम्नायते हि,

"तत्सुकृतदुष्कृतेधूनुते तस्य प्रियाज्ञातयः सुकृतमुपयन्त्य प्रियादुष्कृतं तथथा रथेन"[1]।

मुक्तानां परमागतिः

गम्लृ गतौ धातौ

श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्ये श्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्यधूत्वाशरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीत्यभिसंभवामीति[2]।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे[3]।।

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते[4]।।

१- कौषीतकि ब्राह्मण० १।४

२- छान्दो० ८।१३।१

३- मु०उ० २।२।८

४- गीता ७।१४

भाष्यम् -

अत्र मुक्तानाम् इति बहुवचनेन, तेषां भेदो बहुत्वं च स्पष्टम् तथा च -

"परामृतात्परिमुच्यन्ति सर्वे"[१]

(ब्राह्मी) (मुक्तानां गतिः) इत्युक्त्या भगवता च भेदः

तथा च-

जुष्टं यथापश्यत्यन्यमीशमस्यमहिमानमिति वीत शोकः"[२]

"भोक्ताभोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविध ब्रह्ममेतत्"[३]

"मुक्तोपसृप्यव्यपदेशाच्च"[४]

इत्यादि स्पष्टं च मोक्षधर्मे-

सहि नारायणो ज्ञेयः सर्वात्मा पुरुषो हि सः

नलिप्यते मलैश्चापि पद्मपत्रमिवाम्भसा ।।

कर्मात्मात्वपरोयोसौ मोक्षबन्धैस्सयुज्यते ।

स सप्तदशकेनापि राशिना युज्यते तु सः[५] ।।

१- मु०उ० ३।२।६

२- मु०उ० ३।१।२

३- श्वे०उ० १।१२

४- ब्र०सू० १।३।२

५- महाभारत शा० ३५२।१४

अतस्तथ्येन मिथ्याभूतेन वौपाधिना कुम्भादिनैव नभोवच्छिन्नं ब्रह्मैव संसरति मुक्तौतु भेद एव नास्तीति मतम् ।

अभेदवादिनां तु मुक्तिविषयाभेदसाध्यवादाः भज्येरन्, औपाधिकभेदवादिनां च मुक्तस्वरूपमङ्गोपगमात्, मुक्तेरपुरुषार्थत्वम्, भेदवादसामञ्जस्यं च स्याताम् इदमेव साम्यं मुक्तावभेदो व्याख्यातः -

'तद्भावभावमापन्नस्तदासौ परमात्मना भवत्यभेदी'[१]

इति तस्य परस्य ब्रह्मणः भावाः ज्ञानशक्त्यादयः स्वभावाः तेषां भावः आविर्भावः गुणैः सादृश्यम् अन्येषां द्वितीयो भावशब्दोऽर्थः, मुक्तौभेद निषेधश्च देवाद्युपाधिविषयो व्यञ्जितः ।

इत्यादिना - श्वेतद्वीपवासिनां दिव्यरूपाद्युपेतत्वम् भगवदास्यपरिचरणैकप्रियत्वं च प्रपञ्च तदेवमुक्तानां लक्षणमुक्तम् ।

परमेति विशेषणेन मुक्तानामेव केषांचिदवचीनागतिर्ध्यते गृह्यते निर्मुक्तजरामरणात्मककैवल्यलक्षणा-

'जरामरणमोक्षायमामाश्रित्ययतन्तिये इति'[२]

१- विष्णु०पु०६।७।९५

२- गी० ७।२९

एवं मुक्तानां परमागतिः

"सा काष्ठा सा परागतिः"[1]

"मामेवानुत्तमां गतिम्"[2]

<u>अव्ययः</u> - ओं अव्ययाय नमः

इदमेव पञ्चभिनामभिरुपपादयति न क्षीयते न व्यपगम्यते स्मादिति, (अव्ययः) एतच्च एवं प्रत्ययः विनयः जय इत्येवमादयः नहि भगवान् कथंचित् संसारमहार्णवादुत्तीर्णं स्वचरणारविन्दं प्राप्तवन्तं पुनरावर्तयति अत एवाम्नासिषुः।

"एतेन प्रतिपद्यमाना इमं मानवमावर्तन्नावर्तन्ते"
न च पुनरावर्तते,न च पुनरावर्तते"[3]
"अनावृत्तिशब्दादनावृत्तिशब्दात्"[4]

यमस्मृतौ-

"सत्त्वं वहति सूक्ष्मत्वात्परं नारायणं प्रभुम्।
परमात्मानमासाद्य परं वैकुण्ठमीश्वरम्॥

१- कठो०५
२- गी०७।१८
३- छा०उ०८।१५।१
४- ब्र०सू० ४।४।४।

अमृतत्वाय कल्पते न निवर्तते वै पुनः
यति धर्मगतश्शान्तः सर्वभूतसमो वशी ।
प्राप्नोति परमं स्थानं यत्प्राप्य न निवर्तते[1] ।।

पुरुषः - ओं पुरुषाय नमः

पुरु बहु सनोतीति (पुरुषः) सनोतेः दानकर्मणः ।

'अन्येष्वपि दृश्यते'[2] इति डः 'षणु दाने' धातोः मुक्तेभ्योऽपि वाङ्मनसा परिच्छेदनगुण विभवस्वानुभवम् ददाति हि भगवान्, यथा-

'दिव्येन चक्षुषा रममाणः'[3]

निरुक्ति-

मुक्तेभ्यस्स्वात्मपर्यन्तदानात् पुरुषः ईरितः ।

१- हारीतः
२- पा०अ० ३।२।१०१
३- छा०उ० ८।१२।३।

साक्षी- ओं साक्षिणे नमः

"रसो वै सः रसं ह्येवायं लब्ध्वा नन्दी भवति"[१]

"तद्धेतुव्यपदेशाच्च"[२] इति

एवं तानानन्दयन्, स्वयमपि तृप्यन साक्षात्करोतीति साक्षी ।

निरुक्ति-

स्वयमानन्दयन तृप्यन् साक्षी साक्षात्करोति सः

क्षेत्रज्ञो - ओं क्षेत्रज्ञाय नमः

साक्षाद्द्रष्टरि संज्ञायाम्[३] इति इनिः विशिनष्टि हि मुक्तप्राप्यम् ।

"ब्रह्मणा विपश्चिता"[४] इति

विविधं पश्यच्चित्त्वं हि विपश्चित्त्वम् ,

इत्थं तेभ्यः स्वानुभवं दातुं तदेकान्तं क्षेत्रं जानातीति क्षेत्रज्ञः ।

१- तै० ७ १

२- ब्र०सू० १।१।१५

३- पा०अ० ५।२।९१

४- तै०आ० १।१।२

"धातो नुपसर्गे कः"[1] इति कः स्वभोगसमृद्धि समुद्भवभूमित्वात्, क्षेत्रं परमव्योम्, तादृशशरीरत्वाद्वा, यथा-

"आकाशशरीरं ब्रह्म"[2]

"मुक्तानां तु गतिर्ब्रह्मन् क्षेत्रज्ञ इति कल्प्यते"[3]

तद्धि मुक्तानां भगवदनुभवस्थानम् ,

अव्यक्तो क्षर इत्युक्तस्तमाहुः परमां गतिम्
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम् ।।[4]

"तन्मोक्षास्तत्परं तेजो विष्णोरिति विनिश्चयः"[5]
श्रीवाराहे आस्त्यम् प्रति भगवान् -

यमाहुः सर्वभूतानां प्रकृतिं ध्रुवाम् ।
अनादिनिधनं देवं प्रभुं नारायणं परम् ।
ब्रह्मणः सदनात्तस्य परं स्थानं प्रकाशते"[6] ।

१- ३।२।३ पा०सू०

२- तै० ६।२

३- भा०मो०

४- गीता

५- ब्रा०

६- भा०आ०प०

श्रीहरिवंशे वैदिकपुत्रानयने भगवान्,

ब्रह्मतेजोमयं दिव्यमाश्चर्यं दृष्टवानसि ।
अहं स भरतश्रेष्ठ मत्तेजस्तत्सनातनम् ।
प्रकृतिस्सा मम पराव्यक्ताव्यक्ता च भारत ।
तां प्रविश्य भवन्तीह मुक्ताभरतसत्तम् ।।
सा सांख्यानां गतिः पार्थ योगिनां च तपस्विनाम् ।
तत्परं परमं ब्रह्म सर्वं विभजते जगत्[१] ।।

'क्षि अववोधने, क्षि, क्षये, क्षि निवासगत्योः, धातोः

निरुक्ति-

क्षेत्रतुं परमव्योम मुक्तेभ्यो वेत्ति नित्यशः ।
दातुं स्वानुभवं यश्च क्षेत्रज्ञः स तु कथ्यते ।।

अक्षराय नमः - अक्षरः स्व च

१- भा०हरि०

योगी - ओं योगाय नमः

यस्यैव निरुपाधिकमुक्त्युपायत्वमपि वक्ति, योगः
युज्यते प्राप्यते अनेनेति

'अकर्तरि च कारके संज्ञायाम्'[1] इति घञ् एवम् अमोघः, कर्षः
इत्यादीनि घञन्तानि साक्षायुज्यस्यानन्यापेक्षः साक्षाद्धेतुरित्यर्थः।

निरुक्ति-

उक्तं हि मुक्तप्राप्यत्वमथोपायत्वमुच्यते ।
साक्षान्मोक्षैकहेतुत्वात् योग इत्यभिधीयते ।।

योगविदांनेता- ओं योगविदांनेत्रे नमः

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।।[2]

इति व्यवहितोपायनिष्ठानामपि योगविदांनेता
ज्येतस्तृच्,
भर्ता, धाता इत्यादयोऽपि तृजन्ताः फलपर्यन्तनिर्वाहकः
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि नचिरात्पार्थ मय्यावेशितचेतसाम्[3] ।।

१- पा०अ० ३।३।१९

२- गीता १८।६६

३- गीता १२।७

प्रधानपुरुषेश्वर:- ओं प्रधानपुरुषेश्वराय नम:

संसारपारंपरमोप्समानैराराधनीयो हरिरेक एव

वेदान्तविज्ञानसुनिश्चितार्था: संन्यासयोगाद्यतय: शुद्धसत्त्वा:।
ते ब्रह्मलोकेषु परान्तकाले परामृता: परिमुच्यन्ति सर्वे[१] ।।

इदमेवोपपाद्यते प्रधानपुरुषेश्वर:
प्रधानस्य - बन्धहेतो: पुरुषाणां च
बध्यमानानां सर्वथा नियामक:

"ईशभाव-"[२] इत्यादिना वरच् एवं स्थावर: यथा,

"संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तंभरते विश्वमीश: ।
अनीशश्चात्मा बध्यते भोक्तृभावात् ज्ञात्वा देवं मुच्यते सर्वपाशै:[३] ।।

एवं ईश्वरो हि स्वमायया जीवानपराध्यते बन्धन, प्रपद्यमानांश्च मुञ्चन् क्रीडितुं प्रभवति,

"देवो देवस्य क्रीडा:" संसार मोक्षस्थिति बन्धहेतु:"

"ईश ऐश्वर्य धातो" "पुर, अग्रगमने धातो:"

निरुक्ति-

बन्धहेतो: प्रधानस्य बध्यमाननृणां च य:
नियामकस्सर्वदा स प्रधानपुरुषेश्वर: ।।

१- मु०उ० ३।२।६

२- पा०अ० ३।२।१७५

३- श्वे०उ०१।८

नारसिंहवपुः- ओँ नारसिंहवपुषे नमः

श्री विष्णुतत्त्वे

"पराभिध्यानात्तु तिरोहितम् ततो ह्यस्य बन्धविपर्ययौ"[1]

"देहयोगाद्वासोऽपि"[2]

इति च सूत्रे ताच्छील्यविषयेण वरचा तत्त्वत्रयभेदः ईश्वरेशितव्यभावश्च अनौपाधिको ज्ञाप्यते, स्वभक्त्यन्तरायनिवारणमपि प्रदर्शयति नारसिंहवपुः ।

भक्तभयापहृतदपेदातिसमदाणप्रतिपन्नयथाकामदिव्यमहानृसिंहसंहननः

योरनः दीर्घः संहितायाम्, "आद्गुणः" स्वभक्त्यन्तरायनिवारणमपि प्रदर्शयति, नारसिंहं, नरसिंह सम्बन्धिवपुः शरीरम् अस्येति नारसिंहवपुः ।

"डुवप" बीज सन्ताने धातो

निरुक्ति-

नरवत् सिंहवद्रूपं यो बिभर्त्यभयप्रदम् ।
यथाकामं तु भक्तानां नारसिंहवपुश्च सः ।।

१- ब्र०सू० ३।२।४
२- ब्र०सू० ३।२।५

श्रीमान् - ओँ श्रीमते नमः

अतः परस्परवुर्घटापूर्व विकृतरूप परिग्रहादपि(श्रीमान्) सौन्दर्यलावण्यादिभिरतिमनोहरदिव्यरूपः तत्र,नृसिंहत्वयोः सुघटितत्वम् पश्यताम्,शुद्धिमदन्यन्नृमात्रं सिंहमात्रं वा दृष्ट्वा जुगुप्सा जायेतापि तादृग्रूपपरिग्रहमात्रेणैव हि जगत् त्रातम् ।

"दंष्ट्राकरालं सुरभीतिनाशनं कृत्वावपुर्दिव्यनृसिंहरूपिणा। त्रातं जायेन" इति

श्रिञ् सेवायां धातौ

शंकरभाष्य-

यस्य वक्षसि नित्यं वसति श्रीः स श्रीमान् ।

निरुक्ति-

विरुद्धाकारवत्त्वेपि (श्रीमान्) सर्वमनोहरः ।

<u>केशव:</u> - ओं केशवाय नम:

<u>पुरुषोत्तम:</u>- ओं पुरुषोत्तमाय नम:

एवंविधैश्वर्यसौन्दर्यकान्तलक्षणान्युपलक्षयति(केशव:)
प्रशस्तस्निग्धनीलकुटिल कुन्तल:

एवंविधसौन्दर्यैश्वर्योपलक्षका लक्ष्यन्ते,तत्र सौन्दर्योपलक्षका: प्रशस्ता: केशा: यस्य सन्ति यस्मिन्वेति(केशव:)

क्लिश,उपतापे, क्लिश,विबाधनेवा धातो
क्लिशेरन् लोलोपश्च उणादि:
केशाद्वो न्यतरस्याम[1]

इति प्रशंसायां व: सालक्षण्यप्रसक्त्या परमं वैलक्षण्यमाह (पुरुषोत्तम:) अचेतयमाना व्यक्ताव्यक्तरूपा प्रकृति: व्यावर्त्यते (उत्) इत्युत्कृष्टवाचितया बद्धा: सामर्थ्यप्राप्तेन तरपा मुक्ता: (तम) पा नित्यमुक्ता: सूर्यानन्तवैनतेयादय: इदं च तेभ्यो वैलक्षण्यम् अवधप्रतिभटतया व्यापनभरणाद्युपकारै: स्वाम्येन च स्वभावत् स्वोत्कर्णात्, इदं हि बहुभिस्तात्पर्यलिङ्गै: परमं गुह्यमगायत् ।

१- पा०अ० ५।२।१०९

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते"[1]।।

"भूमिरापोऽनलो वायुः"[2]

इत्यादि वहिनदं परं द्रष्टव्यम् अत्रापि भोक्तृभोग्यनियन्तृणामत्यन्तभेदस्स्पष्टः, अतः ब्रह्मपरिमाणपक्षश्च प्रतिक्षिप्तः, ब्रह्मणः सर्वविकारस्य ब्रह्मसंसारस्येश्वरातिरिक्तब्रह्मसद्भावस्याव्यक्तमुक्तेश्वराणां ब्रह्मणि प्रलयोत्पादयोश्चाभ्युपगमो हि यथोक्तपुरुषोत्तमत्वेन सर्वेण वेदसिद्धान्तेन च विरुध्यते।

निरुक्ति-

प्रशस्तानन्तक्लेशत्वात् केशवः परिकीर्तितः।
ब्रह्मादिषु पुरुषोऽन्यो यो ह्युत्कृष्टः पुरुषोत्तमः।।

१- गीता १५।१६

२- गीता ७।४

<u>सर्वः</u> - ओं सर्वाय नमः

सर्वं सर्वनिष्ठ्येष्टाप्यनुपेक्षमाणः सर्वं स्वरूपस्थित्यादिभिः स्वनिर्वाह्य तथा शरीरमिवात्मा नुसन्धत्ते: अतः सर्वः सरतेः"

"इण् शीभ्यावन् उणादि:
सर्वनिघृष्व" उणादि: इत्यादिना सरत्यव्यवानित्यर्थो
वन् प्रत्ययः सरतिः। गत्यर्थत्वादवबुध्यर्थः,
"असतश्च सतश्चैव सर्वस्य प्रभवाप्ययः।
सर्वस्य च सदाज्ञानात्सर्वमेनं प्रचक्षते[1]
"येन सर्वमिदं प्रोतम्"[2]

<u>निरुक्ति</u>

चराचरशरीरेषु व्याप्तिमान् <u>सर्व</u> ईरितः।

१- महा०उद्यो० ७०।११

२- तै०ना० ६।५०

शर्वः - ओँ शर्वाय नमः

शिवम् - ओँ शिवाय नमः

स्वशरीरभूतानाम् अशुभमपि शृणातीति -

पूर्ववत्

शुभावहश्च शिवः शङ्० शुभार्थत्वात्

"सर्वनिघृष्वरिष्वलष्वशिव" उणादि इत्यादिना वन प्रत्ययः, हृस्वत्वम्, गुणाभावश्च निपात्यते, यथा-

"मङ्गलं भगवान विष्णु मङ्गलम
मङ्गलानां च मंगलम्"[1]

स्थाणु - ओँ स्थाणवे नमः

"स्थिरत्वात् स्थाणुः"[2]

स्थाणुः तिष्ठते

"स्थाणुः" उणादि तृतीयपादे इति णुः हठानुग्रह इति भावः नहि भावतः स्पर्शः प्रायश्चित्तादिसामान्यधर्मवत्, उपात्तदुरितलोपेण, कारीरी, चित्रा दर्शपूर्णमासादिवत्, देवतान्तरवद्वा, काम्यमानैक कामप्रदानेन वानृणो विरमति, प्रबलैर्वान्तरायैः प्रतिबध्यते हीयते अवह्रियते वा ।

१- महाभा०अनु० १४६।१०

२- शंकरभाष्य

किन्तु अशेषमशिवं संशमय्य अखिलमभिलषितं च बहुसुखं विश्राण्यापि, न जातुचित् विश्राम्यति यथा-

"रत्नपर्वमारुह्य यथारत्नं नरोमुने।
सत्त्वानुरुपमादत्ते यथा कृष्णान्मनोरथान्"[1]।।

"एको बहूनां यो विदधाति कामान्"[2]

निरुक्ति-

स्वयं न विश्राम्यति यः स स्थाणुः परिकीर्तितः।

भूतादि - ओं भूतादये नमः

"अपि च, स्पृहणीयतमत्वात् भूतैरुपादीयते इति-भूतादिः

"उपसर्गाधोः किः"[3] एवं सर्वादिनिधि इत्यादयः

"किं प्रजया करिष्यामो येषां नोयमात्मा"[4]

"उपबृंह्यते च" इत्यादिभिः।

१- वि०ध०७।३

२- श्वे०उ० ६।१३

३- पा०अ० ३।३।९२

४- बृ०उ० ४।४।२२

निधिरव्यय: - ओं अव्ययाय निधये नम:

अत: निधिरव्यय: महालोभेनापद्मनवन्निधेयत्वात् यथा च, 'तयथा हिरण्यनिधिं निहितम्'[१] इत्यादि सर्वदा सर्वथोपजीव्यमानत्वे पि कल्यापि अनुपक्षयात् (अव्यय:) निधिविशेषणमेतत् न स्वतन्त्रं नाम, अन्यथा अव्यय:, पुरुष: इति पौनरुक्त्यात् ।

भावनो- ओं भावनाय नम:

भर्ता- ओं भर्त्रे नम:

प्रभव:- ओं प्रभवाय नम:

भावन: यथा-

परित्राणाय साधूनां विनाशाय च दुष्कृताम्
धर्मसंस्थापनार्थाय संभवामि युगे युगे ।।[२]

किंच तानात्मदानेन तच्छील: पुष्णातीति - (भर्ता)

अयम् अस्य भव: प्रकृष्ट: इति (प्रभव:)

प्रकर्षश्च जन्मन: अनाघ्रातदोषगन्धत्वेन, स्ववेदनमात्रेण सकल-जन्मनिगलनिर्मूलनहेतुत्वेन च देवादिजन्मवैजात्यात् यथा-

---

१- छा०उ० ८।३।२।

२- गीता ४।८

निरुक्ति-

जनित्वोज्जीवयति यो जनान् स्यात् भावन स्तु सः ।
यस्तान् पुष्णात्यात्मदानात् स भर्ता परिकीर्तितः ।
देवादिजनवेजात्यात् प्रकृष्टोत्पत्तिमत्त्वतः
अविद्यादोषवैधुर्यात् प्रभवः परिकीर्तितः ।।

प्रभु - ओं प्रभवे नमः

"अजायमानः"[1]

"तस्य धीराः परिजानन्ति योनिम्"[2]

"नैषगर्भत्वमापेदे न योन्यामवसत्प्रभुः ।
आत्मनस्तेजसाकृष्णः सर्वेषां कुरुते गतिम् ।।[3]

स्वममन्दपरतन्त्रमनुष्यादिसाम्येनावतरन्नपि प्रभुः भवतेः

"भू" सत्तायाम् प्रपूर्वः "विप्रसंभ्यः- " इति बाहुलकात्[4]
संज्ञायामपि डुरिति प्रागप्युक्तमेव डित्त्वाट्टिलोप इत्यादि ।

१- पु०सू० २१

२- पु०सू० २१

३- महा०सभा० ६२।३५

४- पा०अ० ३।२।१८०

निरुक्ति-

ब्रह्मादीनां च सर्वेषां भोगमोक्षसमर्पणे ।
समर्थः प्रभु रित्युक्तः सर्वेष्टफलदो मनुः ।।

ईश्वरः - ओँ ईश्वराय नमः

अतः पारमेष्ठ्यादि जन्मस्वधिकतमप्रयोजनैश्वर्यात्
ईश्वरः यथा

तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप
अजो ऽपि सन्नव्ययात्मा भूतानामीश्वरो ऽपि सन्[1] ।।

जन्मसु पारमेष्ठ्यादपि अधिकतम प्रयोजनैश्वर्यवत्त्वया इति ईश्वरः।

'ईश ऐश्वर्ये धातोः'
'स्थेशभास'[2] इत्यादिना वरच्, नेट ईश्वरः

निरुक्ति-

मनुष्याद्यवतारेऽपि ब्रह्मादेश्च प्रयोजने
नियन्ता(त्वीश्वरः)प्रोक्तः प्राधान्यफलदोमनुः ।।

१- गीता ४।६।
२- पा०अ० ३।२।१७५

स्वयंभूश् - ओं स्वयंभुवे नमः

कुतः इदं सर्वं वैभवम् ? यतः स्वयंभूः

"भुवः संज्ञान्तरयोः"[१] इति क्विप् स्वलीलादिप्रयोजनाय स्वेच्छया स्वासाधारणीम् परमसत्त्वमयीं प्रकृतिमेव सुरनर सजातीयसन्निवेशामधिष्ठाय, स्वयमेव भवतीतिः न चतुर्मुखादिवत् ईश्वरान्तरेण कर्मादिभिर्वा परवत्त्येत्यर्थः यथा-

स्वयंभू ब्रह्मपरमं कवीनाम्
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया[२]।।

निरुक्ति-

भवति स्वेच्छया योऽसौ स्वयंभूः परिकीर्तितः।

१- पा०अ० ३।२।१७९

२- गीता ४।६।

शम्भु - ओं शंभवे नम:

स्वसौन्दर्यधीशीत्यादिगुणाविष्कारेण, शं-सुखं भवति शंभु:
प्राग्वतधातु: -

"डुप्रकरणे मितद्रवादिभ्यउपसंख्यानम्"[1] इति डु: यथा,
"रूपौदार्यगुणै: पुंसां दृष्टिचित्तापहारिणाम्"[2] इत्यादिभि-

निरुक्ति-

सौन्दर्यादिगुणानां बोद्ध्वाविष्कारेण शं सुखं पुंसां सम्यग्भावयति
स शंभु: परिकीर्त्यते ।

आदित्य- ओं आदित्याय नम:

अथैषां प्रादुर्भावानामुदाहरणं पूष्णिपुरुषमाह आदित्य:
आदित्यो वस्य निवास इति ।

"दित्यदित्यादित्य"[3] इत्यादिना ण्य: एवं हि ब्रह्ममीमांसितम्,
"अन्तस्तद्धर्मोपदेशात्"[4] इति

ध्येय: सदा सवितृमण्डलमध्यवर्ती" इत्युदाहृत्यआदित्यान्तरस्य
तस्य यथाकप्यासं पुण्डरीकमेवमक्षिणी"[5] इत्याम्नात् ।

१- पा०अ० ३।२।१८०
२- रा०अ० ३।२८
३- पा०अ० ४।१।८५
४- ब्र०सू० १।१।२१
५- छा०उ० १।६।७

पुष्कराक्षी- ओं पुष्कराक्षाय नमः

सर्वैश्वर्यासाधारणलक्षणं पुण्डरीकाक्षत्वं संगमयति पुष्कराक्षः

'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्'[1] इत्यच् समासान्त

पुष्कर- पुण्डरीकम् अर्थात् तद्वत् अक्षिणी यस्येति पुष्कराक्षः

निरुक्ति-

अक्षिणी पुण्डरीके व भक्तानुग्रहकारिणी ।

यस्यासौ पुष्कराक्षः स्यादष्टवर्णस्तु पावकः ।।

महास्वनः -ओं महास्वनाय नमः

तस्यैव चिह्नान्तरं च सूचयति -महास्वनः

महान्- पूज्यः स्वन शब्दः यस्येति, 'आन्महतः'[2] इत्यादिना आत्वम् आमनन्ति हि, 'तस्योदितिनाम'[3] इति तस्यैतस्य नामरुपं सशब्दम् ।

इति त्रयीरुपं वा पूज्यतमं सावित्रीप्रतिपाद्यतया वा वतो हि मोक्षधर्मेषु ।

'विद्यासहायवन्तं माम् आदित्यस्थं सनातनम्'[4]

१- पा०अ० ५।४।७६

२- पा०अ० ६।३।४६

३- छा०उ० १।६।७

४- मा०मो०

निरुक्ति-

महान् पूज्यस्त्रयीरूप: स्वनो यस्य महास्वन:

अनादिनिधनो- ओं अनादिनिधनाय नम:

एतद्दिव्यनामरूपविशिष्ट एव- अनादिनिधन: । नित्ययौवनतया जनिजरादिदुरितदूर नित्यविग्रह: नतत्स्वरूपनित्यत्व परमेतत्, तस्य चतुर्मुखादीनामपि तुल्यत्वात्,

"आदिनिधने आद्यन्तौ अस्येति अनादिनिधन:

"आदित्यवर्णं तमस: परस्तात्"[1]

"रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परम्"[2]

निरुक्ति-

यस्यादिनिधनं नास्ति अनादिनिधनश्च स:
अनादिनिधनोपास्यो नित्ययौवनविग्रह: ।

१- पु०सू० २०

२- मनुस्मृति १२।१२८

धाता- ओं धात्रे नम:

कारणत्वेनापि ब्रह्मादिभ्यो वैलक्षण्यमाह (धाता)तून् एवं भर्ता इत्यादय: ।

अनिरुद्धस्वरूप:, सर्वयोनावचित्समष्टिभूतायां प्रकृतौ चित्समष्टिभूतं विरिन्चात्मकं गर्भं दधातीति, यथा-

मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् ।
संभव: सर्वभूतानां ततो भवति भारत[१] ।।

मौत्स्यंहितायाम्-

"धाता क्षेत्रे कर्मबीजभूतं गर्भं दधाति" इति

निर्वचन्-

कारणत्वेनापि ब्रह्मादिभ्यो वैलक्षण्यमुच्यते, अचित्समष्टिभूतायां प्रकृतौ, चित्समष्टिभूतं विरिन्चाख्यं गर्भं दधातीति धाता ।

विधाता- ओं विधात्रे नम:

तं गर्भं परिणमय्य आविर्भावयतीति च विधाता

"यो ब्रह्माणं विदधाति पूर्वम्[२]" इति

१- गीता १४। ३

२- श्वे०उ० ६। १८

"तस्माद् विराडजायत"[१]

"डुधाञ् धारणपोषणयोः" धातो जुहोत्यादिः

तृन्नादि अनिट्

तं गर्भं परिणमय्य विदधाति आविर्भावयतीति च विधाता पूर्ववत् धातुः विपूर्वः तद्वत् तृन्नादि

निरुक्ति-

तद्गर्भपरिणामे स्यादाविर्भावयिता स्वयम् ।
धारणात्लोल्या यस्मात् विधाता यं प्रकीर्तितः ।

धातुरुत्तमः - ओं धातुरुत्तमाय नमः

अतः धातु- स्रष्टा: उत्तमः उत्कृष्टतमः किंपुनस्तत्सृष्टेभ्य इति धातुरुत्तमः उत्शब्दात् उत्कृष्टवाचिन आतिशायनिकस्तमप्, तत्वम् , दण्डापूपिकया तत्सृष्टेभ्यः प्रजापतिप्रभृतिभ्यश्च, यथा-

"तत्त्वं नारायणः परः"[२]

परो नारायणो देवः तस्माज्जातश्चतुर्मुखः" वाराहे इत्यादि ब्रह्मरुद्रसंवादयज्ञाग्रहरणादाविदम् स्पष्टम् -

निरुक्ति-

यो वैल्याद्धातुरुत्कृष्टः स च स्यात् धातुरुत्तमः ।

१- पु०सू० ५

२- तै० ६।११

अप्रमेयो - ओं अप्रमेयाय नमः

तेषां करणैः प्रमातुमशक्यः अप्रमेयः

'ईयति'[1] इति इकारः यथा-

'यं नाथं भगवान ब्रह्मा जानाति पुरुषोत्तमम्'

स्वयं च ब्रह्मा -

तवान्तरात्मा मम चाये चान्ये देहिसंज्ञिताः ।

सर्वेषां साक्षिभूतोसौ न ग्राह्यः केनचित्क्वचित्[2] ।

इति अतीन्द्रियत्वात्, अकृत्स्नग्रहणत्वाच्च अप्रमेयत्वमेष्वेव वचनेषु स्फुटम् ।

हृषीकेशः - ओं हृषीकेशाय नमः

तत्करणानामपि नियामकत्वात् हृषीकेशः यथा, श्रीहरिवंशे-
'हृषीत्सौख्यात् सुखैश्वयात् हृषीकेशत्वमश्नुते' इति वा

निरुक्ति-

इन्द्रियाणां नियन्तृत्वात् हृषीकेशः प्रकीर्तितः ।

१- पा०अ० ६।४।६५

२- महाभा०मो० १७९।४

पद्मनाभो - ओँ पद्मनाभाय नमः

उक्तं हि सर्वं व्यनक्ति पद्मनाभः, पद्मनाभः प्रभवः पद्मो नाभावस्येति ।

"अच्प्रत्यन्ववपूर्वात्[1]" इत्यत्र योगविभागात् अच् यथा -

"वातोवानः संविशति पन्चवर्षशतानि तु"

"धातुनाभ्यां पुष्कर प्रादुर्भवति पुष्करं पुण्डरीकं च पद्मं नकामित्येष कालः"

निरुक्ति-

कालात्मकं तु यत्पद्मं नाभौ यस्य स उच्यते,
पद्मनाभश्चाष्टवर्णो महासन्तानदो मनुः ।।

अमरप्रभुः - ओँ अमरप्रभवे नमः

अमराणां सृष्ट्याधधिकारदानेन निर्वाहकश्च अमरप्रभुः

महाभारते-

एतौ द्वौ विबुधश्रेष्ठो प्रसादक्रोधजौ स्मृतौ[2] ।
तदादर्शितपन्थानौ सृष्टिसंहारकारकौ ।।

१- पा०अ० ५।४।७५
२- भा०मो० ३६९।१६

विश्वकर्मा - ओं विश्वकर्मणे नमः

ब्रह्मसृष्टेः प्राक् ऊर्ध्वं च विद्यमानं विश्वं कर्म जगद्व्यापारोऽस्यैवेति

यथा- "विश्वकर्मणस्समवर्तताधि"[1]

"विश्वकर्मसूक्ते स्पष्टं द्रष्टव्यमिति, विश्वकर्मत्वं च ।

"आत्मा वा इदमेक एवाग्र आसीनान्यत्किंचन मिषत् । स ईक्षत् लोकान्नुसृजा इति ।[2]

"स सिसृक्षुः स्वप्रांशादसृजत पुरुषं द्विधा"

"कामाच्च नानुमानापेक्षा"[3]

निरुक्ति-

विश्वस्य जातः कर्म व्यापारो यस्य लक्षणम् ।
प्राक् ब्रह्मसृष्टेरुर्ध्वं च विश्वकर्मेति कथ्यते ।।

१- पु०सू० १६

२- ऐतरे० १।१

३- ब्र०सू० १।१।१८

मनु: - ओं मनवे नम:

त्वष्टा:-ओं त्वष्ट्रे नम:

प्रसिद्धात् संकल्पत्वमात्रात् मननादेवेति मनु: ।

"मन,ज्ञाने" धातो दिवादि

"शृस्वृ स्नि हित्रप्य सिव सिह नि किल दिव न्धिम निम्य उ:" उणादि प्रथम पाद: ।

एवं निर्मितं नामरुपव्याकरणेन सुरनरादिवैचित्र्य विभक्तं व्यनक्ति:,अत: त्वष्टा त्वक्षतेस्तनूकरणकर्मणि स्तृच् ।

"स्कोस्संयोगाद्योरन्ते च"[1] इति ककारलोप: तनूकरणं व्यक्तावयवीकरणम् त्विषेर्वा दीप्तिकर्मण: ।तृन्,उपधाया: अत्वं च निपात्यते ।

"त्विषेर्देवतायामकारश्चोपधाया अनिट्त्वम् च"[2] इति वा निपात: दीपनं प्रकाशनम्,अवयवोन्मीलनमित्यर्थः यथा-

"नामरुपभूतानां कृत्यानां च प्रपञ्चनम्"[3] इत्यादि

"सर्वाणि रुपाणि विचित्यधीर:"[4]

निरुक्ति-

संकल्पत्वमात्राच्च मननात् मनु रुच्यते ।

नामरुपव्याकरणात् त्वष्टा सृष्टस्य गद्यते ।

१- पा०अ०८।२।२९
२- पा०अ०३।२।१३५
३- वि०पु० १।५।६३
४- पु०सू० १६

स्थविष्ठः - ओं स्थविष्ठाय नमः

स्थूलतमः स्थूलशब्दात् इष्ठन् "स्थूलदूर"[1] इत्यादिना यणादिलोपः पूर्वस्य च गुणः ।

सो कामयत बहुस्यां प्रजायेयेति[2]

इति यथासंकल्पं बहुभवन्, सूक्ष्माव्यक्तसमष्टिकारणपर्वणिभोक्तृ-रसुरतिर्यक्स्थावरकरणकलेवरतद्गोचरशब्दस्पर्शादितदास्पद चतुर्दशभुवन-ब्रह्माण्डतदावरणरूपस्थूलव्यक्तव्यष्टिकार्यविस्तारवान् जायत इत्यर्थः यथा-

तेषामेवानुकम्पार्थमहमज्ञानजं तमः
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता[3] ।।

स्थविरो - ओं स्थविराय नमः

संकल्पमूलकारत्वेपि लौकिकमृदादिकारण वैलक्षण्यं विवक्षति स्थविरः तिष्ठतेः ।

"अजिर शिशिर" उणादिप्रथमपादः इत्यादिना किरच् प्रत्ययः, ह्रस्वत्वं तुगागमश्च निपात्यते, सकलं कालं स्थानुः लील्या कालमपेक्षमाणोपि अतचन्त्रः अनेन कालविशेषापेक्षपरिणामदुग्धदध्यादिवैलक्षण्यं विवक्षितम् कालस्यापि सर्वात्मना तादधीन्यात्, यथा-

---

१- पा०उ० ६।४।१५६

२- तै०ब्र० ६ अनुवाकः

३- गीता १०।११

कालस्य च हि मृत्योश्च जङ्गमस्थावरस्य च ।
ईशिता भगवानेकः सत्यमेतद्ब्रवीमि ते ।।

कालचक्रं जगच्चक्रं युगचक्रं च केशवः
आत्मयोगेन भगवान् परिवर्तयते निशम् ।।

निरुक्ति-

कालातन्त्रतया दुग्धदध्यादिभ्यो विलक्षणः ।
विद्यते यस्सर्वकालं स्थविरः परिकीर्तितः ।

ध्रुवः - ओं ध्रुवाय नमः

अनन्तपरिणामादप्यविकुर्वाणतया स्वरूपादप्रच्याव्यः ध्रुवः ।

"ध्रु, गतिस्थैर्ययोः" धातु

"नुदादिभ्यो णत्को, इति कः एवं गुहः वृणः निमिणः इत्यादयोऽपि कप्रत्ययान्ताः यथा-

"अव्ययश्शाश्वतो ध्रुवः"[१]
"अविकाराय शुद्धाय"

१- वि०पु० १।२।१

निरुक्ति-

"अपृच्छाव्यस्वरूपात् सदा यो सो ध्रुवः स्मृतः"

अग्राह्यश - ओं अग्राह्याय नमः

मृदन्त्वादिखि कुलालकुविन्दादिना अनधिष्ठेयः अग्राह्यः

"ऋहलोर्ण्यत्" [१] इति ण्यदन्तः एवं वेपः मान्यं इत्यादयो पि यथा-

यो योनिं योनिमधितिष्ठत्येको यस्मिन्निदं सं च विचैति सर्वम् [२]।

निरुक्ति-

अग्राह्यो यो नधिष्ठेयो मृदिवैव कुलालकैः"

शाश्वतः - ओं शाश्वताय नमः

शाश्वतः अनवरतजगद्व्यापारप्रवाहत्वेन नित्यः यथा,

"अव्युच्छिन्नास्तस्त्वेते सर्गस्थित्यन्तसंयमाः" [३]

१- पा०अ० ३।१।१२४

२- श्वे०उ० ४।११

३- वि०पु० १।२।२६

कृष्णा - ओं कृष्णाय नमः

लोहिताक्षः- ओं लोहिताक्षाय नमः

विषलीलारसेन नितान्तनिर्वृतः कृष्णः आर्षनिरुक्तम् -

'कृषिर्भूवाचकशब्दो णश्च निर्वृतिवाचकः ।
कृष्णस्तद्भावयोगाच्च इति -[1]

इह० निर्वृतिपिशुनरम्यराजीवताम्रनयनः लोहिताक्षः

निरुक्ति-

रक्तराजीवनयनो लोहिताक्षः प्रकीर्तितः ।

प्रतर्दनः - ओं प्रतर्दनाय नमः

प्रभूतः- ओं प्रभूताय नमः

सर्वेषां संहर्तृत्वं चाह- प्रतर्दनः तर्हिः हिंसाकर्मा यथा-

'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः'[2]
'अत्ता चराचरग्रहणात्'[3] इति

१- महा०उ० ६८।५

२- कठोपनि० २।२४

३- ब्र०सू० १।२।९

सर्वसंहारेऽपि-

प्रभूतः समृद्धः नित्यनिर्मर्यादिभोगोपकरणपरमपदत्वात्, तत्र परमाणुमात्रं हि सृष्टिसंहारगोचरमिदं विश्वम् तदेतत् स्पष्टयति-

निरुक्ति-

भोगोपकरणं नित्यं निर्मर्यादं परं पदम् ।
यस्य तेन समृद्धत्वात् प्रभूत इति कथ्यते ।।

त्रिककुद्धाम् -

त्रिककुद्धामा इति त्रिककुब्धामा इति केचित् । उभयथापि अवयवा लक्ष्यन्ते त्रिककुप् त्रिपाद्विभूतिलक्षणं, परमं धाम यस्य सः त्रिककुद्धामा आम्नायते हि ।

'पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि'[1] इति त्रिपाद् पादः इति परममहत्वपरमाणुपरिमाणौ व्याख्यातौ -

तथैवासं त्रिककुदो वाराहं रूपमास्थितः ।
त्रिककुत् तेन विख्यातश्शरीरस्य प्रमापणात्'[2] इति

अस्मिन् पक्षे, धाम इति नामान्तरम्, ज्योतिरिति चार्थः ।

निरुक्ति-

त्रिपाद्विभूतिस्त्रिककुत् सैवस्थानं विशेषतः यस्य स त्रिककुद्धामा ।

१- पु०सू०

२- महाभा०मो० ३४३-९३

पवित्रम् - ओं पवित्राय नम:

मङ्गलं परम् - ओं परस्मै मङ्गलाय नम:

ईदृग्गुणविभवरूपकलापोपानेन तन्निरूप्यम् स्वरूपमनुप्रविशति- पवित्रम् पूर्व:

"अशिता दिभ्यश्चत्रौ" इतीत्रप्रत्यय: उणादि

"कर्तरि चर्षिदेवतयो:"[1] इति वा

निरुक्ति-

गुणस्वविभवानां च रूपस्य च निरन्तरम् ।
निरूपकस्य सर्वैश्च तन्निरूप्यम् स्वरूपकम् ।
अनुप्रविश्य वसति तत् पवित्र मिति स्मृतम् ।।

समस्तहेयप्रत्यनीकं मंगलपरम्

"मङ्गिगत्यर्थ: "मङ्गेरलच्" उणादि

स्वयं प्रानन्दतया कल्याणैकतानम् परम् इति आनन्त्यपरम् सत्यपि नैसर्गिक नित्यनिरवधिकनिस्सीमनिस्संख्यस्वगुण विभवानुभववैभवे- सदातने, स्वतस्व अक्षीणदोषपरिपन्थिशान्तानन्तानुपमानकूलतमस्वयं - प्रमात्मानुभवनिबन्धननिरङ्कुशानन्दन्यक्कृत निरस्तरङ्गस्तिमितामृतमहोदधि- न्यायया परावस्थयैव सर्वनिरपेक्षो नित्यतृप्तश्चेति, शक्यनिरूपणो भगवान् न्यरूपि च।

१- पा०अ० ३।२।१८६

"आनन्दमयोऽभ्यासात्"[1]

"आनन्दादय: प्रधानस्य"[2]

इत्यादौ अवादि च,

"आनन्दो ब्रह्म"[3]

निरुक्ति-

सर्वैश्वर्यप्रत्यनीकमनन्तानन्दलक्षणम् ।
वेदान्तपारगं नित्यमुच्यते मंगलपरम् ।।

ईशान: - ओं ईशानाय नम:

निर्मोलदुन्मीलदीशस्वरूपैश्वर्यविजमुक्तनित्येभ्यो स्वव्यावृत्ति: कीर्त्यते ईशान: ।

"ताच्छील्य"[4] इत्यादिना चानश् सर्वविस्थस्वपरसमस्तवस्तुव्यवस्थापनस्वभाव इत्यर्थ: यथा-

"तमीश्वराणां परमम्महेश्वरम्"[5]

"यईशो स्य जगतो नित्यमेव नान्यो हेतुर्विद्यते ईशनाय"[6]

१- ब्र०सू० १।१।१२

२- ब्र०सू० ३।३।११

३- तै०भृ० ६।२

४- पा०अ० ३।२।१२९

५- श्वे०उ०६।७

६- श्वे०उ०६-१७

"स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूतानां राजा"[1]

निरुक्ति-

सर्वावस्थासु सर्वेषां व्यवस्थापनशीलतः ।
वस्तूनां भगवान् साक्षात् ईशानः परिकीर्तितः ।।

प्राणदः - ओं प्राणदाय नमः

अस्यैश्वर्यस्य प्रथमं विषयं विवक्षति- प्राणदः

प्राणं ददातीति कः सूरिभ्यस्सदा दर्शनरूपस्वानुभवपरिचरणानुकूलबलद् इति भावः यथा-

"य आत्मदाबलदाः"[2]

निरुक्ति-

सूरिभ्यः परिचर्यादौ बलदः प्राणदः स्मृतः

१- बृ०उ० ४।४।१५
२-का० १ पृ०उ० ८

प्राणो - ओं प्राणाय नमः

तेषाम् - प्राण: उज्जीवनहेतुश्च, यथा

"प्राणसाधानुगमात्"[1]

अत्रोभयत्र निपुणोन्येयान्युदाहरणानि-

"अथैनमेते देवा:प्राणा अमृता आविशन्ति"

"तदेतदक्षरं ब्रह्म सप्राणस्तदुवाङ्मनः"[2]

निरुक्ति-

उज्जीवनस्य हेतुत्वात् नराणां प्राण ईरितः

ज्येष्ठः - ओं ज्येष्ठाय नमः

ज्येष्ठः (प्रशस्यशब्दादिष्ठनि)

"ज्य च"[3] इति ज्यादेशः स्वैन सूरिभिश्च सर्वदा सर्वथानुभावेपि अदृष्टपारमहाविभूतित्वेन प्रशस्यतमः यथा-

"भगवान् वासुदेवो ज्यायसो विभूतिः" इति

निरुक्ति-

सर्वदानुभवेप्येतैरदृष्टापारभूतितः ज्येष्ठः

१- ब्रह्मसू० १।१।२८ ३- पा०अ० ५।३।६१

२- मु०उ० २।२।२

श्रेष्ठः - ओँ श्रेष्ठाय नमः

तैस्सदानुभवप्रीत्या स्तोत्रैः परिचर्यमाणः श्रेष्ठः

निरुक्ति-

श्रेष्ठश्च तैर्नित्यं स्तुतत्वादभिधीयते ।

प्रजापतये नमः - प्रजापतिः

बद्धमुक्तेभ्यः प्रकृष्टतया जायन्ते भवन्तीति प्रजाः,सूरयः यथा

"यमन्तस्समुद्रे कवयो वयन्ति तदक्षरे परमे प्रजाः"[1]

"अधिरीश्वरे"[2]

"यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी"[3]

"सदा पश्यन्ति सूरयः"[4]

१- तै०उ० ६।२।३

२- पा०अ० १।४।९७

३- पा०अ० २।३।९

४- पु०सू० १४

'मध्ये वामनमासीनं विश्वेदेवा उपासते'[1]

इत्यादिभिः श्रूयमाणाः - तेषां पतिः स्वामी नित्यपरिचरणीयः उचितेन देशेन विशिनष्टि: -

निरुक्ति-

वेदादुत्कृष्टतो ये च जायन्ते सुरयः प्रजाः
तेषां यो नित्यसूरीणाम् पतिस्स स्यात् प्रजापतिः ।

हिरण्यगर्भः - ओं हिरण्यगर्भाय नमः

निर्दोषनिरवनित्यपरसत्त्वात्मकब्रह्मविशेषत्वेन हिरण्यसाम्यात् हितं, रमणीयमिति वा (हिरण्यम्) परमं धाम तस्य गर्भभूतः तत्र नित्यवासात् तद्विषये हि श्रूयते -

'हिरण्मये परे लोके विरजं ब्रह्मनिष्कलम् ।
तच्छुभ्रं ज्योतिषां न तत्र सूर्योभाति'[2] इत्यादि

निरुक्ति-

हिरण्यं परमं धाम हिरण्यस्य समानतः
हिरण्यगर्भः स प्रोक्तस्तस्मिन् वसति यस्सदा ।।

१- कठो० २।५।३

२- मु०उ० २।२।१०

भूगर्भो माधवो

भू: - भूमि: भगवती श्रीदामाधपरपर्याया, सदानुभवेन भरणीया गर्भभूता यस्येति आमनन्ति हि ताम्

'महीं देवीं विष्णुपत्नीमजूर्याम्'[1]

निरुक्ति-

यस्य भूर्भरणीयाभूत् (भूगर्भो) नुभवेन स: ।

माधव:

माया: श्रिय: धव:- स्वामी श्रिय: पति: यथा,

'अस्येशाना जगतो विष्णुपत्नी'[2]

'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ'[3]

'काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्'[4]

निरुक्ति-

श्रिय: मधादिनाम्नाश्च पतिर् (माधव) इष्यते ।

१- ३ अष्ट० १ प्र० २ व०

२- नील०सू०

३- पु०सू०

४- रा०बा० ४।७

मधुसूदन: - ओं मधुसूदनाय नम:

सर्वनिर्वाहकत्वात् असुरनिरसनादिना निष्प्रतिपक्षाऽऽदमोत्वाच्च मधुम् - असुरं सूदते सूदयति हन्तीति वा - आर्षनिरुक्तानुसारात्,

मधुम् - इन्द्रियं सुरिजनकरणं सूदते सूदयति आत्मन्युपसंहरतीति वा मधुसूदन: ।

नन्द्यादित्वाल्ल्यु: एवं नन्दन: वर्धन:

'सर्वतत्त्वनयनाच्चैव मधुहा मधुसूदन: भारते'[1]

निरुक्ति-

मध्वाख्यमसुरं हन्ति सुरीणां करणं च वा ।
उपसंहरति स्वस्मिन् मधुसूदन इष्यते ।।

ईश्वरो

पूर्ववत् ।

१- उ० ६८।४।

विक्रमी - ओं विक्रमिणे नमः

इच्छाप्रतिहन्तृप्रसक्ति परिपन्थिस्वभावतया, विक्रमः पौरुषम् यस्यास्ति अस्मिन्वेति विक्रमी ।

भूमप्रशंसानित्ययोगाद्यर्थे इनिः यथा,

निरुक्ति-

विक्रमः पौरुषं प्रोक्तः तद्वत्त्वात् विक्रमी बुधैः ।

धन्वी - ओं धन्विने नमः

ईदृशनिरातिशयपौरुषानुरूपं दिव्यं सर्वदिव्यायुधोपलक्षकं शाङ्र्गधनुः धन्व वा शरासनं नित्यमस्यास्तीति- धन्वी आर्षकल्पे।

शाङ्र्गधन्वा हृषीकेशः पुरुषः पुरुषोत्तमः ।
अजितः खड्गधृग्विष्णुः कृष्णश्चैव बृहद्बलः[१] ।।

निरुक्ति-

पौरुषानुगुणं शाङ्र्गं यस्य धन्वी स कथ्यते ।

१- रा०यु० १२०।१५

मेधावी - ओं मेधाविने नमः

निस्सीमनित्यभूमानुगुणसहजसार्वज्ञलक्षणा मेधा नित्यमस्यास्तीति मेधावी ।

विक्रमः - ओं विक्रमाय नमः

विना पक्षिपतिना त्रयीमयेन, क्रमणं तत्र तत्र स्वेच्छाविहारगतागतम् अस्येति विक्रमः ।

तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि ।
तन्नो गरुडः प्रचोदयात्[1]

निरुक्ति-

गमनं पक्षिराजेन यस्य विक्रम उच्यते ।

१- तै०उ०

क्रम: - ओं क्रमाय नम:

अनुत्तमः - ओं अनुत्तमाय नम:

विदुष्या नित्यविभूत्या, क्रमते - स्फोतीं भवतीति क्रम:
क्रमिरात्मनेपदित्वात् तायनार्थः तायनं - स्फोतता,

निरुक्ति-

क्रमणात् क्रमहेतुत्वात् (क्रम) एव उदाहृत: ।

निरस्याधिकतया, नास्त्युत्तम: अस्मादिति अनुत्तम:
उच्छब्दादुत्कृष्टतावाचिन: आतिशायनिकस्तमप्, तत्वम् नञ्पूर्वो बहुव्रीहि:
नञो नलोपे नुट् -

"परं ह्यपरमेतस्मात् विश्वरूपान्न विद्यते"
मत्त: परतरं नान्यत् किञ्चिदस्ति धनञ्जय"[१]

निरुक्ति-

उत्तमो नास्ति यस्मात् स अनुत्तम् उदाहृत: ।

१- गीता ७।७।

दुराधर्ष- ओं दुराधर्षाय नमः

गम्भीर्यातिशयेन अम्भोधिवत् अनभिभवनीयतया आधर्षितुं-प्रधर्षितुमशक्यः अदाम्य इति दुराधर्षः ।

"मनोमयः प्राणशरीरो भारूपस्सत्यसंकल्पः आकाशात्मा सर्वकर्मा सर्वगन्धस्सर्वरसस्सर्वमिदमभ्यात्तो वाक्यनादरः"[1] इति

"गम्भीर परमो देवः"

"महोदधिमिवाधोभ्यम्"

तदनेन प्रघट्टकेन-

"तद्विष्णोः परमं पदम्"[2]

"स्वर्गलोकमागच्छ गतज्वरश्चिरम्"[3]

वैकुण्ठे तु परे लोके श्रिया सार्धं जगत्पतिः ।
आस्ते विष्णुरचिन्त्यात्मा भक्तैर्भागवतैस्सह"

पुराणे वायुप्रोक्तत्वेन श्रीविष्णुतत्त्वे ।

निरुक्ति-

अपाम्निधिवददाम्यः (दुराधर्ष) इतीरितः ।
दुर्विज्ञेयगतिर्यस्मात् (दुराधर्षः) प्रकीर्तितः ।

१- छा०उ० ३।१४।२

२- पु०सू० १४

३-रा०बा० १५।३३

कृतज्ञ:

विसृष्ट यथोक्त निरुपाधिकदास्य निर्ममत्वानामनाथ विधाव्यारोपितस्वातन्त्र्य प्रवृत्तानां संसारिणां कृतज्ञ: आनुकूल्यत्वं जानातीति

"आर्तानुपसर्ग:"[1] कृतज्ञ: प्राणद: इत्यादयोऽप्येवम् य: स्वाह

अपि चेत्सुदुराचारो भजते मामनन्यभाक्
साधुरेव स मन्तव्य: सम्यग्व्यवसितो हि स:[2] ।।

इति न च प्रत्युपकारं पश्यतीदृशी यथा-

"गोविन्देति यदाक्रन्दत् कृष्णा मां दूरवासिनम् ।
ऋणं प्रवृद्धमिव मे हृदयान्नापसर्पति" इति च[3] ।।

निरुक्ति-

प्राणिभिर्यत् कृतं कर्म तज्ज्ञात्वा फलदो यत: ।
पत्रपुष्पादिना तुष्ट: कृतज्ञो मांदादानत: ।।

१- पा०अ० ३।२।३

२- गीता ९।३०

३- महाभा०उ० ५८।२२

कृतिर् - ओं कृतये नमः

तच्च तेषां सुकृतम् अस्मादेव प्रसन्नादिति कृतिः ।

"अकर्तरिचकारके संज्ञायाम्"[1] इत्यधिकारे

"स्त्रियां क्तिन्नन्तः एवं भूति सिद्धिप्रभृतयोऽपि यथा

"एष एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति"[2]

निरुक्ति-

प्रयत्नो वा क्रिया वाथ कृति रुक्ता क्रियावताम् ।

आत्मवान् सुरेशः

तस्य कर्तारोऽप्यात्मानः तदायत्तस्वरूपप्रवृत्त्यादिकतया अस्य स्वभूता इति आत्मवान् ।

"अत् सातत्यगमने" धातोः म्वादि-

निरुक्ति-

एषामात्मशरीरादिनिरासादथवा आत्मवान् ।
स्वे महिम्नि प्रतिष्ठनात् आत्मवान् अभिधीयते ।।

१- पा०अ० ३।२।१६

२- कौषीतकी ब्रा० ३।८।

फलपदलिप्सूनामपि ब्रह्मादीनां सुराणाम् ईशः संविधाता इति सुरेशः यथा ब्रह्मा,

यस्य प्रसादादहमच्युतस्य मतः प्रजासर्गकरोऽन्तकारी ।
क्रोधाच्च रुद्रः स्थितिहेतुभूतः[१]

निरुक्ति-

ब्रह्मादीनां फलपदलिप्सूनां त्रिदिवौकसाम्
संविधाता सुरेशश्च प्रोच्यते विबुधोत्तमैः ।।

शरणम् - ओं शरणाय नमः

अविशेषेण सर्वेषाम् शरणम् शृणाति रक्षणार्थाल्ल्युट एवं करणम् कारणम् प्रमाणम् भावनः इत्यादयोऽपि निरुपाधिकः प्रापकः यथा-

"तं ह देवमात्मबुद्धिप्रसादं मुमुक्षुर्वै शरणमहं प्रपद्ये"[२]

निरुक्ति-

आर्तानामार्तिहन्तृत्वात् शरणं परिकीर्तितः ।
यदुपासाद्भयं दुःखं पापं बन्धो न बाधते ।
प्रतिष्ठा च सुखं ज्ञानं भवेत् शरणमित्यतः ।

१- वि०पु० ४।१।८५

२- श्वे०उ० ६।१८

शर्म - ओं शर्मणे नम:

विश्वरेता: - ओं विश्वरेतसे नम:

शर्मसुखं, परमप्राप्यं चेति - शर्म

तस्मादेवसुखार्थात् मनिन् यथा-

"सर्वगन्धस्सर्वरस:"[1]

"कं ब्रह्म खं ब्रह्म"[2]

निरुक्ति-

परमानन्दरुपत्वात् शर्म हिंसादिमन्थनात्

विश्वं कार्यमस्येति सहि स्वज्ञानस्थानपरिचरणसामर्थ्येन प्रजानां ज्ञानकर्मेन्द्रियादिकं विश्वं करोति यथा,

"एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च ।

खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी"[3]

निरुक्ति-

विश्वं रेतो भगवतो विश्वरेता हरि: स्मृत:

ज्ञानेन्द्रियादिकं विश्वं परिचर्यार्थमेव हि ।

१- छा०उ० ३।१४

२- छा०उ० ४।१०।५

३- मु०उ० २।१।३

प्रजाभव: - ओं प्रजाभवाय नम:

सर्वा: प्रजा: तदीस्तैरेवोपकरणै: तस्मिन् भवन्ति तदाभिमुख्ययोग्या-भवन्तीति प्रजाभव: अधिकरणे -

"पुंसिसंज्ञायांघ: प्रायेण"[1]

इति घ: एवम् आश्रम: नियम: यम: इत्यादय:

निरुक्ति-

तदीयैरेवकरणैस्तस्मिन्नभिमुखा: प्रजा: ।
सर्वाश्चैव भवन्तीति प्रजाभव उदाहृत: ।।

अहस् - ओं अह्ने नम:

मौलनिरुक्तानुसारात् न हीनो स्येति वा- अनाद्यविद्यानिद्रावधो स्वावबोधहेतुत्वात्, अह: दिवस इवेति वा-

निरुक्ति-

न सन्ति हीना यस्येति अह स परिकीर्तित: ।
अनाद्यविद्यानिद्रायां स्वबोधहेतुतया ह्यह: ।।

१- पा०अ० ३।३।११८

संवत्सरः

एवम् प्रबुद्धेषु समुद्धरणाय संवसतीति संवत्सरः वसे "संपूर्वाच्चित्" इति सरन्प्रत्यय:

"सस्यार्धधातुके"[1] इति तकार: यथा-

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥[2]

आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया"[3] इति

निरुक्ति-

इत्थं तेषु प्रबुद्धेषु वसत्युद्धरणाय यः संवत्सरः

व्यालः - ओं व्यालाय नमः

प्रत्ययः - ओं प्रत्ययाय नमः

अभयप्रदानप्रस्थानेन, तान् व्यालाति आदत्ते आत्मसात्करोतीति व्यालः ।

"ला आदाने" धातुः अदादिः

१- पा०अ० ७।४।४९

२- गीता १०।१०

३- रा०यु० १८।३४

"आतश्चोपसर्गे" इति क प्रत्यय:

निरुक्ति-

नानात्मवशात् व्याज उक्त: करोति य:

प्रत्यय:

प्रतीयतेऽस्मिन्निति प्रत्यय: सद्धितान् प्रत्याययति विश्रम्भयति यथा-

"तं ह देवमात्मबुद्धिप्रकाशम्"[1]

यदि ते हृदयं वेत्ति यदि ते प्रत्ययो मयि ।
भीमसेनार्जुनौ शीघ्रं न्यासभूतौ प्रयच्छ मे"[2]

सर्वदर्शन: - ओं सर्वदर्शनाय नम:

तेषां,सर्वं स्वमहिमानं दर्शयतीति सर्वदर्शन: यथा-
"तस्यैव आत्मा विवृणुते तनूं स्वाम्"[3] इति

निरुक्ति-

महिमानं सर्वसहं तेषां दर्शयतीति स:
सर्वदर्शन आख्यातो नवाणां लोचनप्रद: ।।

१- श्वे०उ० ६।१८

२- भा०श०२०।७

३- मु०उ० ३।२।३

सिद्ध: - ओं सिद्धायनम:

सिद्धिः - ओं सिद्ध्यै नम: ।

तेषामनुपायसाध्य: स्वरूपेण. सिद्ध इति -

स्वरूपेणैव भक्तानां सिद्धत्वात् सिद्ध उच्यते ।
उपायैरपि अयमेव सेध्यते इति सिद्धि: प्राग्वत्पन्तु सत्वम् यथा

"यदिच्छन्तो ब्रह्मचर्यं चरन्ति" यं पृथक् धर्मचरणा:"

निरुक्ति-

अयमेव ह्युपायैश्च सिद्धि स्स्यात्साध्यते यत: ।

सर्वादिर् - ओं सर्वादये नम:

येत्वा देव ध्रुवं भक्ता: पुराणं पुरुषोत्तमम् ।
प्राप्नुवन्ति सदा कामानिह लोके परत्र च[१] ।।

तेषां परावरभूतानां सर्वेषां पुरुषार्थानाम् -
आदि: - मूलमिति सर्वादि: ।

निरुक्ति-

सर्वेषां पुरुषार्थानां मूलं सर्वादि रीरित: ।

१- रा०यु० १२०। ३१

द्वितीय

श
त
क

द्वितीयो ध्याय:

अच्युत: - ओं अच्युताय नम:

वृषाकपिर् - ओं वृषाकपये नम:

तेभ्य: प्रपन्नेभ्यो नापगत: अच्युत: ।

"यस्मान्न च्युतपूर्वोऽहमच्युतस्तेन कर्मणा"

"न त्याज्यं कथंचन" इति

अच्युतमेव धर्मरूपत्वेन समर्थयते वृषाकपि: तथार्थं निरुक्तम्

"कपिर्वराह: श्रेष्ठश्च धर्मश्च वृष उच्यते ।
तस्माद्वृषाकपिं प्राह काश्यपो मां प्रजापति:"[१]

निरुक्ति-

भक्तेभ्यो च्युतपूर्वत्वात् अच्युत: परिकीर्तित: ।
आश्रितानां च्युतिर्यस्मान्नास्ति सो च्युत ईरित: ।।

निरुक्ति-

कपिर्वराह: श्रेष्ठश्च धर्मश्च वृष उच्यते ।
तस्माद् वृषाकपि प्रोक्तो वराहो भीष्टदो मनु: ।।

१- मा०शा० ३४३।८९

अमेयात्मा - ओं अमेयात्मने नमः

भाष्य-

अस्मिन् आश्रितानुगृह्णातिवि-

"अतोज्यायांश्च पूरुषः"[१]

"भूयांश्चातो जनार्दनः" इति न्यायेन अमेयात्मा इत्यानित्य-

परिच्छेद्यस्वरुपः ।

निरुक्ति-

इत्यानित्यपरिच्छेद्यस्वभावात्सर्वतोऽधिकः ।

अमेयात्मा समुद्दिष्टो ह्यनित्यफलदो मनुः ।।

सर्वयोगविनिःसृतः - सर्वयोगविनिःसृताय नमः

भाष्य-

कथम्- सर्वयोगविनिःसृतः -

सर्वैरपि शास्त्रप्रमाणैः स्वमनीषिकापरिकल्पितैरपि योगैः -

उपायैः (विनिःसृतः) -विशेषेण वेदपरमगुह्यैरिव विनिःसृतः

प्राप्तुं योग्यः सुग्रह इति वा यथा-

स्वबुद्धिमात्रनिर्शातः परमात्मा जगत्प्रभुः ।

स्वैश्वयानुभवप्रीतो ज्ञातारमनुसेवते" ।। इति श्रो प्रौष्करे

निरुक्ति-

सर्वोपायैः प्राप्यश्च सर्वयोगविनिःसृतः ।

१- पु०सू० ३ ।

<u>वसुः</u> - ओं वसवे नमः

वसुः वसैः

"शृस्वृस्निहित्रप्यसिवसिदुनिभिलदिवन्धिमनिम्यश्च" इति उः

वसुनि- निधाविव, तेषु मनो स्येति - वसुः । शृस्वृस्निहित्रप्यसिवसिदृ॰

"वस, निवासे" इति उः तेषु वसुनि- निधाविव, मनो स्येति ।

<u>निरुक्ति-</u>

वसतीति <u>वसु</u> स्तेषु प्रोक्ता परमया स्वयम् ।

<u>वसुमनाय</u> - ओं वसुमनसे नमः

<u>सत्यः</u> - ओं सत्याय नमः

<u>भाष्य-</u> वसुमनाः

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।[1]
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ।।

<u>निरुक्ति-</u>

वसुनीव निधौ तेषु मनो यस्यास्ति सर्वदा ।
सर्वो वसुमनाः प्रोक्तो मातृवत् पोषको मनुः ।।

"तत्र साधुः" इति यत् सत्सु साधुः सत्य इति ।

१- गीता- ७।१९

समात्मा - ओं समात्मने नमः

संमितम् - ओं सम्मिताय नमः

भाष्य-

तेषु गुणादिभिः निम्नोन्नतेष्वपि अनालोचितविशेषमनाः

समात्मा यथा-

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्[1] ।।

निरुक्ति-

समात्मा समचित्तः ।

भाष्य- [2]'घतिस्यति' - इत्यादिना प्रकारः

अस्मद्वस्तस्य इति सम्यक् परिच्छिन्नः यथा,
उनषोऽक्षवर्णो मे रामो राजीवलोचनः[3]

मितत्वाच्च तथा भक्तैः संमितः परिकीर्तितः ।

१- गीता ९।२९

२- पा०अ० ७।४।४०

३- रा०वा० २०।२।

समः -ओं समाय नमः

तेष्वपि परिचितापरिचितत्वमन्दत्वे गित्याय विगणय्य गौरवे सम इति समः ।

समष्टम्, अवंकार्ये ओणादिको कारः

निरुक्ति-

ज्ञाते परिचिते चापि समत्वात् सम उच्यते ।

अमोघः - ओं अमोघाय नमः

तेषां,मोघः वितथस्पर्शः,नेति-

अमोघं दर्शनं राम न च मोघस्तव स्तवः ।
अमोघास्तेष्वन्ति भक्तिमन्तश्च ये नराः ।।

निरुक्ति-

वितथस्पर्शरहितः स ह्यमोघः प्रकीर्तितः ।

पुण्डरीकाक्षः - ओं पुण्डरीकाक्षाय नमः

'पुण्डरीकं परं धाम नित्यमक्षरमव्ययम्' तद्भवान् पुण्डरीकाक्षः[१] इति ।

१- मा०उ० ६८।६।

भाष्य-

पुण्डरीकाक्षः नित्यवैकुण्ठवासिनां दृष्टिभूत इत्यर्थः यथा, 'दिवीवचक्षुराततम्' इति

निरुक्ति-

पुण्डरीकं परं धाम नित्यमक्षरमव्ययम् ।
तद्भवतानामक्षिभूतः (पुण्डरीक) ईरितः ।।

वृषकर्मा- ओं वृषकर्मणे नमः

वृषाकृतिः -ओं वृषाकृतये नमः

प्रकृष्टस्याप्यस्यास्मदादीनामपि पूर्वोक्तदिशा श्रेयस्करत्वात् धर्मरूपमस्य कर्मेति वृषकर्मा ।
आकृतिरपीति- वृषाकृतिः
तापत्रयनिर्वापणसुधासेकशीतलचेष्टितवारूपत्वात् -वृषकर्मा वृषाकृतिः ।

ततो महति पर्यङ्के मणिकाञ्चनचित्रिते ।
ददर्श कृष्णमासीनं नीलं मेराविवाम्बुदम्'[१]

१- महाभा०राज० ४५। १३

रुद्रो - ओँ रुद्राय नमः

एवं विषरूपवेष्टितद्रुतहृदयान् सानन्दबाष्पान् कुर्वन् रोदयतीति रुद्रः ।

"रोदेर्णिलुक्च" उणादि इति रक् प्रत्ययः णिलोपश्च यथा श्री विष्णुतत्त्वे -

आह्लादशीतनेत्राम्बुः पुलकीकृतगात्रवान् ।
सदा परगुणाविष्टो द्रष्टव्यस्सर्वदेहिभिः ।। इति

बहुशिराः - ओँ बहुशिरसे नमः

बहूनि शिरांसि परस्सहस्रं फणा अस्येति - बहुशिराः ।

निरुक्ति-

फणाश्च बहवो यस्य स वै बहुशिरा मतः ।

बभ्रुः - ओँ बभ्रवे नमः

तथाविधः सन् बिभर्तीति बभ्रुः भुवः
"कुर्भ्रश्च" इति कुप्रत्ययः द्वित्वञ्च उणादि
"यस्य सा सकला पृथ्वी फणामणिशिलारुणा ।
बिभर्ति मालां लोकानाम् - -

निरुक्ति-

अनन्तरूपो यो धत्ते पृथ्वीं बभ्रुः स ईरितः ।

विश्वयोनिः - ओं विश्वयोनये नमः

विश्वेणां भेजुणां योनि स्वेन मिश्रयितेति विश्वयोनिः

'यु मिश्रणे'

'वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' इति नित् प्रत्ययः

निरुक्ति-

विश्वेणां भेजुणां स्वेन विश्वयोनि स्तु मिश्रणात् ।

शुचिश्रवाः - ओं शुचिश्रवसे नमः

तदुक्तानि भक्तिनम्राणि श्रावणीयानिशुचीनि- शृणोतीति शुचिश्रवाः ।

'विदुरान्नानि बुभुजे शुचीनि गुणवन्ति च'[१]

निरुक्ति-

भक्तैरुक्तान्यवश्यं यश्शृणोति स शुचिश्रवाः ।

अमृतः - ओं अमृताय नमः

तेषां निरवधिकमाधुर्येण, जरामरणवारणेन सदा स्वेषामतृप्तिकरत्वेन वा अमृतः यथा-

'अमृतस्येव नातृप्यन् प्रेक्षमाणा जनार्दनम्' इति

१- भा०उ० ६०।४२

<u>शाश्वतस्थाणु</u> – ओं शाश्वतस्थाणवे नमः

<u>वरारोहः</u> – ओं वरारोहाय नमः

शाश्वतस्थाणु स्वयं नित्यः भोक्तृभ्यो नपहार्यश्च अपुनरावृत्ति-भोग्यत्वात्, अन्यद्वयमुक्तम नित्यम् सकृतोभ्यं च ।

तस्मात् वरारोहः वरम् उत्कृष्टम् आरोहणम्– स्वप्राप्तिः अस्येति अन्यद्धि सर्वमवरम् यथा–

"उते वै निरयास्तात् स्थानस्य परमात्मनः"

"पराव्यूह विभवात्मना त्रिविधं परं ब्रह्म" इति भागवत सिद्धान्तः तत्र परन्नाम अकार्यम् कार्यादनवच्छिन्नपूर्णषाड्गुण्यमहार्णवो स्वरूढीकातप-त्रीकृतनिस्सीमम् नित्यभोगविभूतिकम् ।

तत्र प्रादुर्भावाः केचित् साक्षात् यथा, मत्स्यकूर्मादयः अन्ये तु आर्ष्यादि विशिष्टपुरुषाधिष्ठानेन, यथा–

रामकृष्णद्वैपायनादयः अपरेकालेशक्त्यावेशेन–

यथा पुरंज्यादिषु स्तरैव व्यक्तिषु स्वयमेवावतीर्य यथा? अर्चावतार इति चतुर्धा ।

तत्र वरारोहः इत्येतदन्तैर्नामभिः प्रायशः परत्वमुक्तम् –

<u>निरुक्ति–</u>

वरमुत्कृष्टमारोहो यस्यस्वप्राप्तिलक्षणः ।
वर्तते स वरारोहः प्रकृष्टस्थानदो मनुः ॥

महातपाः - ओं महातपसे नमः

एवम् एतावता ग्रन्थेन परत्वमुक्तम् अथव्यूहः तत्र वासुदेवस्य परत्वेन व्याख्यातत्वात्, इदानीम्, अप्ययपूर्वकत्वात् सृष्टेः संजिहीर्षुः संकर्षणः प्रस्तूयते षड्गुणा व्याख्यास्यन्ते तत्र ज्ञानबले संकर्षणस्य गुणौ व्यूढौ तत्र महत्- पूज्यम्, तपः प्राचीनभवपरिभ्रान्तिशान्त्यर्थं संजिहीर्षा बुद्धिरूपं ज्ञानम् ।यस्येति महातपाः ।

"यस्यज्ञानमयं तपः"[१] इति

निरुक्ति-

महत्पूज्यं तपोज्ञानं यस्येति स महातपाः

सर्वग् - ओं सर्वगाय नमः

धारणसामर्थ्यलक्षणेन बलेन, आत्मवत् धारयन्, संहृतान् सर्वान् गच्छतीति सर्वगः ।

निरुक्ति-

धारयन् संहृतान्यो वै गच्छतीति स सर्वगः ।

१- मुण्डकोप० १।१।

सर्वविद् - ओं सर्वविदे नमः

भानुः - ओं भानवे नमः

संवृतात् सित्सृत्वुः प्रद्युम्नः ऐश्वर्यवीर्यगुणो प्रद्युम्नस्य व्यूहो तत्र, कान्त्विया शक्त्युल्लासरूपेश्वर्यगुणवत्तया, स सर्वं कार्यं विंदति सृष्ट्या लभत इति सर्ववित् ।

निरुक्ति-

"प्रद्युम्नत्वेतु कार्याणि लभते यस्य सर्ववित्
सर्वनिर्माणेप्यविकुर्वाणो भातीति भानुः ।।

"दानाम्यान्तु" इति नु

"स एव स्वयमुद्भवानो" इति इदमविकाराकारं बोध्यम्

निरुक्ति-

भानुस्सर्वस्य भातीति निर्माणेप्यविकारतः" ।

विष्वक्सेनो - ओं विष्वक्सेनाय नमः

अथ स्थापको निरुद्धः (विष्वक्सेनः) इनेन स्वामिना सह वर्तत इति सेना,

ईश्वरेति यास्कः अनेन रक्षकमन्तो जनतो विष्वन्चः अस्येति व्यमन सामर्थ्यशरीर शक्तिः

निरुक्ति-

इनेन स्वामिना सार्कं वर्तते सेन इत्यतः ।
विष्वग्गद्यो जनो यस्य विष्वक्सेन इतोरितः ।।

जनार्दनः – ओँ जनार्दनाय नमः

भाष्य-

रक्षाप्रतिपक्षान् जनान् अनपेक्षो र्दयतीति जनार्दनः ।

'दस्युत्रासणाज्जनार्दनः'[१] इति ह्यनपेक्षालक्षणं तेजः प्रतिमूर्तिगुणानां व्यवस्थेयम् इयतामाविष्कारात् भगवतस्सर्वत्रानावरणगुणत्वात् मूर्ते हि श्रूयते –

भाष्य-

ज्ञानेनैश्वर्येण शक्त्येति सर्वे भगवतो गुणाः पूर्णाः इति एष आत्मा चतुर्विधः सर्वज्ञः सर्वदर्शी सर्वेश्वरः सर्वशक्तिस्सुद्धिमान् वा गुण्यैरनुग आप्तोवशी स्वाधीनो नादिरनन्तो व्यपगतनिद्राभयक्रोधतन्द्रो व्यपगतेच्छानमः कल्मव्याधिनिर्दोषो निरनिष्टो निरवद्यो ये भगवन्तं वासुदेवमेवं विदुः ये नैवं विदुः न ते विदुःइति, भगवान् वासुदेवोऽनन्तस्यापरिमितोऽनन्तत्वेनापरिमितत्वेन भवति" इति प्रतिपयायम् ।

१– भा०उ० ७८।६

वेदो - ओँ वेदाय नम:

पुन: संकर्षणस्य शास्त्रप्रदत्वमुच्यते -

भाष्य-

"इदस्वं इति, यन्तु यथा[1]
यो वै वेदांश्च प्रहिणोति तस्मै"

अत: "अभ्युपाय: आगम: पन्था: नेता ब्राह्मण, आचार्य: ।

इति संकर्षणाभिधा: ।

निरुक्ति-

संकर्षणात्वे शास्त्रार्थ प्रदत्वाद् वेद: ईरित: ।

वेदविद - ओँ वेदाय नम:

वेदार्थं या विशयविपर्यासं वेत्तीति- वेदवित् आह हि,

ऊर्ध्वमूलमध: शाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद सवेदवित्[2] ।।

निरुक्ति-

असंशयविपर्यासं वेदार्थं वेत्ति वेदवित

१-पा०व० ३।३।१२१

२-गीता १५।१।

अव्यङ्गो -ओं अव्यङ्गायनमः

वेदाङ्गो- ओं वेदाङ्गाय नमः

विगतानि- विहीनानि अङ्गानि- स्वकल्पिता निच्छन्दः कल्पादिनि यस्येति-व्यङ्गः तैरविहीनतया स नेति अव्यङ्गः ।

वेदाश्चानन्तशाखाः, यस्य अङ्गं शरीरम्-अन्तरङ्ग व्यंजकत्वादिति वेदाङ्गः यथा-

'नावेदविन्मनुते तं बृहन्तम्'[१]

'बिभृते वेदमयं शरीरम्' श्रुतिस्मृति ममैवाज्ञा'

निरुक्ति-

शिक्षाव्याकरणाद्यङ्गैर्विहीनो व्यङ्ग उच्यते ।
यस्य वेदो नन्तशाखो वेदाङ्गो ङ्गतया स्मृतः ।

वेदवित् - ओंवेदविदे नमः

कविः - ओं कवये नमः

वेदवित् - पूर्ववत्

१- का०उ० ३।०पं०५५

स एव क्रान्तदर्शित्वात् कविः

'कु' शब्दे दर्शनकर्मणो स्यात् एन अदादि धातुः

निरुक्ति-

स एव क्रान्तदर्शित्वात् कवि रित्युच्यते बुधैः ।

लोकाध्यक्षः - ओं लोकाध्यक्षाय नमः

सुराध्यक्षो- ओं सुराध्यक्षाय नमः

धर्माध्यक्षः - ओं धर्माध्यक्षाय नमः

अथ क्रान्तदर्शित्वोपपादनमुखेन त्रिभिर्निरुक्तस्य फलप्रदत्वमुच्यते लोकानां धर्माधिकारिणाम्,अध्यक्षः स्वामी,अकृताभ्यागमकृतविप्रणाश प्रसंगपरिहारेण फलं दातुमनुसन्धत्तेति लोकाध्यक्षः सुराध्यक्षः,धर्माध्यक्षः।

कर्तोऽयस्य, धर्मः उपायः,अध्यक्षः सत्यसन्धः स एवास्य संविदन् ददाति" इति व्यपदेशः

निरुक्ति-

धर्माधिकारिणो लोकाः तदाराध्याः सुरास्तथा ।
धर्मस्तत्साधनं तेषामध्यक्षः स्यात्त्रिनामवान् ।।
लोकाध्यक्षस्सुराध्यक्षो धर्माध्यक्ष इति क्रमात् ।
अनिरुद्धस्य विज्ञेयो लोकाध्यक्षादिनामवान् ।।

कृताकृत: - ओं कृताकृताय नम:

द्वौ च धर्मौ - संसारस्य प्रवर्तको निवर्तकश्च तत्रप्रवर्तकस्या नित्यफलप्रदत्वेनोपचारात् कृत: निवर्तकस्य नित्यफलप्रदत्वेन अकृतश्चेति स एव- कृताकृत इति ।

निरुक्ति-

अनित्यानित्यफलदौ प्रवर्तकनिवर्तकौ
ददौ यस्य स्वरूपं स: (कृताकृत) स्तोरित: ॥

चतुरात्मा - ओं चतुरात्मने नम:

चतुर्व्यूह: - ओं चतुर्व्यूहाय नम:

चतुरात्मा- वासुदेव: सङ्कर्षण: प्रद्युम्न: अनिरुद्ध इति अस्यैकस्य चातुरात्म्यम् आह-

चतुर्व्यूह: - यथोक्तप्रयोजनेभ्य: ध्येयाराध्यव्यवस्थार्थं च, समस्तव्यस्तेन गुणषट्केन वर्ण्यान्तव्यवस्थितावयववर्णभूषणप्रहरण- वाहनध्वजादिभि: जाग्रदाद्यवस्था चतुष्टयविशिष्टाभिर्मूर्तिभि: चतुर्धा व्यूह्यत इति ।

निरुक्ति-

वासुदेवादिरूपत्वात् चतुरात्मेति कथ्यते ।
जाग्रत्स्वप्नसुषुप्त्यादौ व्यूहावस्था चतुष्टये ।
एतैर्विशिष्टमूर्तित्वात् चतुर्व्यूह: स्तोरित: ॥

<u>चतुर्दंष्ट्र</u> - ओं चतुर्दंष्ट्राय नमः

व्यूहमूले परेण रूपेण नायं महापुरुषलक्षणविशिष्टतया चतस्रः दंष्ट्राः अस्येति- चतुर्दंष्ट्रः यथा-

"चतुर्दशपदलन्दः चतुर्दंष्ट्रश्चतुर्गतिः"[1]

<u>निरुक्ति-</u>

दंष्ट्राचतुष्टययुक्तत्वात् चतुर्दंष्ट्र इति स्मृतः ।

<u>चतुर्भुजः</u> - ओं चतुर्भुजाय नमः

तथा हि परं रूपमाहुः

"तमसः परमो धाता शङ्खचक्रगदाधरः"[2]

"भुजैश्चतुर्भिस्समुपेतम्"[3] इत्यादि

<u>निरुक्ति-</u>

महापुरुषत्वादुच्यते हि चतुर्भुजः ।

१- रा०यु० ३४।१६३

२- रा०यु० ११४।१५

३- विष्णुपुराणे

भ्राजिष्णुर् - ओं भ्राजिष्णवे नमः

भोजनम् - ओं भोजनाय नमः

इदमेवयथोक्तं व्यूहभाजते- उपाधिशून्य तादात्म्येन प्रकाशत इति भ्राजिष्णुः ।

"भुवश्च"[1] इत्यत्र चकाराद् इष्णुच्

तैः भुज्यते- सुखेन अनुभूयते इति भोजनम् ।

भोक्ता- ओं भोक्त्रे नमः

तदर्पितम् घृतदधिमधुशर्करामिश्रीभूततण्डुलपायसापरपर्यायम्, प्रायणमपि अमृतमिव भुङ्क्ते इति भोक्ता पूर्ववत् धातुः यथा-

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति[2] ।।

निरुक्ति-

भोक्ता पितस्य भोक्तृत्वाद् भोक्ता स्यादमृतस्य वा ।

१- पा०अ० ३।२।१३८

२- गीता ५।२९

सहिष्णुः - ओं सहिष्णवे नमः

दुःसहान् स्वभक्तविषयान् अनवेक्षानपि अपराधान् तच्छील: सहत इति सहिष्णुः।

"अलंकृञ्०"[1] इत्यादिना इष्णुच् कुतः इयतो महतोऽपराधा अस्येत्याकाङ्क्षायाम् शशिबिन्दुशतलिमादिवत्, स्वरूपप्रयुक्तत्वादित्येवं परः ताच्छील्यादिविषय इष्णुच् प्रत्ययः एवम् व्यूहः।

जगदादिजः - ओं जगदादिजाय नमः

विभः प्रस्तूयते तत्र तावत् त्रिमूर्तिमिव्याबतार: जगतो स्य आदिषु आदिभूतासु ब्रह्मविष्णुशिवात्मिकासु त्रिमूर्तिषु अन्यतमत्वेन जायते इति जगदादिजः।

"सप्तम्यां जनेर्डः" एवम् मेवजं गदाग्रजावयोऽपि यथा ब्रह्मा-
"यस्यप्रसादादहमच्युतस्य भूतप्रजासृष्टिकरोऽन्तकारी।
क्रोधाच्च रुद्रः स्थितिहेतुभूतो यस्माच्च मध्ये पुरुषः परस्तात्"[2]
इति तथा उपाँगे देवा:।

निरुक्ति-

जगतामादिभूतासु मूर्तिष्वन्यतमत्वतः।
जातत्वाद्विष्णुरूपेण प्रोच्यते जगदादिजः॥

१-पा०अ० ३।२।१३६
२- वि०पु० ४।१।३६

<u>अनघो</u> – ओं अनघाय नमः

एवं संसारमध्येजनित्वापि शिवविरोधी पापप्रतिस्पर्धीति अनघः ।

<u>विजयो</u> – ओं विजयाय नमः

<u>जेता</u> – ओं जेत्रे नमः

<u>विश्वयोनि</u>– ओं विश्वयोनये नमः

मूर्त्यन्तरैरपि सृष्टिसंहारादिभिः आद्विजयी स्यादिति –विजयः तावपि यो जयति स्वाभिप्रायेष्ववस्थापयति जेता ।

धातुः पूर्ववत् ततस्तृच् अनिट्गुणः अनण्णादि। विश्वयोनि–पूर्ववत् ।

<u>निरुक्ति–</u>

विजयी जाता जयी
स्वाभिप्राये स्थापयिता जेता स्याद्विश्वशंकरो ॥

<u>पुनर्वसुः</u> – ओं पुनर्वसवे नमः

पुनः तत्प्रभृतिषु देवेष्वन्तरात्मतया वसति चेति – पुनर्वसुः यथा– 'देवानामन्नुनिहितं गुहासु' श्रुत 'वस' निवासे धातुः

<u>निरुक्ति–</u>

ब्रह्मादिष्वपि देवेषु ह्यन्तरात्मतया च यः ।
पुनर्विवसन्नान्नित्यं पुनर्वसु रुदाहृतः ॥

<u>उपेन्द्रो</u> - ओं उपेन्द्राय नमः

आदित्येषु जनन्यजः इन्द्रानुजतया उपगतइन्द्रमिति उपेन्द्रः

<u>वामनः</u> - ओं वामनाय नमः

<u>प्रांशुर्</u> - ओं प्रांशवे नमः

श्रुत्यनुसारात् स एव इन्द्रसंत्राणाय बलिमखे -

"दृष्टन् स्वकान्त्या वामानि सुखानि नयतीति- वामनः इति श्रुतिः

"स वामनो दिव्यशरीरधृक्" इति

तत्रैव क्षणात् प्राश्नुते सर्वं व्याप्नोतीति प्रांशुः ।

"अशूव्याप्तौ" प्रपूर्वः धातोः स्वादि ।

"रुक्शकृशंस्वंशुपीयुनोलंगुलि० इत्यादिना उ प्रत्ययः नुनागमश्च

<u>निरुक्ति-</u>

दृष्ट्या स्वकान्त्या वामानि सुखानि नयतीति यः स वामनो ।

व्याप्तिमत्त्वात् प्रांशु एव परिकीर्तितः ।।

<u>अमोघस्</u> - ओं अमोघाय नमः

पूर्ववत् ।

<u>शुचिर्</u> - ओं शुचये नमः

ईदृगुपकारेषु प्रत्युपकारनैरपेक्ष्यात् शुचिः परिशुद्ध इति- शुचिः
"शुच" शोके धातुः ।

शुचयात् कित् स्वम् ऋणिरु चिप्रभृतय: यथा-

"अस्मश्चिव महान् शुचि:" इति

निरुक्ति-

स्वयंकृतोपकारेषु यत्किंचित् प्रत्युपक्रियाम् ।
अनपेक्ष्य स्थितो यो सौ शुचि: स्यात् धर्मतो मनु: ।

अर्चित: - ओं अर्चिताय नम:

अतीन्द्रम् - ओं अतीन्द्राय नम:

परिपन्थिवधबन्धनादौ, ऊर्जा- बलम् अस्य संजातेति वा
तत्र बलिष्ठ इति वा (ऊर्जित:) स च

इन्द्रानुजत्वेपि ऐश्वर्येणापदानेन तमतिक्रान्त: अतीन्द्र: यथा-
"अविदितविभवाय" इति तन्त्रमन्त्रवर्ण: मन्त्रे
"अतिवायिन्द्रकर्माणाम्" इति

निरुक्ति-

ऊर्जा बलं यस्य नित्यं संजाते त्यूर्जित: स्मृत: ।
इन्द्रानुजत्वेप्यैश्वर्यादतीति तीन्द्र उच्यते ।

संग्रह: - ओं संग्रहाय नम:

सर्ग- ओं सर्गाय नम:

त्रिविक्रमणसुग्रहपादपद्मतयानकोरयत्नेन सम्यक् गृह्यत् इति संग्रह: ।

"गृहवृहनिश्चिगमश्च"[1] इति अप्

गुहुत्सु निकृष्टात्मतया तेभ्यस्सृज्यत इति सर्ग:

निरुक्ति-

भक्तेरप्यप्रयत्नेन संग्राह्यस संग्रह स्समृत:
ब्रह्मादिभ्यस्सृज्यते य सर्गं तं परिचक्षते ।

धृतात्मा - ओं धृतात्मने नम:

नियमो - ओं नियमाय नम:

आत्मज्ञानेन धृता आत्मानो नैनेति धृतात्मा ।

"धृञ् धारणे" कर्मणि क्त: धातु म्यादि अनिट् दीर्घ: तत: नान्तलक्षणादीर्घ इत्यादि धृतात्मा ।

तत्प्रतिबद्धाचरिप्रभृतयो नियम्यन्ते अनेनेति-नियम:

"यम: समुपनिविषु च"[2] इति अप्

निरुक्ति-

येनात्मनो धृता नित्यं स धृतात्मे ति कीर्त्यते
नियम्यते अनेन नियम: स उदीरित: ।।

१- पा०अ० ३।३।५८

२- पा०अ०३।३।६३

यमः - ओं यमाय नमः

वेद्यो - ओं वेद्याय नमः

अखिलकण्टकानुकूलम् यच्छतीति यमः

कृवितधातुः पचाद्यच् यथा

"यः पृथिवीमन्तरो यमयति"[1]

"य आत्मानमन्तरो यमयति" माध्यन्दिनशाखायाम्

आविर्भूय प्रकटितातीन्द्रियमहिमतया सर्वैरपि वेदितुं शक्य इति वेद्यः

"विद् ज्ञाने" धातोः ।

निरुक्ति-

अकण्टकं चानुकूलं यच्छत्यखिलं यमः ।

सर्वैश्च वेदितुं शक्यः सौलभ्यात् वेद्य ईरितः ॥

वैद्यः - ओं वैद्याय नमः

सदायोगी - ओं सदायोगिने नमः

वैद्यकमभिज्ञाति विद्यामधीते वेदवेत्ति वैद्यः

"तदधीते तद्वेद"[2] इत्यण् यथा -

स्वप्ने सततजागरूकः सदायोगी यथा-

"य एषु सुप्तेषु जागर्ति" इति -

१- बृ०उ० ५।७।२

२- पा०सू० ४।२।५९

निरुक्ति-

वेधतृणां भ्रमाख्यस्य गदस्य विनिवर्तनीम्

वेधामयीति वेदेति यो वैद्यः समुदाहृतः ।

चिकित्सायां जागरूकः सदायोगीति कथ्यते ।

वीरहा - ॐ वीरघ्ने नमः

स्ववेदनविहन्तृन् वीरान् - ईदृक्वीरान् हतवानिति वीरहा "ब्रह्मभ्रूणवृत्रेषु क्विप्"[1] इति नियमः प्रायिकः एवम् कामहा, क्रोधहा मोहहा इत्येवमादयोऽपि यथा-

तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।

क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ।।[2]

निरुक्ति-

स्वध्यानभञ्जकान् वीरान् हन्ति यः स वीरहा ।

१- पा०अ० ३।२।८७

२- गीता १६।१९

<u>माधवो</u> - ओं माधवाय नमः

<u>मधुः</u> - ओं मधवे नमः

स्वविषयपरविद्याप्रवर्तनात् माधवः यथा -

"मा विना च हरेः प्रोक्ता तस्या ईशो यतो भवान् ।
तस्मान्माधवनामासि धवस्स्वामीति शब्दितः ।इति

लब्धविधेभ्यो मन्यते स्वदत इति मधुः ।
"मन ज्ञाने" आस्वादनकर्मेणायम्"

"फलिपाटिनमि०" इत्यादिना उ प्रत्ययः धकारोऽन्तादेशश्च
यथा-
"मध्वउत्सः"[1] इति

<u>निरुक्ति-</u>

"भक्तेभ्यो लब्धविधेभ्योऽस्वदमानतया मधुः ।

<u>अतीन्द्रियो</u> - ओं अतीन्द्रियाय नमः

मधुरमधुरधिस्वरूपेऽस्मिन् परव्यूहविभवहृदयषाड्गुण्यविवक्षया स्वरूपं शोध्यते अतिक्रान्तः इन्द्रियाणि ज्ञानोपकरणानि तदविषयत्वेति अतीन्द्रियः" ।

<u>निरुक्ति-</u>

ज्ञानोपकरणव्रातमतिक्रान्तो ह्यतीन्द्रियः"

१- पु०सू०

<u>महामायो</u> - ओं महामायाय नमः

कथमित्थं- महति अप्रपन्ननिखिलजनमोहिनी तिरस्करिणीवत् माया यस्येति यथा-

"गुणमायासमावृतः" इति
नेयं मृषा मायेति कथ्यते

<u>निरुक्ति-</u>

माया यस्याप्रपन्नानां सर्वेषामपि मोहनी
महामायः स विज्ञेयो यस्वर्णैनुरुज्ज्वलः ॥

<u>महोत्साहो</u> - ओं महोत्साहाय नमः

शानध्यादपि वर्कुः बलवीर्यादीनां सार्वेश्वरात् व्यनतिक्रमैश्वर्यं गुणमाह (महोत्साहः)

शंकरभाष्ये- "जगदुत्पत्तिस्थितिलयार्थमुद्युक्तत्वात् महोत्साहः।

<u>भाष्ये तु-</u>

अथ षाड्गुण्यं व्याचिख्यास्यते तत्र कर्तृत्वप्राधान्यविवक्षयात्व-लक्षणस्यैश्वर्यस्य प्राथम्यम् अन्यच्च, वक्ष्यमाणशक्तिविशेषेण विशिष्टम् अनन्यनियोज्यनिरंकुशस्वसंकल्पकणिकामात्रेण सर्वसृष्ट्या च अकर्तृत्वव्यावर्तकः महान् अभ्यधिकः उत्साहः उत्साहनं कर्तृत्वलक्षणमैश्वर्यम्, यस्येति महोत्साहः

"षह मर्षणे" धातु

<u>निरुक्ति-</u>

महदुत्सहनं यस्य एवैश्वर्यं कृतलक्षणम् ।

महोत्साह स्स विशेषो मनुरैश्वर्यदायक: ।।

<u>महाबल:</u> - ओं महाबलाय नम:

<u>महाबुद्धि:</u> - ओं महाबुद्धये नम:

<u>भाष्ये तु-</u>

सहायापेक्षानन्तरव्यावर्तकं महत् बलमस्येति- महाबल: अनेन ह्ययम् अपरिमितक्रियोऽपि अनापतित श्रम: स्वे महिम्नि तिष्ठन् अपोरितापारान्तर: सुवारिव्यापार संवरक्षितसमुल्लास: शरीरमिव सकलं बिभर्ति,

'बहुलयन् बहुलम्' इति च गीता ।

एतल्लेशो जीवनसमीरण गिरिधरादौ ।

अत्तसंस्कारणाव्यवर्तिका महती बुद्धि:-अविशयविपर्यासरसार्वज्ञ्य लक्षणं ज्ञानम्, अस्येति महाबुद्धि ।

'बुध अवगमने' धातु:

'पश्यत्यचक्षु: स शृणोत्यकर्ण:'[1]

'सर्वतोऽक्षिशिरोमुखम्'[2] इत्यादि

१- श्वे०उ० ३।१९

२- तै०उ०

"एकेन तु प्रमाणेन सर्वेशो येन कल्प्यते ।

नूनं स चक्षुषा सर्वान् रसादीन् प्रतिपद्यते" इति

निरुक्ति-

महाबुद्धि भवेद् ज्ञानं स्वरूपं यस्य सोच्यते ।।

महावीर्यः - ओं महावीर्याय नमः

दधिभावमापद्यमानदुग्धादिकारणेभ्यो भेदकम्, सत्यपि हैतानविकार-लक्षणं महद् वीर्यमस्येति महावीर्यः ।

आरुमृगमदकस्तूरिकाकुसुमामोदवत् संनिधिमात्रेण निमाथादिकार्यकारी ह्ययम् यथा-

"तस्य सन्निधिमात्रेण गन्धः क्षोभाय जायते

मनसो नोपकर्तृत्वात् तथासौ परमेश्वरः" इति

महाशक्तिः - ओं महाशक्त्यै नमः

महाद्युतिः - ओं महाद्युतये नमः

उपादानसंचितविकल्पनिमित्तमात्रताव्यावर्तिका महती शक्तिः साधन ग्राम विनियोगव्यापारैकचैतन्यकृतप्रकृतिपरिणामयोग्यतालक्षणसामर्थ्यम् अस्येति महाशक्तिः ।

"शक्लृ शक्तौ" धातुः स्त्रियां क्तिन् अनिट् भाषोने तु पदे प्रागिव पुंवद्भावो विशेषः अस्याः विप्रकृष्टप्रधानदुग्धादौ ।

सकलकार्यापेक्षकारणवैलक्षण्यकरं तदनपेक्षालक्षणं तेजो महदस्येति महाद्युति यत् बाह्याभ्यन्तरतमोविरोधिस्वप्रकाशयोः यथा-

"परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च"[1]

"तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः"[2]

अनिर्देश्यवपुः – ओँ अनिर्देश्यवपुषे नमः

एतत्त्वणाड्गुण्यविग्रहत्वेनानुपमत्वात्, अनिर्देश्यम् – इदमीदृशमिति निर्देष्टुमशक्यम् वपुः -शरीरम् अस्येति अनिर्देश्यवपुः ।

"षाड्गुण्यविग्रहं देवं भास्वज्ज्वलनतेजसम्" इति पौष्करसंहितायाम्

"बुद्धिमनोऽङ्गप्रत्यङ्गवतां भाति लक्ष्यामहे, शास्त्रशब्देभ्यः बुद्धिमान् मनोवानङ्गप्रत्यङ्गवान्" इति पौष्करसंहितायाम् ।

इत्यादिना- "शुद्धसत्त्वमयेन ह्यनेन कनकदलेन रत्नमुन्मील्यते षाड्गुण्यो नतु त्रिगुणमयेनैव निमील्यते" इति तत्त्वम् वैष्णवे च,

निर्देशविशेषणम् – उपमानविशेषणम्, तद्वर्जितः अनुपमवपुरित्यर्थः

निरुक्ति-

ज्ञानादिषाड्गुण्यमयमुपमानविवर्जितम् ।
वपुरस्यास्ति तेजिष्ठम् अनिर्देश्यवपुर्हि सः ।।

श्रीमान् – श्रीमते नमः

पूर्ववत् ।

१- श्वे०उ० ६।८

२- वि०पु० ६।५।८५

अमेयात्मा - ओँ अमेयात्मने नमः

पूर्ववत् ।

महाद्रिधृत - ओँ महाद्रिधृते नमः

अथ तदनुगुणयथेष्टव्यवहारचेष्टितम् प्रदर्शयति, स च मथनसमये महान्तमद्रिम् - मन्दरम् धृतवानिति महाद्रिधृत् ।

निरुक्ति-

सिन्धुगाम्भीर्यभावो यो ह्यमेयात्मा स कीर्तितः ।
महान्तं मन्दरं यो हि धृतवान् स महाद्रिधृत ।

महेष्वासो - ओँ महेष्वासाय नमः

सिन्धुबन्धदशकन्धरवधादौ, महान् मनोहारो इषूणां शराणाम् आसः - आसनं क्षेपः अस्येति - महेष्वासः ।

निरुक्ति-

महेष्वास स्स विज्ञेयश्चण्डकोदण्डमण्डितः ।

महीभर्ता - ओँ महीभर्त्रे नमः

श्रीनिवासम् - ओँ श्रीनिवासाय नमः

तदानीं महीम् - उज्झितधरणीम् तज्जलौ बिभर्ति भरतीति वा - महीभर्ता ।

श्रीनिवासः इति च मध्यमानतिलक्ष्मीचाटुकारवदो धिरोपणादि दिव्यचेष्टापरम्"

निरुक्ति-

धरणीधृतिलीलस्सः महीभर्वेति शब्यते ।
मथ्नानीतलक्ष्मीवान् श्रीनिवासः स ईरितः ॥

सतांगति - ओं सतांगतये नमः

अनिरुद्ध - ओं अनिरुद्धाय नमः

स्वच्छन्दचेष्टितैरपि, सतां प्रणतानां गतिः प्रियंकरतया प्राप्य इति सतां गतिः ।

एवं निधूतनिरोधनिरवधिकभावलौकभावाणु दिव्यचेष्टितः अनिरुद्धः ।

"अपरिमितचेष्टो भगवाननिरुद्धः" इति मोक्षः मोक्षसंहितायाम्

निरुक्ति-

प्रणतानां प्रियकर स्सतांगति रिहोच्यते ।
अनन्तचेष्टायुक्तत्वा दनिरुद्ध उदाहृतः ॥

सुरानन्दो - ओं सुरानन्दाय नमः

गोविन्दो- ओं गोविन्दाय नमः

आपत्सखत्वेन सुरा आनन्दन्ति अस्मादिति सुरानन्दः ।

तैंस्तूयमानोपकारतया तेषां गाः स्तुतिगिरः, विन्दति लभते इति गोविन्दः ।

'गवादिषु विन्देस्संज्ञायाम्'[1] इति शः तैः सुरैः स्तूयमानोपकारः ।

निरुक्तिः

सुरानन्द स्सुरान् सर्वानानन्दयति यस्सदा ।
गवां स्तुतिगिरां विन्दो गोविन्द स्स उदाहृतः ।

गोविन्दांपतिः - ओं गोविन्दांपतये नमः

गावः वेदगिरः तद्विदां ज्ञानिनां ज्ञानयज्ञाराध्यत्वेन पाता गोविन्दांपतिः यथा-

'इंसमूर्तिमिधात्मानं ज्ञानयज्ञमुज्जं स्मरेत्' इति

मरीचिर् - ओं मरीचये नमः

दमनो - ओं दमनाय नमः

स्वं अनुणाऽस्थानेभ्योऽपि जन्तुभ्यः प्रकाशितनिर्मलरूपः मरीचिः मृकणिभ्यामोचिः मुछ० अत्र दीप्तिकर्मा ।

कान्तिमन्दाकिनीभिः भवतापंदाम्यतीति दमनः

निरुक्ति-

भवतापस्य दमनात् कांत्या दमन ईरितः ।

१- पा०सू० ३।१।१३८

हंसः - ओँ हंसाय नमः

सुपर्णः - ओँ सुपर्णाय नमः

स एवम् हंसः छिनत्ति, मनोहरं हन्ति गच्छति हसति-स्मयत इति वा हंसः यथा-

"सत्यसत्त्वसुभाश्रयपरमहंसाय" इति -

शोभनपर्णत्वात् संसारपारनयनाद्वा सुपर्णः इति नैरुक्ताः

निरुक्ति-

शोभनपर्णत्वात् सुपर्ण इति कथ्यते ।
संसारपारनयनात् सुपर्ण इति वा मतः ।।

भुजगोत्तमः - ओँ भुजगोत्तमाय नमः

व्यूहपरिवमोऽनिरुद्धः पद्मनाभश्चुक्तः इह प्रादुर्भावप्रथम, पद्मनाभो विवक्ष्यते भुजगोत्तमः भुजगस्य शेषस्य, उत्तमः शेषो, अनन्तयोगपर्यङ्कशयनः
"सुष्वाप भगवान् विष्णुरपश्चयामेक एव हि ।
नागस्य भोगे महति शेषस्यामिततेजसः ।।

हिरण्य नाभः - ओँ हिरण्यनाभाय नमः

स एव हिरण्यम् - स्वसंकल्पजनिताष्टदलपद्महिरण्मयकर्णिकात्वापन्न मेरुरूपं रुक्मम् नाभौ यस्येति -हिरण्यनाभः ।

निरुक्ति-

हिरण्यनाभ सौन्दर्यनाभिर्यस्येति स स्मृतः"

सुतपाः — ओं सुतपसे नमः

पद्मनाभः — ओं पद्मनाभाय नमः

सुतपाश्च तपो-ज्ञानम् संवृतता दिा तद्ध्याने

"दिव्यबीवतनुविंधुः" इति

पद्मनाभश्च पूर्ववत्

प्रजापतिः — ओं प्रजापतये नमः

पूर्ववत्

अमृत्युः — ओं अमृत्यवे नमः

अमृत्युः मृत्युविरोधी, मृत्युमृत्युत्वात्

"मृङ्० प्राणत्यागे" धातुः तुदादिः

"भुजिमृङ्०भ्यां युक्त्युकौ" उणादि इति त्युक् प्रागुक्तरीत्या न योरनः आगुणः अनिट् कतत्पुरुषः नलोपः

निरुक्ति-

अमृत्यु रिति तं प्राहुः सप्ताणां मृत्युनाशकः

तृतीय शतक

[illegible]

[illegible]

[illegible]

[illegible]

तृतीयो ध्याय:

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

सर्वदृक् - ओं सर्वदृशे नमः

स एव सर्वान् - अनुकूलप्रतिकूलतटस्थान् यथार्हं नियन्तुं पश्यतीति- सर्वदृक् ।

"दृशेश्चेति वक्तव्यम्" इति क्विन्

"क्विन प्रत्ययस्य कुः सहि सर्वतोमुखः ?

निरुक्ति-

अनुकूलान् तटस्थांश्च प्रतिकूलानपि स्वयम् ।
नियन्तुं च यथायोग्यं यः पश्यति स सर्वदृक् ।।

सिंहः - ओं सिंहाय नमः

रिपुद्विपनिष्पेषभीषणमहानुसिंहसंहननतया, सिन्चति, हिनस्तीति वा- सिंहः ।

सिचेस्संज्ञायाम् ०" इति उणादि कः नुम हांच ।

निरुक्ति-

रिपुद्विपानां निष्पेणभीषणः सिंह उच्यते ।

संधाता - ओं संधात्रे नमः

संधिमान्- ओं संधिमते नमः

रिपुद्विपनिष्पेषणभीषणोऽपि -संधाता प्रणयिनां प्रह्लादप्रभृतीनां संश्लेषयिता-

स च तैस्संधिर्नित्योऽस्येति -संधिमान् नित्ययोगेमतुप्

निरुक्ति-

प्रह्लादाद्यैश्च संधाता संश्लेषकरणाच्च सः।
प्रह्लादाद्यैर्नित्यसंधिर्यस्यस्यात् संधिमान्स्मृतः।

स्थिरः - ओं स्थिराय नमः

तत्सन्धाने तदपचारदुर्विचाल्यत्वात् - स्थिरः

"अजिरशिशिर०" इत्यादिना किरच् प्रत्ययः निपात्यते उणादि "भवम्" इति हि तन्मन्त्रवर्णः

निरुक्ति-

अपचारैरप्यचाल्यत्वात्संधाने स्थिर उच्यते

अजो - ओं अजाय नमः

पूर्ववत्

दुर्मर्षणाः - ओंदुर्मर्षणाय नमः

शास्ता- ओं शास्त्रे नमः

प्रतापैः दुष्करं मर्षणमस्येति दुर्मर्षणः

"रथाङ्गशङ्खधातारं बलमूर्ति सुभीषणम्" ध्याने

एवं सर्वकण्टकं साधु शास्तीति शास्ता तत्प्राधुकारिणि

तृन् -

"तृनवृचौशंसिदादादिभ्यः संज्ञायांचानिटौ" उणादि इत्यनिट् यथा-
"द्रवन्ति दैत्याः"[१]

निरुक्ति-

दुष्करं मर्षणं यस्य परैः दुर्मर्षणः स्मृतः ।
समस्तान् कण्टकान् शास्तीत्यतः शास्तेति कीर्त्यते ।।

विश्रुतात्मा, ओं विश्रुतात्मने नमः

स एव सर्वदा सर्वत्र सर्वं विस्मयेन विश्रुतः सँदापदानस्वभावः यथा-
"अशेषदेवेशनरेश्वरेश्वरैः" इत्यादि ।

१- वि०पु०

सुरारिण - ओं सुरारिघ्ने नमः

स एव सुरारिं हिरण्यकशिपुमुरो विदारं हतवानिति सुरारिहा यथा "सत्सत्वकरजश्रेणीदीप्तेनाभयपाणिना"

"शंखचक्री यथा सध्यक् भयानां सौभयं परम्। इति ध्याने।

निरुक्ति-

हिरण्यकशिपोर्हन्ताकीर्त्यते स सुरारिहा

गुरुर्गुरुतमो - ओं गुरुतमाय गुरवे नमः

अयमस्यावतारः अविशेण विद्यापरमाचार्यकः गुरुः

"स पूर्वेषामपि गुरु" इति हैरण्यगर्भाः

"कृग्रोरुच्च" इति कुप्रत्यय उणादि उकारश्चान्तादेशः तस्यैव विशेषणम्।

"गुरुतमः" न स्वतन्त्रनामत्वमस्य"

पूज्यश्च गुरुर्गरीयान्"[१]

१- गीता ११।४३

धाम - ओं धाम्ने नम:

संहारनश्वरचराचरबीजाधारनैकण्धारत्वेन तदाश्रयत्वात् धाम धाम्न:

"सर्वधातुभ्यो मनिन्" इति मनिन् प्रत्यय:

निरुक्ति-

"चराचराधारतया धामे ति परिचद्यते"

सत्य: - ओं सत्याय नम:

पूर्ववत् ।

सत्यपराक्रम: - ओं सत्यपराक्रमाय नम:

निमिषो - ओं निमिषाय नम:

तेषु सत्य: अकृत: पराक्रम: वृषि अस्येति सत्यपराक्रम:
तद्विरोधिषुनिमिषति न कटाक्षयतीति निमिष: ।

निरुक्ति-

वृत्तिर्व्यक्तता यस्य स स्यात् सत्यपराक्रम:
यो सौ सतान्नेक्षते हि निमिष: स विरोधिन: ।

अनिमिषश् - ओं अनिमिषाय नमः

स्रग्वी - ओं स्रग्विणे नमः

एषु न निमिषति जागर्तीति अनिमिषः दिव्यमानतनुः"
तिर्यक्त्वेऽपि परत्वसूचिनो वैजयन्त्यो स्रगस्य नित्ययोगिनीति स्रग्वी ।

"अस्मायामेधास्रजो विनिः" इति विनिः

निरुक्ति-

स्रजा नित्ययोगात् स्रग्वी ति परिकीर्त्यते ।

वाचस्पतिर् - ओं वाचस्पतये नमः

स एव वाचः वेदवाचः मात्स्यपुराणेनोपबृंहणात्पतिः-स्वामी इति वाचस्पतिः षष्ठ्यालुक् ।

"षष्ठ्याः पतिपुत्रपृष्ठपारपदपयः पोषेषु च"
इत्यादिना सत्वम् ।

निरुक्ति-

वेदोपबृंहणत्वाद्धि वाचस्पति रिति स्मृतः ।

उदारधी: - उदारधिये नमः

एवं सर्वोपजीव्यत्वात् उदाराधी: सार्वश्यलक्षणा बुद्धि:, अस्येति उदारधी ।

निरुक्ति-

सर्वोपजीव्यसार्वश्याद्बुच्यते स उदारधी:

अग्रणीर्- ओं अग्रण्ये नमः

तेन प्रकारेण अग्रिमं पश्चिमं पदं नयतीति अग्रणी ।

ग्रामणीश् - ओं ग्रामण्ये नमः

श्रीमान् - ओं श्रीमते नमः

न्यायी - ओं न्यायाय नमः

तत्र नित्यसिद्धानां ग्रामं समाजं नयतीति - ग्रामणी
"सत्सूद्विष:"[1] इत्यादिना क्विप्
"अग्रग्रामाभ्यां नयतेरिति वक्तव्यम्"[2] इति णत्वम्
"श्रीमान् पूर्ववत्"
एवं न्याय: प्रमाणहेतुयुक्तकारीति -न्याय:

निरुक्ति-

ग्रामं समाजं सूरीणां नयति ग्रामणीश्च य: ।
न्यायी हि युक्तकारित्वाद्भक्तेष्वेव विशेषत: ।।

१- पा०अ० ३।२।६१
२- पा०अ० ८।४।३६

नेता - ओं नेत्रे नमः

समीरणः- ओं समीरणाय नमः

नियुक्तं करोतीति -नेता निर्वाहशीलः न्याय्यं हि निमज्ज्यनिस्तारणं महात्मानाम्"

स्वभिष्टचेष्टः - समीरणः

"ईर गतौ कम्पने च" अदादि चलनशब्दार्थादिकम्किञ्चु स्वम् पवनादयोपि उक्तार्थेषु

कृत्वा मीनमयीं सद्यः प्रविवेश रसातलम् ।
वेदमूर्तिस्ततो वेदानानिन्ये ब्रह्मणोन्तिकम्"

निरुक्ति-

"भक्तैर्नियुक्तं यत् कर्म नेता तत्करणादपि ।
भक्तेष्टचेष्टाशीलत्वात् समीरण उदाहृतः ।।

सहस्रमूर्धा- ओं सहस्रमूर्ध्ने नमः

विश्वात्मा - ओं विश्वात्मने नमः

सहस्राक्षः - ओं सहस्राक्षाय नमः

सहस्रपात् - ओं सहस्रपदे नमः

अथ एतद्क्रियावतारोज्जीवितासु पुरुषसूक्तादासु परविषासु यथा प्रतिपाद्यते तथा नुरूपाणि नामानि प्रस्तूयन्ते सहस्रम-असंख्येयाः मूर्धानः शिरांसि अस्येति - सहस्रमूर्धा ।

"सर्वतः पाणिपादं तत्सर्वतो क्षिशिरोमुखम्
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति"[1]

"तैश्चतत्कार्यज्ञानक्रियासामर्थ्यानिन्त्यं लक्ष्यते" इति अभियुक्ताः
औचित्यात् बहुशास्त्रान्तरसंगतेश्च"

"आभ्यां ज्ञानशक्तिभ्यां विश्वव्यापनात्" "विश्वात्मा" यथा
"स भूमिं विश्वतो वृत्वा"[2]

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ।।[3]

निरुक्ति

पाणिपादपदेज्ञानकर्मेन्द्रियनिदर्शके ।
तेनानन्तज्ञानकर्मा सहस्राक्षः सहस्रपात् ।
आभ्यान्च ज्ञानकर्माभ्यां विश्वात्मा व्यापनात्स्मृतः"

१- गीता १३।१३

२- पु०सू०

३- गीता १०।२०

आवर्तनो - ओं आवर्तनाय नम:

निवृत्तात्मा - ओं निवृत्तात्मने नम:

संसारचक्रयन्त्रम्, आवर्तयति- परिवर्तयतीति- आवर्तन: यथा-
तेनेदं भ्राम्यते ब्रह्मचक्रम्[1]

ईश्वर: सर्वभूतानां हृद्देशे ऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारुढानि मायया ।।[2]

'तस्माद्विराडजायत'[3]

त्रिपाद्विभूतिकत्वेन संसारविभूते:, निवृत्त: उद्गत: आत्मा स्वरुपं
यस्येति- निवृत्तात्मा ।

'त्रिपादूर्ध्वउदैत्पुरुष:'[4]

निरुक्ति-

त्रिपाद्विभूतिकत्वेन भवपादविभूतित:
उद्गतात्मस्वरुपत्वात् निवृत्तात्मे ति कथ्यते ।।

१- नार०

२- गीता १८।६१

३- पु०सू० ५

४- पु०सू०

संवृतम् - ओं संवृताय नमः

संप्रमर्दनः- ओं संप्रमर्दनाय नमः

तस्यां दशायाम् तमसः परस्तात्प्तनतया तामसानाम् मूढानां संवृतः - आवृतः गूढइति संवृतम् ।

संवरणं तमः स्वविद्यायां संप्रमर्दयतीति- संप्रमर्दनः ।

'तमेवं विद्वानमृतइह भवति'[1]

निरुक्ति-

तामसानां तु मूढानां गूढत्वात् संवृतस्स्मृतः'

तमसां विद्यायां सम्यह्० मर्दनात् संप्रमर्दनः ।

अहस्संवर्तको - ओं अहस्संवर्तकाय नमः

अहः -तदुपलक्षितं कालम्, हेतुत्वात्, संवर्तयति- परिवर्तयतीति अहस्संवर्तकः स्कन्नाम् 'ण्वुल्' युवोरनाकौ'

'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि'[2]

निरुक्ति-

अहरादितकालस्य परिवृत्तेश्च साधनम्'

अहस्संवर्तक इति प्राहुर्वेदान्तपारगाः ।।

१- पु०सू०

२- तै०ना० ६।२।८।

वह्निः - ओँ वह्नये नमः

देशरूपेण विश्वं वहतीति -वह्निः
"वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्" उणादि"
इति निप्रत्ययः प्रथमस्वदेशः परमाकाशः आपेदिको न्योगणान्
दिगादिस्तत्कोणे यथा,

अस्यामृतन्दिवि"[1]

निरुक्ति-

विश्वस्य देशरूपेण वहनाद् वह्नि रुच्यते ।

अनिलो - ओँ अनिलाय नमः

स्वर्मेणाम् अननात् उज्जीवनात् अनिलः
सलिकल्यनि०" इत्यादिना इलच् उणादि" अस्यकत्वप्रसिद्धो निलः

"प्राणाद्वायुरजायत"[2]

निरुक्ति-

"वहुलादेरननाद्योसा अनिलः परिकोर्तितः ।

१- पु०सू० ३

२- पु०सू० १४

धरणीधरः - ओं धरणीधराय नमः

अन्यदपि धारकं धारयतीति धरणीधरः ।

'सदाधारपृथिवीन्द्यामुतेमाम्'[1]

निरुक्ति-

भूतधात्र्याश्चधरणेर्धारणाद् धरणीधरः'

सुप्रसादः - ओं सुप्रसादाय नमः

स एवं संविधाय सम्मुखेण्शुशोभनः प्रसादः यस्येति सुप्रसादः

'तमक्रतुं पश्यति वीतशोको धातुः प्रसादात्'[2]

निरुक्ति-

प्रसादपरत्वाच्च सुप्रसादः प्रकीर्तितः ।

प्रसन्नात्मा - ओं प्रसन्नात्मने नमः

विश्वसृड्- ओं विश्वसृजे नमः

तत्कारणम् प्रसन्नात्मा स्वत स्वावाप्तकामतया रागाद्यनुपप्लुतमनाः

यथा-

'अविजिघत्सो पिपासः सत्यकामः सत्यसंकल्पः'[3] इति

१- का०४ पृ०१ अ०८

२- श्वे०उ० ३।२०

३- छा०उ० ८।१।५

गुणदोषमनपेक्ष्यदादिण्यात् विश्वंसृजतीति-विश्वसृक्

निरुक्ति-

विश्वं जात्सृजति यो विश्वसृक् स प्रकीर्तितः ।

विश्वभुग्विभुः - ओं विश्वभुग्विभवे नमः

सत्कर्ता - ओं सत्कर्त्रे नमः

तथैव व्याप्य भुनक्ति पालयतीति विश्वभुग्विभुः एकन्नाम यथा-एवं सपर्यादिपदापूमिकया सतः सत्कर्ता यथा-

"सज्जनप्रतिपूजकः" इति

निरुक्ति-

सत्सृष्टं व्याप्य वै भुन्जन् पालयन् विश्वभुग्विभुः ।

सत्कर्ता यस्स विज्ञेयः सज्जनप्रतिपूजकः ।

सत्कृतः - ओं सत्कृताय नमः

साधुः - ओं साधवे नमः

तैश्च श्रद्धार्पितेन स्वल्पेनापि स्वमहिमानुगुणेनेव अप्रतिपन्नप्रत्युपकारपरितुष्टतया सदकारि पूजित इति सत्कृतः ।

"मालाकारेण पूजितः"[1] इति

१- वि०पु० ५।१९।२६

तदपेक्षितवदूत्यसारथ्यादिसाधयतीति साधुः ।

"कृवापाजि०" इत्यादिना साधेरुण्" उणादौ

निरुक्ति-

जपादिभिस्सज्जनैर्यः पूजितस्सत्कृतस्स्मृतः ।
सेवां सारथ्यदूत्याद्यां साधु स्साधयतीति सः ॥

जह्नु- ओं जह्नवे नमः

अभक्तेभ्य आत्ममाहात्म्यमपन्हुत इति जन्हुः ।
"नारायणाय विद्महे"[1]
"नारायणपरं ब्रह्म"
"एको ह वै नारायण आसीत्"[2]

अथ दिव्यो देव एको नारायणः[3]

निरुक्ति-

अभक्तेभ्यात्ममहात्म्यनिन्हुतेर् जन्हु रुच्यते ।

१- तै० ६।१।२६
२- महोपनिषदि १
३- सुब० ६

नारायणो - ओं नारायणाय नमः

इति प्रतिशाखं परस्य वस्तुनो मूर्त्यन्तरव्यावर्तकतया निर्दिष्टमसाधारणन्नामाह- नारायणः श्रौतनिरुक्तम्

यच्च किंचित् इति वचनात् वर्णव्याप्तित्वात् नामधेय[१]

निरुक्ति

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायण स्मृतः

नरः - ओं नराय नमः

इदमेवगूढं व्याचष्टेः अनश्वरचिदचिद्विभूतिकतया नरः चिद्चिद्वर्गः अस्यास्तीति वा नरः ।

असंख्येयो - ओं असंख्येयाय नमः

तत्समूहास्यास्यासंख्येया इति असंख्येयः

निरुक्ति-

अगण्यनरसंघोयः सो संख्येयः प्रकीर्तितः

१- पु०सू०

अप्रमेयात्मा - ओं अप्रमेयात्मने नमः

विशिष्टः - ओं विशिष्टाय नमः

तेषामसंख्येयानाम् , एकैकशो ऽपि अप्रमेयानामनवधिकानामन्तर्बहिश्च व्याप्तत्वात् अप्रमेयात्मा ।

एवं एव तदनपेक्षावैलक्षण्यत्वात् विशिष्टः ।

निरुक्ति-

विलक्षणो विशिष्टो यत्सर्वांस्तान्नपेक्ष्य सः

शिष्टकृत् - ओं शिष्टकृते नमः

शुचिः - ओं शुचये नमः

अपितु स्वसंबन्धेन तान् स्वानुगुणकल्याणान् कुर्वन् अनाधेयदीप्तिः शिष्टकृच्छुचिः ।

निरुक्ति-

स्वानुकूलशुभान् कुर्वन् स्वसंबन्धेन तान् स्वयम् ।
अनाधेयमहादीप्तिः शिष्टकृच्छुचि रुच्यते ।।

सिद्धार्थः - ओं सिद्धार्थाय नमः

सिद्धसंकल्प - ओं सिद्धसंकल्पाय नमः

अथ यथोक्तोपपादनम् सिद्धार्थः ।

स्वत एव वावाप्तकामत्वात् तदुपरि सिद्धसंकल्पश्च स्वातन्त्र्येण प्रयुक्ततया स्वेच्छया साधितसर्वार्थ इत्यर्थः

'सत्यकामस्सत्यसंकल्पः'[१] इति

निरुक्ति-

सत्यसंकल्पवत्त्वाच्च सिद्धसंकल्प ईरितः ।

सिद्धिदः - ओं सिद्धिदाय नमः

सिद्धिसाधनः - ओं सिद्धिसाधनाय नमः

अणिमगरिमाद्याः सिद्धीः साधकेभ्यो ददातीति सिद्धिदः यस्य साधनमपि

ये तु धर्म्यामृतमिदम्[२] इति न्यायेन

अनुष्ठानवेलायामपि प्रियंकरत्वात् सिद्धिरूपम्, सः सिद्धिसाधनः

निरुक्ति-

सिद्धीर्ह्यणिमाद्यष्टसिद्धिदः कायदानतः ।

तत्सिद्धेरपि हेतुत्वात् सिद्धिसाधन ईरितः ।।

१- छा०उ० ८।१५।१०

२- गीता १२।२०

वृषाही - ओं वृषाहिणे नमः

निखिलमङ्गलाङ्कुरार्पणदिनत्वात् वृषरूपम् - धर्मरूपम् अहः यस्य प्रथमाभिगमनदिवसम् (वृषाहः) राजाहस्सिम्यष्टच्

तदस्यास्तीति वृषाही यथा-

"ता निशास्ते च दिवसाः" इत्यादि

"यथा पूर्वेण एतस्मिन्नह्न्यये अथ सौ यं गतो भवति"[1] इति च

वृषभो - ओं वृषभाय नमः

स्वमभिगच्छतो भवद्ध्यान् वर्षतीति वृषभः ।

"ऋषिवृषिभ्यां कित्" इति वृषेरभच् प्रत्ययः किद्भावश्च -

विष्णुः - ओं विष्णवे नमः

वृषपर्वा - ओं वृषपर्वणे नमः

एवं धर्मान् वेवेष्टीति विष्णुः

"विषॢ व्याप्तौ" धातु विषेः किच् इति णुः

तैस्तैरुपकारैरखिलं भावता न्यूनानां स्वव्यतिरिक्तानामविनाभावस्ता- विशिष्टो त्र व्याप्तिरभिमताः,

वृषाः वर्णाश्रमधर्माः ते तदारोहणसोपानपर्वाणीति वृषपर्वा ।

१- तै०आ० २।७

निरुक्ति-

विष्णु स्स्यादविनाभावाद्व्याप्यव्यापकभावत:
वृषा वर्णाश्रमा धर्मा: पवाण्यारोहणे तु ते ।
यस्य सन्ति सदा सो यं वृषपर्वा प्रकीर्तित: ।

वृषोदर: - ओं वृषोदराय नम:

वर्धनो - ओं वर्धनाय नम:

आराधकानां यथालब्धहविरादिभिस्सुपूरत्वेन सर्वातिस्पदत्वेन वा, धार्मिकोदरत्वात् वृषोदर: ।

मातृवत् तान् उदरे कृत्वा वर्धयतीति वर्धन: ।

वर्धमानश्च - ओं वर्धमानाय नम:

विविक्तस्र - ओं विविक्ताय नम:

तान् वर्धयन् स्वयमपि वर्धत इति वा स्वं प्राप्तैरर्ध्यवस्यत्समृद्धिरिति वा वर्धमान: ।

मातृवत् तान् उदरे कृत्वा वर्धयतीति वर्धन: ।

निरुक्ति-

भक्तैरुपाहृतां पूजामुपहारांश्च धर्मत: ।
वृत्वोदरे योजयति स वृषोदर उच्यते ।

निरुक्ति-

विष्णु स्स्यादविनाभावाद्व्याप्यव्यापकभावत:
वृषा वाणाश्च धर्मा: पर्वाण्यारोहणे तु ते ।
यस्य सन्ति सदा सो यं वृषपर्वा प्रकीर्तित: ।

वृषोदर: - ओं वृषोदराय नम:

वर्धनो - ओं वर्धनाय नम:

आराधकानां यथालब्धहविरादिभिस्सुपूरत्वेन सर्वातिस्पदत्वेन वा, धार्मिकोदरत्वात् वृषोदर: ।

मातृवत् तान् उदरे कृत्वा वर्धयतीति वर्धन: ।

वर्धमानश्च - ओं वर्धमानाय नम:

विविक्तश - ओं विविक्ताय नम:

तान् वर्धयन् स्वयमपि वर्धत इति वा स्वं प्रापैरर्थवस्यत्समृद्धिरिति वा वर्धमान: ।

मातृवत् तान् उदरे कृत्वा वर्धयतीति वर्धन: ।

निरुक्ति-

भक्तैरुपाहृतां पूजामुपहाराश्च धर्मत: ।
कृत्वोदरे योजयति स वृषोदर उच्यते ।

निरुक्ति-

प्रसन्नमरणो शुभमुजो यः सुमुज स्तु सः
परैर्दुर्वाऽरियंगो यो दुधीर स्स च कथ्यते ।

वाग्मी - ओं वाग्मिने नमः

तथा वेदात्मकतया जित्वह मधुरगम्भीर प्रियहिततया च प्रशस्यतया वाक् अस्यास्तीति वाग्मी ।

"वाग्विवृताश्च वेदाः"

"बुद्धिमान् मधुराभाषी पूर्वभाषी प्रियंवदः"
"वीर्यमेघस्वनः काले प्रगृह्य विपुलं भुजम् ।
अनर्मकृतमत्रस्तम निरस्तमसंकुलम् ।
राजीवनेत्रो राजानं हेतुमत्वाक्यमब्रवीत्" इत्यादि ।

निरुक्ति-

"वेदलक्षणवक्तृत्वाद् वाग्मी प्रियहितो वितत:" ।

महेन्द्रो - ओं महेन्द्राय नमः

एवं सर्वतोमुखं प्रभु तत्वात्, पूज्यपरमैश्वर्यः महेन्द्रः
इन्दि परमैश्वर्ये"
"ऋजेन्द्राग्र० इत्यादिना उणा० रन् प्रत्ययान्तो निपातितः।

निरुक्ति-

परमैश्वर्यवत्त्वेन महेन्द्र इति शब्यते ।

वसुदो - ओं वसुदाय नमः

एवं तत्वाप्यनभिभवनीयै महेन्द्रत्वेन महत्त्वे लघुभ्यो धनायद्भ्योधनं ददातीति वसुदः यथा-

निरुक्ति-

वसुदो धनदानाच्च धनायद्भ्यो विशेषतः"

वसुः - ओं वसवे नमः

नैकरूपो - ओं नैकरूपाय नमः

गरीयसां स्वयमेव धनमिति वसुः ।

अथ धर्माविमहिमो चितवैश्वरुप्यम्, तत्सर्वप्रतीतियोग्यरुपः नैकरुपः।

"नभ्राण्णपात्[1]" इत्यत्र नभ्राट् ग्रहणस्य प्रदर्शनार्थत्वात्, नञ् समासस्य महाविभाषया विकल्पितत्वाबो नलोपाभावः एवं नैकमाय इत्यादयः ।

"विश्वरुपाय" इति मन्त्रवणात्

निरुक्ति-

तत्तज्जनज्ञानयोग्यं रुपं यस्य विशेषतः ।

नैकरुप समुदिष्टः सर्वप्रत्ययगोचरः ।।

१- पा०अ० ६।३।७५

बृहद्रूप: - ओं बृहद्रूपाय नम:

शिपिविष्ट: - ओं शिपिविष्टाय नम:

एष्वेकैनेव दिव्योमावकाशं व्याप्नुवत् बृहद्रूपमस्येति बृहद्रूप: शिपय: रश्मय:,तान् संप्रविष्ट: व्याप्तवानिति शिपिविष्ट: यास्क: ।

प्रकाशन: - ओं प्रकाशनाय नम:

ओं ओजस्तेजोद्युतिधर:

स्वमेव दिव्यं रुपं दिदृक्षुभ्यो कुन्तादिभ्यो वा प्रकाशयतीति प्रकाशन: यथा-

"दिव्यन्ददामि ते चक्षु: पश्य मे योगमैश्वरम्"[1]

(ओज:) बलम् (तेज:) पराभिभवनसामर्थ्यम्,कीर्तिर्वा,(द्युति:) औज्ज्वल्यम्,तानि धरतीति- ओजस्तेजोद्युतिधर: ।

प्रकाशात्मा - ओं प्रकाशात्मने नम:

प्रतापन: - ओं प्रतापनाय नम:

ऋद्धम- = ओं ऋद्धाय नम:

प्रकाशात्मा यथा धृतराष्ट्र:

"त्वमेव पुण्डरीकाक्ष सर्वस्य जगत: प्रभु: ।[2]

तस्मान्मे यादवश्रेष्ठ प्रसादं कर्तुमर्हसि ।।

१- गीता ११।८

२- मा०उ०

भासस्तवोग्राः प्रतपन्ति" इति प्रतापनः

एवम् कृष्णुकृत्यावर्णानां वक्ष कदः ।

स्पष्टाक्षरो - ओं स्पष्टाक्षराय नमः

अनयथ्याप्रतिपाद्यता स्पष्टीकृतवेदाक्षर इति स्पष्टाक्षरः ।

निरुक्ति-

स्पष्टीकृताश्च वेदाणां यस्मात् स्पष्टाक्षरो मतः

मन्त्रः -ओं मन्त्राय नमः

चन्द्रांशुः ,- ओं चन्द्रांशवे नमः

भास्करद्युतिः - ओं भास्करद्युतये नमः

परेषां परिभावुकप्रभावत्वात् भास्करद्युति यथा-

"रक्षांसि भीतानि दिशो द्रवन्ति"[1]

निरुक्ति-

परप्रभावाभिभवदाणद्युतिमांश्च यः ।

स भास्करद्युतिः प्रोक्तो मैत्रैर्मलयदो मनुः ।

१- गीता ११। ३६

अमृतांशूद्भवः - ओं अमृतांशूद्भवाय नमः

भानुः - ओं भानवे नमः

शशबिन्दुः - ओं शशबिन्दवे नमः

एव च शशानाम् -कुटिलगतिनां बिन्दुः अपलपितेति -शशबिन्दुः

"शशप्लुतौ" शशानां कुटिलगतिनाम्" बिन्दुः अपलपिता

"विदि अवयवे" "बिन्दुरिच्छुरित्युप्रत्ययान्तौ निपातितः"

सुरेश्वरः - ओं सुरेश्वराय नमः

औषधम् - ओं औषधाय नमः

तथा ककुत्सिनाम् निर्वाहकः सुरेश्वरः ।

भवरोगविनाशहेतुभावत्वात् औषधम् यथा -

" देवा देवभिषक्वेव यं बिन्दुदुरवमेणजम्" इत्यादि

कालनेमि:-

सत्यधर्मपराक्रमः - ओं सत्यधर्मपराक्रमाय नमः।

एवंविधाः धर्माः कल्याणगुणाः पराक्रमाः चेष्टितानि च,

सत्याः-अवितथाः यस्य सः सत्यधर्मपराक्रमः ।

चतुर्थ शतक

चतुर्थो ध्याय:

युगादिकृद् - ओं युगादिकृते नमः

युगावर्तः -

नैकमायः -

अथात्मयाथिश्वर्यत्वम् तत्र न्यग्रोधशायुपलतार उदाहरणम्

युगस्यान्ते पि आदिं करोतीति- युगादिकृत् ।

स खलु संवर्ते पि प्रलयात् अनुपप्लुतं जगत् प्रवर्तितवान् स्वकर्मव्य-

वस्थया, कृतादियुगानां पौनः पुन्येन आवर्तनात् युगावर्तः ।

मुग्धशिशुरूपापरिमितजगन्निगरणनिरालम्बनैकपदकवटदलशय-

नाधनैकातक्र्यश्वर्यं -नैकमायः ।

न च मिथ्यावचनो यं माया-शब्दः तद्धेपि प्रयोग भूयस्त्वात्

तथाहि -

"माया तु प्रकृतिं विद्यात्"[1]

"मायावयुनं ज्ञानम्"

"विश्वानि देव ? वयुनानि विद्वान्" इति च ज्ञानेः,

"माङ० माने"

निरुक्ति-

फल्व्यिवस्थया स्वस्य युगावर्तनान्मुहुः ।

युगावर्तः समाख्यातः कालरूपधरो हरिः" ।

१-श्वे०उ० ४।१०

महाशन: - ओं महाशनाय नम:

अदृश्यो - ओं अदृश्याय नम:

महत् अशनं निखिलजगन्निगरणम् अस्येति- महाशन:

अतर्क्यवृत्तान्ततयादृश्य: दृष्टुं शक्य: नेति अदृश्य: ।

ऋदुपधाच्चाक्लृपिचृते:[१] इति क्यप् ।

निरुक्ति-

भुवनानान्निगरणात् महाशन् इतीरित: ।

अतर्क्यवृत्तान्ततया जात: प्रत्येपि य: ।

न कश्चिच्चिन्त्यमानोपि सो दृश्य इति कथ्यते ।।

व्यक्तरूपश्च - ओं व्यक्तरूपाय नम:

अथ च, किल्यान्न मार्कण्डेयादेस्तत्र दिव्यविग्रहतया व्यक्तं रूपम् यस्य इति व्यक्तरूप: ।

१- पा०अ० ३।१।११०

<u>सहस्रजित्</u> - ओं सहस्रजिते नमः

सहस्रयुगसंख्यं कल्पान्तं शयनो जयतीति- सहस्रजित्।

"यावद्युगानां विप्रर्षे सहस्रं परिवर्तते।
तावत् स्वपिमि"[1] इत्यादि

<u>निरुक्ति-</u>

सहस्रयुगसंख्यातं सर्वकल्पान्तमेव हि।
शयान एव जयति सहस्रजिदिति स्मृतः।

<u>अनन्तजित्</u> - ओं अनन्तजिते नमः

<u>इष्टः</u> - ओं इष्टाय नमः

<u>अविशिष्टः</u> - ओं अविशिष्टाय नमः

परिमितशिशुरूपस्यास्य कश्चित् कदाचित् कथञ्चिदपि, महिमावधि-क्रमणं नास्तीति अनन्तजित्।
स्वमुदर्शन पुंसुस्थैरपि अविशेषेण जयितृत्वान्विल इति इष्टः
अविशिष्टः तथा।

<u>निरुक्ति-</u>

इष्टो विशिष्टः कथितः सर्वरक्षणतत्परः।

१- भार०व० १८९।४१

शिष्टेष्टः - ओं शिष्टेष्टाय नमः

पण्डितागृण्या मार्कण्डेयादिनां परमपुरुषार्थत्वेन इष्टः शिष्टेष्टः तत्रैव च -

आसीनं तं नरव्याघ्रं पश्याम्यमितौजसम्[1] इति

शिखण्डी - ओं शिखण्डिने नमः

अपरिमिताप्रधृष्यमैश्वर्यं परं तेजश्शिखण्डरूपातिशयितमिति-शिखण्डी

"अतिशायने[2] ०" इति इनिः

निरुक्ति-

यत्प्रधृष्यमैश्वर्यं परं यदेव आस्थितम् ।
तच्छिखण्डन्तु यस्यास्ति स च्छिखण्डीति चदाते ।।

नहुषो - ओं नहुषाय नमः

वृषः - ओं वृषाय नमः

तथा स्वमायया जीवान् नह्यति बध्नातीति नहुषः इति स एव अमृतोपमया स्वकान्त्या वाचा च तादृशा, सागरोदरानुक्रान्तं मार्कण्डेयमाश्वासयन् वर्षति-सिञ्चति इति वृषः ।

१- मा०आ० १८८।१२४

२- पा०सू० ५।३।५५

निरुक्ति-

स्वदेहकान्त्या याथापि सम्यगास्वासन्मुहुः ।
बहुशस्सिन्चति तु यः कृष्ण स्वपरिप्लुते ।।

क्रोधहा

क्रोधकृत- ओं क्रोधकृते नमः

कर्ता - ओं कर्त्रे नमः

विश्वबाहु - ओं विश्वबाहवे नमः

तथा विप्रक्रोधहेतोः कार्तवीर्यस्यच्छेता कर्ता यथा-

"निःक्षत्रियां यश्चकार मेदिनीम्" इति
एवं कण्टकोद्धारेण विश्वस्मै बाहू यस्य सः विश्वबाहुः ।

महीधरः - ओं महीधराय नमः

एवं भारावतरणेन महीं धरे इति महीधरः ।

निरुक्ति

भारावतरणं कृत्वा गां धरे स महीधरः ।

अच्युत:

प्रथित: – ओं प्रथिताय नम:

पूर्ववत् ।

तथात्वेन पृथ्वी प्रसिद्धो भवति इति प्रथित: ।

"तस्य नाममहधश:"[1]

निरुक्ति–

"अच्युतत्वेन लोकेस्मिन् प्रख्यात: प्रथित: स्मृत:"

प्राण: –

प्राणदो –

पूर्ववत् ।

वासवानुज: – ओं वासवानुजाय नम:

अपान्निधि: – ओं अपान्निधये नम:

अमृतार्थिनं वासवमनु तत्संविधानाय जात इति वासवानुज: ।

"जनो कर्मणि"[2] इति ड:"

१– ऋ० २।१।५

२– पा०अ० ३।२।१००

वज्ञ्युत:

पृथिश: - ओं पृथिशाय नम:

पूर्ववत् ।

तपात्वेन पृथी प्रसिद्धो भवति इति पृथिश: ।

'तस्य नामम्हयत्[1]'

निरुक्ति-

'वञ्युतत्वेन लौकेस्मिन् प्रख्यात: पृथिश: स्मृत:'

प्राण: -

प्राणदो -

पूर्ववत् ।

वासवानुज: - ओं वासवानुजाय नम:

अपान्निधिर् - ओं अपान्निधये नम:

अमृतार्थिं वासवमनु तत्संविधानाय जात इति वासवानुज: ।

'अनो कर्मणि[2]' इति ड:'

1- ऋ० २।१।५

2- पा०अ० ३।२।१००

मथ्यमानमहार्णवविधारणात् अपान्निधि:

निरुक्ति-

"वासवस्यानुजत्वेन जातत्वाद् वासवानुज: ।
अपान्निधि मंथ्यमानमहार्णवविधारणात्" ।।

अधिष्ठानम् - ओंअधिष्ठानाय नम:

मन्दराद्रे रधिष्ठानं भ्रमतो भून्महामुने" इति वाधिष्ठानम् ।

निरुक्ति

भ्रममाणं मन्दराद्रिं धृतवान् यो महाजले
अधिष्ठानं तमेवाहुराधिष्ठान प्रकीर्तनु: ।।

अप्रमत्त: - ओं अप्रमत्ताय नम:

प्रतिष्ठित: - ओं प्रतिष्ठिताय नम:

एवं विधान त्राणेषु अप्रमत्त: अत्यन्तसावहित:
स्वयमन्यानपेक्षया स्वे महिम्नि प्रतिष्ठित: ।
"स भाव: क्व प्रतिष्ठित"[1] इति
"स्वे महिम्नि स्थितं देवम्"[2] इति च ।

निरुक्ति-

स्वे महिम्नि स्थितो यस्तु स प्रतिष्ठित उच्यते ।

१- छा०उ० ७।२४।१

२- विष्णुपुराणे ।

स्कन्द: - ओँ स्कन्दाय नम:

स्कन्दधरो - ओँ स्कन्दधराय नम:

स्वयमसुरादीन् स्कन्दयति शोषयतीति स्कन्द: ।

तादृश सुरसैनान्यमपि धरत इति स्कन्दधर: सोँ पि हि, तस्य विभूति: ।

निरुक्ति-

असुरादीन् शोषयति स्कन्द: स्कन्दयतीति य: ।
स स्कन्दधर आख्यात: षडाननविधारणात् ॥

धुर्य:

वरदो

धुरं भुवनभारं वहतीति धुर्य:
अन्येभ्यो पि लोककार्यधुर्येभ्यो देवेभ्य: तांस्तान् वरान् ददातीति वरद: ।

वायुवाहन: - ओँ वायुवाहनाय नम:

वायुवाहन: जगत्प्राणं वायुं वाहयतीति

निरुक्ति-

जगत्प्राणं वहति यो वायुवाहन उच्यते ।

आदिदेवः -

पुरन्दरः

अशोकः - ओं अशोकाय नमः

आध्यात्मिकानां शोकमोहाशनायादीनां विरोधी - अशोकः ।

तारणः - ओं तारणाय नमः

तारः - ओं ताराय नमः

शूरः - ओं शूराय नमः

आधिभौतिकेभ्यश्च वैरिचोरव्याघ्रादिभयेभ्यस्तारयतीति तारणः ।

तारः संसारभयतो नित्यं तारयतीति सः ।

"गर्भजन्मजरामरणसंसारसागरमहाभयात्तारयतीति तस्मदुच्यते तारः इति।

यद्विजिगीषुत्वम्, तदुच्यते शूरः समर्थः जैत्र इति शूरः ।

"शु गतौ" "शुसिचिमीनां दीर्घश्च" क्रन् प्रत्ययो दीर्घश्च ।

शौरिः - ओं शौरये नमः

यद्विशेषतो भक्तान्प्रति गमनं तत्प्रदर्श्यते शूरस्य वसुदेवस्य अपत्यमिति शौरिः ।

"अत इञ्"[१]

१- पा०अ० ४।१।९५

अनीश्वरः

अनुकूलः

शतावर्तः - ओं शतावर्ताय नमः

तथा शतम् आवर्तविशेषाः अतिवेलत्वेऽप्यनुवेलो ध्रियमाणतया संकलितपरमसमुद्रवत्तरंगावर्तवत् तद्रूपकल्याणैश्वर्यविजृम्भितानि, अस्येति - शतावर्तः ।

पद्मी - ओं पद्मिने नमः

एवं वासुदेवस्य गुणतो विवृतत्य, रूपतोपि विव्रियते, लीलापद्मेन नित्ययोगात् पद्मी ।

पद्मनिभेक्षणः -

पद्मनाभो

अम्लानमलास्कालनिभं अमापहवंक्षणमस्येति पद्मनिभेक्षणः ।

पद्मनाभः पूर्ववत् ।

अरविन्दाक्षः - ओं अरविन्दाक्षाय नमः

अरविन्दसुन्दरे अक्षिणी अस्येति अरविन्दाक्षः ।

निरुक्ति-

रक्तारविन्दनयन स्त्वरविन्दाक्ष ईरितः ।

पद्मगर्भः

शरीरभृत्

स्वसकृतेन सुरभिकोमलेन आसनपद्मेन उपासकमानसतरसिजेन वा गर्भितं स्यान्तारवस्थाप्यत् इतिपद्मगर्भः ।

"दहरं पुण्डरीकं वेश्म"[1] इत्यादि ।

"सरसिजासनसन्निविष्टः

इदृशेन शुभाश्रयेण स्वशरीरभूतमुपासकं पुष्णातीति शरीरभृत् उपास्यगुणैर्हि तेषां पोषः ।

महर्द्धिः - ओं महर्द्धये नमः

ऋद्धः -

अथ विभूतितोऽपि स एव विशिष्यते, उभयविभूतिमत्तया निस्सीमविभूतिः महर्द्धिः तत्समृद्ध्या यत्समृद्ध स्तदृद्ध उच्यते ।

वृद्धात्मा - ओं वृद्धात्मने नमः

महाक्षः - ओं महाक्षाय नमः

गरुडध्वजः -ओं गरुडध्वजाय नमः

एवं महान्तं महिमानं चुलक्यन्निव वृद्धः -प्रवृद्धः आत्मा स्वरूपम् वृद्धात्मा महाक्षः महान्पूज्यः अक्षो यस्य सः महाक्षः वहनेन रथावयवसाम्यात् अक्षः त्रयीमयः तार्क्ष्यः, स हि गरुडवाहनस्य औपवाह्यः ? स एव ध्वजो यस्य सः गरुडध्वजः तद्धि, सर्वेश्वरस्यासाधारणं चिह्नम् ?

1- छा० ८।१।१

<u>अतुलः</u> – ओं अतुलाय नमः

<u>शरभो</u> – ओं शरभाय नमः

<u>भीमः</u> – ओं भीमाय नमः

इत्थमप्रतिमतया नास्ति तुला उपमा यस्येति अतुलः ।

स्वमर्यादातिवर्तिनः शृणातीति शरभः ।

अतः तं तस्मात् बिभ्यतीति भीमः

"भियष्षुग्वा" इति मक् प्रत्ययः उणादि[1]

"भीमादयोऽपादाने" इत्युक्ता हि, वाय्वादयो देवाः स्वमर्यादां नातिवर्तन्ते यथा-

"भीषाऽस्माद्वातः पवते"[2]

"यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतम्महद्भयं वज्रमुद्यतम्"[3]

<u>समयज्ञो</u>

<u>हविर्हरिः</u>

अग्न्यादीनां च समयमुल्लङ्घ्य ज्वलनादिकम् यो जानात्यधिकारं च

समयज्ञः स कीर्तितः ।

१- पा०सू० ३।४।७४

२- तै०उ० ८

३- कठो० २।६।२

समग्रं श्रुतिसिद्धं यो ज्ञात्वा तेभ्यः श्रियं मुदा ।
तदै हुतं हविस्तेभ्य दीयते स हविस्स्मृतः ।
हरतीति हरिर्विष्णा नन्दादानेषु नित्यशः ।
हविर्हरि रिति प्रोक्तो ह्यष्टाणस्त्रैकलागतः ॥

सर्वकारणकारणो - ओं सर्वकारणकारणाय नमः

अथ लक्ष्मीपतिमूर्तिः -[illegible]-
[illegible] सर्वकारणकारणः ।

लक्ष्मीपरत्व विद्भिः

लक्ष्मीवान् - ओं लक्ष्मीवते नमः

[illegible]
[illegible] ।
[illegible] ।
[illegible] ।

[illegible] ।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

यथोक्तभक्तप्रणयादारणात् विदार:।

कमलाभनित्वात् रौहित:

उपासकैमार्ग्यते इति मार्ग:।

दामोदर: - ओं दामोदराय नम:

सह: -

सकललोकाधारतया आत्मविचनानुसारात् दामानि लोका: उदरे यस्य इति वा तदनुसारादेवप्रकाशितत्वदमगुणयोगात् वा, इत्थं लक्ष्मीस्पृहणीय-चातुरी कल्पेपि, संचितमात्सत्यात्, यशोदादामनि गलितजलतया, दामानि रज्जव: उदरे अस्येति वा दामोदर:।

दामानि लोकनामानि वान्ति यस्योदरान्तरे।

तेन दामोदरो देव:, इति।

महीधर: - ओं महीधराय नम:

महाभाग: - ओं महाभागाय नम:

स एव भूभारधरणेन महीधर:।

वल्लवीनीलामोक्षादष्ट दिव्यकन्यका रुक्मिणी सत्यभामाजाम्बवती-प्रभृतीनां स्वयंवरसौभाग्यवत्त्वात् महाभाग:।

वेगवान् - ओं वेगवते नमः

अमिताशनः - ओं अमिताशनाय नमः

मनुष्य धर्मोऽहि पार्थे ऽपि दुर्वारपरमैश्वर्यप्रसरत्वात् वेगवान् अतिशायने मतुप् ।

इन्द्राय कल्पितं गोपैरमितं चाशनं स्वयम् ।
भुक्तवान्यस्य निश्शेषं प्रोच्यते सोऽमिताशनः ।

उद्भवः - ओं उद्भवाय नमः

क्षोभणः -

स्वदासबन्धानुबन्धायिनं भवबन्धनिकृन्तनेन उद्गतो भक्तोऽस्मादिति उद्भवः अन्यान् बन्धाहान्, बन्धनान्वे प्रकृतिं क्षोभयतीति क्षोभणः ।

देवः -ओं देवाय नमः

श्रीगर्भः - ओं श्रीगर्भाय नमः

परमेश्वरः - ओं परमेश्वराय नमः

मायापाशेन व्याघ्रराहादिवत् जीवान् बध्वा, दीव्यति क्रीडतीति देवः। स्वप्रायभोगक्रीडासाहित्येन वर्तनीया[१] स्य श्रीरिति श्रीगर्भः ।

'विष्णोरेषा नपायिनी'

१- वि०पु० १

एवं लक्ष्मीस्वयंवृत्तसम्प्रयोजनपरमैश्वर्यः परमेश्वरः यथा ।

<u>करणं</u>–

<u>कारणं</u>

<u>कर्ता</u>

स्वप्राप्तेः साधकतमत्वात् करणं ।

ज्ञानकरणानां श्रवणनयनादीनां क्रियाकरणानां करचरणादीनाञ्च एतच्छक्तिशालितः करणत्वम्, यथा –

'चक्षुश्च द्रष्टव्यञ्च नारायणः' श्रोत्रं श्रोतव्यं च नारायणः'

तैस्तैरस्तत्तत्कारयतीति कारणं दैवतम्

कर्ता– पूर्ववत्

<u>विकर्ता</u>

<u>गहनो</u>

<u>गुहः</u>

स्वार्थहर्षशोकाद्यभावेऽपि परार्थतत्कल्पानेन हर्षशोकादिभि- विकृतानितया विकरोतीति– विकर्ता ।

एवं सर्वेषां ज्ञानायतनभोगतदुपकरणस्वरूपेण तदभिन्नतत्त्वाभि- मानात्मके महागुणे गहनः अतिभूमिः ।

रमतीति गुहः सूतः ।

<u>व्यवसायो</u> - ओं व्यवसायाय नम:

अतिशयेन सीयते बध्यते ऽस्मिन् ज्योतिश्चक्रमिति व्यवसाय: अधिकरणे घञ्, ध्रुवाधारशिंशुमारशरीरत्वात्, अतो हि 'गगनमूर्तये' इति मन्त्रकृतं दैवम्' इतिलक्षयानम्'

<u>व्यवस्थान:</u> - ओं व्यवस्थानाय नम:

<u>संस्थान:</u> - ओं संस्थानाय नम:

<u>स्थानदो</u> - ओं स्थानदाय नम:

तस्मिन् काल: कलामुहूर्तादिरात्मा तत्रैव व्यवतिष्ठत् इति व्यवस्थान: । सर्वे तस्मिन् संतिष्ठन्ते समाप्यन्ते इति संस्थान: स एव "परमपदप्राप्तिहेतवे" इति मन्त्रवर्णात् स्थानद: ।

<u>ध्रुव:</u> - ओं ध्रुवाय नम:

<u>परर्द्धि</u> - ओं परर्द्धये नम:

स खलु उत्तानपादपुत्रेनावाचीनं ध्रुवमपि ध्रुवीचकार अतो ध्रुव: अस्य सर्वव्यापकत्वं तत्त्वम् ।

अथ मृतसंजीवनं रामवृत्तान्त: प्रस्तूयते, परस्यापि स्वस्य अवरतत् एकगुणैकदेश निदर्शनकरणेन सर्वैश्वर्यादपि परा अतिशयिताऋद्धि: कल्याण-गुण समृद्धि: अस्येति परर्द्धि: ।

परमस्पष्ट:

तुष्ट:

स्पष्टप्रत्ययादुष्टस्यपारम्य: ,यथा

व्यक्तमेष महायोगी परमात्मा सनातन:[1]

सकलमनुष्याद्यधिकार दाशरथित्वजात्यात्मलाभेन अधिकृताधिकारात् परत्वादपि अतिशयेन तुष्यति प्रीणातीति तुष्ट: ।

पुष्ट: -

शुभेक्षण:

एवं महागुणै: परिपूर्ण: पुष्ट: ।

एवं विधैश्वर्यशीलिता विशदस्निग्धशीतलविशालोदारदीर्घराजीवलोचन: शुभेक्षण: ।

रामो - ओं रामाय नम:

विरामो - ओं विरामाय नम:

सर्वैर्गुणैर्वशीकृतै: रम्यते अनुरज्यते स्मिन् इति वा तद्वशीकृतैष्वयं रमते रज्यतीति वा राम: यथा-

रामो रमयतां श्रेष्ठ[2]

गुणाभिरामं रामं च[3]

१- रा०यु० ११४।१४

२- रा०अ० ५३।१

३- भा०सं० ५८।४२

पञ्चम शतकम्

पंचमी ध्याय:

अनघ: - ओं अनघाय नमः

स एव अशुद्धिमः न नयो स्यासीदिति अनघ: यथा रावणेन-

निरुक्ति-

अशुद्धिमनयो यस्य नास्ती त्यनघ उच्यते ।
अथवा जगतां यस्मान्नयोस्ती त्यनघो मता ।।

वीर: - ओं वीराय नमः

शक्तिमतां श्रेष्ठ- ओं शक्तिमतां श्रेष्ठाय नमः

रक्षसामतिभयचलनहेतुत्वात् वीर:

शक्तिमतां सुरादीनामतिशयेन प्रशस्य इति शक्तिमतां श्रेष्ठ: यथाह

परशुपरिकर्मा राम:

"अहायं मधुहन्तारं जानामि त्वां सुरेश्वरम्"[१]

धर्मो - ओं धर्माय नमः

धर्म विदुत्तम:

अभ्युदयानि:श्रेयसाभ्यां सर्व साधादधरीति धर्म: ।

"अर्तिस्तुसुहसुधृदिदाभायावापदियद्दिनी" भ्यो इति मन् प्रत्यय:

"ब्रह्मविदां वर: लोकानां त्वं परोधर्म:"[२] इति लक्ष्मणश्च धर्मवित्सु

धर्मज्ञेषु तेभ्यो वा,उत्तम: उत्कृष्टतम: इति धर्मविदुत्तम: ।

१- रा०वा० ७६।१७

२- रा०सुं० १२०।१४

यथा-

सर्वदा भिगतस्सद्भिः समुद्र इव सिन्धुभिः[1]

निरुक्ति-

वसिष्ठाद्युपजीव्यो यो धर्मे धर्मविदुत्तमः ।

वैकुण्ठः - ओं वैकुण्ठाय नमः

सर्वेषां संश्लेषयिता वैकुण्ठः

'कुठि गतिप्रतिघाते' स चात्र संश्लेषविघातः स च विगतो येषान्ते विकुण्ठाः तेषामेषः वैकुण्ठाः ।

'मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना ।
वायुश्च तेजसा सार्धं वैकुण्ठत्वं ततो मम ।।[2]

पुरुष - ओं पुरुषाय नमः

स यत् पूर्वोऽस्मात् सर्वस्मात् पाप्मन ओषत्तस्मात्पुरुषः इति परमपावनत्वात् पुरुषः ।

'पावनस्सर्वलोकानां त्वमेव रघुनन्दन'[3]

'पॄ पालनपूरणयोः'

'पुरः कुषन्' इति कुषन्प्रत्ययान्तो पुरुषः सद्दिरामस्सर्वथा पुरुष इष्यते ?

१- रा०सं० १६

२- भा०शा० ३४३।५०

३- रा०उ० ८२।६

प्राण: - पूर्ववत्

प्राणद: - पूर्ववत्

प्रणाम: - ओं प्रणामाय नम:

पृथु: - ओं पृथवे नम:

"प्रणामयति"

इति श्रौत्या निरुक्त्या स्वगुणैश्चराचरनामनात् प्रणाम: ।

"हृदयान्याममन्थेव जनस्य गुणवत्तया"[1]

यशोविस्तारवत्तया, प्रथते प्रख्यातो भवतीति- पृथु:

"प्रथ प्रख्याने" कु प्रत्यय:

"पृथुश्री: पार्थिवात्मज:"[2]

"रामो नाम जनै: श्रुत:"

निरुक्ति-

यशोविस्तारवत्त्वाच्च पृथु रित्युच्यते बुधै: ।

हिरण्यगर्भ: - पूर्ववत्

शत्रुघ्नो- ओं शत्रुघ्नाय नम:

"शत्रुमिन्द्रियवर्गं विवेकशरै: विषयेषु विदोषणात्मेना रावणवत्

हन्ति शमयतीति शत्रुघ्न: ।

१- रा०बा० २५।२

२- रा०सुं०८

'अमनुष्यकर्तृके च'[1] इति टक् 'गमहन०' इत्यादिना उपधालोप:

'हो हन्ते'[2] इति कुत्वम्

दशेन्द्रियाननं घोरं यो मनोरजनीचरम् ।
विवेकशरजालेन शमन्नयति योगिनाम् ॥[3]

व्याप्तो -ओं व्याप्ताय नम:

वायुर् - ओं वायवो नम:

शत्रुमित्रादिषु वात्सल्याविशेषात् व्याप्नोतीति- व्याप्त:
स्वयमेव तत्र तत्र तांस्तान् यातिगच्छतीति वायु:

अधोक्षज:

ऋतु-

स्वममृतोदधिवत् स्वैस्वदोप्युज्यमानोपि, निरुक्तानुसारात् अधो न क्षीयते जात्विति वा जातु अधोक्षीयमाण: प्रादुर्भूत् इति वा अधोक्षज:

यथा-

'अक्षाद्यं मधुहन्तारं जानामि त्वां सुरोत्तमम्'[4]
ऋच्छतीति ऋतु: प्रोक्त: सर्वोल्लासकरैर्गुणै:'

१- पा०अ० ३।२।५३
२- पा०अ० ७।३।५४
३- सात्वतसंहितायाम्
४- बा० ७४।१७

<u>सुदर्शन</u>

<u>काल:</u>

गुणप्रभावानभिज्ञानामपि दर्शनमात्रमेवास्य शोभनमिति सुदर्शन:
यथा- स्वमूर्तिगुणैरात्मनि चराचरसंकलनात् काल: ।

<u>परमेष्ठी</u> - ओं परमेष्ठिने नम:

<u>परिग्रह:</u>

<u>उग्र:</u>

<u>संवत्सरो</u>

<u>दक्षो</u> -

इत्थं राक्षसाखेटकेन, जगत्संरक्षणेन च अत्र विहृत्य पुनश्च परमे
स्थाने तिष्ठतीति परमेष्ठी ।

"परमे कित्" इति इनि प्रत्यय:
"अम्बाम्ब०"[1] इत्यादिना षत्वम्
"हलदन्तात्"[2] इति सप्तम्या अलुक् यथा

स्वधर्मेण महाबाहुरिक्ष्वाकुकुलवर्धन: ।
रावणं सगणं हत्वा दिवमाक्रमिता प्रभु: ।।

१- पा०ऊ० ८।३।९७

२- पा०ऊ० ६।३।९

विश्रामो -

विश्वदक्षिण:

अथ शीलदुस्साधासाधुसाधकस्संहाराधिकार: पातालशयन: कल्कौ च युगावसाने पापातिप्रसंगिषु संकीर्णवर्णाश्रमव्यवस्थेषु विश्राम: ।

अपचरत्तु कथं हितकारी ? तत्राह विश्वदक्षिण: विश्वस्मिन्निष्टा - निष्ट कारिण्यविशेषेण दक्षत इति विश्वदक्षिण: ।

विस्तार: - ओं विस्ताराय नम:

कलिप्रबलसंहारेण कृतं प्रवर्तयतो स्वाच्छेदमर्यादा प्रथत इति विस्तार: ।

अर्थो - ओं अर्थाय नम:

अनर्थो - ओं अनर्थाय नम:

एकमक्ते विशिष्टाधिकारिण स्सम्यग्ज्ञानिनस्स्वयं प्रयोजनत्वात् अर्थः

"उषिकुषिगार्तिभ्यस्थन्"[1] इति थन् प्रत्यय:

मन्दसुकृतेनार्थिना निर्व्याजं नार्थ्यत इति अनर्थ: ।

स ह्यर्थव्याजेनैनमर्थ्यते यथा-

"अर्थकपिञ्जल" इति

"ये च शिष्टास्त्रयी भक्ता: फलकामा हि ते मता:" इति च ।

१- वि०ध० ४३।४७

महाकोशो - ओं महाकोशाय नमः

महाभोगो - ओं महाभोगाय नमः

महाधनः - ओं महाधनाय नमः

सदा सर्वेभ्यस्सर्वथा दानेप्यदायत्वात्, महान्तः शङ्खपद्मादिनिधिरत्नाकररोहणगिरिखिरादयः कोशाः भाण्डागाराणि, यस्येति महाकोशः अर्थाढ्यः।

काम भोगोपि महानस्मादिति महाभोगः।

अनिरुप्याति कृपणप्रदेयमनन्तं धनमस्येतिमहाधनः सर्वं चैतत् प्रहलादः प्राह।

स्थविष्ठो -ओं स्थविष्ठाय नमः

भूर् - ओं भुवे नमः

धर्मयूपो - ओंधर्मयूपाय नमः

अथ अनिर्वेदोदाहरणम्- तत्र श्रुतिपुराणप्रसिद्धशिशुमाराकृतिताराप्रकारेणाति स्थूल इति स्थविष्ठः।

ध्रुवानुबन्धेन अवधारो भवतीति भूः।

'तस्य पुच्छे ध्रुवः स्थितः'[1] इति

धर्मतत्त्वं शिरोवयवतया यौतीति - धर्मयूपः

'यु मिश्रणे' धातुः 'कुयुभ्यान्च' इति पप्रत्ययः बहुलवचनाद्दीर्घश्च

'धर्मो यूपनिभाश्रितः'.

१- विष्णुपुराणे

महामख:

नक्षत्रनेमिः

धर्मशरीरतया पूज्यो यज्ञो स्यात्स इति महामख: यथा

'यज्ञो धर्मश्च विज्ञेय: इति ।
यन्नक्षत्रात्मकं चक्रं ज्योतीरूपमनामयम्
यस्मिन्नित्यं भ्रामयति भ्रमन्तमनुयाति च
नक्षत्रनेमि विज्ञेयो नवाणां भ्रमनायक: ।

धाम: - ओं धामाय नम:

धाम: - ओं धामाय नम:

स्वमखिलभुवनमात्मनायासेन धामतें सहतें वहतीति धाम: ।
अवान्तरकार्ये नक्षत्रान्तरैः धारणास्तिष्ठतीति धाम: ।

समीहन: - ओं समीहनाय नम:

अथ सृष्टौ सर्वान् सर्वदा स्वेषु अधिकारेषु समीहयतीति समीहन: ।
'त्वां भूतान्युपपद्यावर्तन्ते' इति आरणम् उपोगे
इज्याफलस्य मूरेणा इज्या चात्र प्रतिष्ठिता ।

यज्ञ - ओं यज्ञाय नमः

इज्यो - ओं इज्याय नमः

यज्ञतत्साधनतत्फलावधित्वेन प्रतिपादित: अत: यज्ञ:

"यज्ञो वै विष्णु:"

काम्याधिकारिरिन्द्रादिद्वारा इज्यामर्हतीति इज्य: ।

वर्णाश्रमाचारवता " इत्यादि

महेज्यश्च - ओं महेज्याय नमः

अकामहता महती इज्या अस्याव्यवधानेनेति महेज्य:।

"ये तु सर्वाणि कर्माणि"[१]

सत्रम् - ओं सत्राय नमः

सतांगति: - ओं सतांगतये नमः

दीर्घकालबहुयजमानकर्मासचोदनालक्षणं सत्रम् तत्र चराध्यतया

सततं सीदतीति सत्रम् सीदतेः गतिकर्मण: ।

स्वकर्म प्रवृत्तिभिर्मनिष्ठानां गति: अथ सतां निवृ-त्तिकर्मनिरतानां

गति प्राप्य इति सतांगति ।

१- गीता १२।६

निर्धूतदोषपङ्कानां यतीनां संयतात्मनाम् ।
स्थानं तत्परमं विप्र पुण्यपापपरिक्षये[1]

सर्वदर्शी -ओं सर्वदर्शिने नमः

निवृतात्मा-ओं निवृतात्मने नमः

सर्वज्ञो -ओं सर्वज्ञाय नमः

सर्वो द्विविधावपि धर्मों अध्यदायितुं शीलमस्येति सर्वदर्शी तत्र निवृत्तिधर्माचार्यो नरनारायणादिः परमवैराग्य स्थापनाय विषयेभ्यः प्रत्याहृतमनाः निवृतात्मा ।

'अन्तर्निविष्टभाव च' मन्वे च
आत्मध्यानपरायणाय' इति
तथा स्वात्मना त्मानं जानातीति सर्वज्ञः ।
'युञ्जानं च स्वमात्मानं परस्मिन्मव्ययेपदे' इति ।

ज्ञानमुत्तमम् - ओं ज्ञानायोत्तमाय नमः

सुव्रत - ओं सुव्रताय नमः

ज्ञायते स्मिन् सर्वः परो वैष्णवो धर्म इति ज्ञानमुत्तमम् ।
'पठन्तमनिशं शास्त्रं पञ्चरात्रपुरस्सरम्'
इति न्यायेन केवलपरार्थत्वात् शोभनं व्रतमस्येति सुव्रतः ।

१- वि०पु० २।८।९९

सुमुख: -ओं सुमुखाय नम:

जपादावविकृतप्रसन्नमनोहरमुखत्वात् सुमुख: ।
"कृष्णाय कमलदलामलनेत्राय" इति तन्मन्त्रवर्ण: ।

निरुक्ति-

ध्यातृणां विषये यस्य सुप्रसन्नं मनोहरम् मुखमस्तीति सुमुख: ।

सुघोष: - ओं सुघोषाय नम:

सुखद: - ओं सुखदाय नम:

औपनिषद: स्वाध्यायघोष: अस्येति सुघोष:
एवं सदाचारसमाध्यनुष्ठापनेन तन्निष्टेभ्य: फलं परमसुखं ददातीति सुखद: ।

सुखं बहु ददातीति सुखद: परिकीर्तित:"

सुहृद् - ओं सुहृदे नम:

मनोहर: - ओं मनोहराय नम:

जितक्रोध: - ओं जितक्रोधाय नम:

कृत इदं परोपकारव्यसनित्वम् यत: सुहृत् ।
अनुपकारिण्यपि किमस्य भविष्यति ?
किं करवाणीति शुभाशंसि शोभनहृदयत्वं सुहृत्त्वम्"
एवं निसर्गसिद्धादीन तेषां मनोहरतीति मनोहर: ।

'हरतैरतुपमने च्' [१]

जितश्च तेषां क्रोधादयो नैनेति' जितक्रोध: ।

विदारण: -ओं विदारणाय नम:

स्वापन: -ओं स्वापनाय नम:

दिव्यहेतिभि: राहुमुखान् विदारितवानिति विदारण: ।

नष्टशिष्टानपि चारुचतुरस्मितमधुरकटाक्ष भ्रूविलास: स्वापयति परवशयतीति स्वापन: ।

'मदविह्वलनेत्रं च देवमुद्भिन्नयौवनम्' इति ।

स्ववशो - ओं स्ववशाय नम:

व्यापी- ओं व्यापिने नम:

नैकात्मा - ओं नैकात्मने नम:

तेषु सुप्तेषु स्वकीयैस्सह स्वैरविहारात् स्ववश: ।

सुरासुरमन्दरवासुकिप्रभृतिषु शक्त्याप्यायनाय व्यापनात् व्यापी ।

तदानीं कूर्मकामिनीमोहिनीमुखै रूपै: नैकात्मा ।

मथनधारणवैरिविदारणसुधादानाद्यनेककर्मा नैककर्मकृत् ।

१- पा०ज० ३।२।४।

वत्सरो - ओँ वत्सराय नमः

वत्सलो - ओँ वत्सलाय नमः

वत्सी - ओँ वत्सिने नमः

अथ धर्मात्मा पुरुषार्थव्यवस्थापनाय सर्वान्तर्वसतीति वत्सरः ।
'वसेश्च' इति सरन् प्रत्ययः उणादि ।
वत्सान् स्वौत्सुकान् कामयते इति
नित्यपौष्यात्मगुणवत्सभूयस्त्वतस्सदा ।
वत्सी स्यादि विशेषेण गउणाँ गोप्रदोमनुः ॥

धनेश्वरः - ओँ धनेश्वराय नमः

तवदिष्टधनादाने आशुकारित्वात् धनेश्वरः

निरुक्ति-

आशुकर्माणि इ्यर्तेवरिट् ?

धर्मगुब - ओँ धर्मगुपे नमः

धर्मकृद - ओँ धर्मकृते नमः

धर्मी - ओँ धर्मिणे नमः

सत् - ओँ सते नमः

दुष्टावप्यर्थकामौ दुर्विणयान्निवर्त्य ताभ्यां हितधर्मरक्षणात् धर्मगुप् ।

"साधुमार्गे स्थितानां च संयच्छन्तं धिया च तौ" इति
एवं स्वान् पाभिक्रियन्नकारणादनुग्रहहेतुं धर्मं करोतीति धर्मकृत् ।
प्रसिद्धो पि धर्मो एव सर्वसाधारणोपकरणमिति धर्मी ।

उक्तधर्मप्रशस्तत्वात् - सत् ।

"प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते"[१]

अविज्ञाता - ओं अविज्ञात्रे नमः

सहस्रांशुर - ओं सहस्रांशवे नमः

तत्र साधुष्वपराधाननन्तानपि दृष्ट्वा न दण्डयति क्षमते चेति नैतावदेव किंतु तेषाम् अविज्ञाता ।

"उच्यमानो पि परुषं नोत्तरं प्रतिपद्यते"[२]

प्रपन्नापराधापरिगणनं गुण एव

निरुक्ति-

प्रपन्नकृतपापानां किंचिदप्यविचारणात् ।
अविज्ञातेति कथितः बुधैस्तद्गुणपारगैः ।।
अथ सर्वेशः सहस्रं सहस्रसंख्याकाः अपरिमिताः अंशवः तदुपलब्धाणि ज्ञानानि,अस्येति सहस्रांशुः ।
"दोषो यद्यपि तस्य स्यात्"[३]
"अपि चेत्सुदुराचारो भजते मामनन्यभाक्"[४]

१- गी० १७।२६

२- रा०अ० १।१०
३- रा०यु० १८।३।   ४- गी० ९।३०

<u>विधाता</u> – ओं विधात्रे नमः

<u>कृतलक्षणः</u> – ओं कृतलक्षणाय नमः

प्रपन्नापराधविषये, सत्यां हि स्वतन्त्रतायां, पापकर्मनियन्तृतन्नियाम-कयमतपातनादीनामकिञ्चित्करतार्थे तेषाम् अधिस्वाधीनताप्रख्यापनाय तानपि विदधातीति विधाता ।

यदेवं दोषसहः, किं तर्हि हेयाक्रान्तादुपादेयस्य व्यावर्तकम् तत्राह कृतलक्षणः ।

कृतं हि तेन लक्षणमुपादेयानाम् ।
"मित्रभावेन संप्राप्तम्"[1]
"सम्यग्व्यवसितो हि सः"[2]

"भवतां भ्रमतामत्र विष्णुसंश्रयमुद्रया ।
विनाऽङ्गामङ्गणकृन्नैव भविष्यति नरः क्वचित् ॥

<u>सत्त्वस्थः</u> – ओं सत्त्वस्थाय नमः

<u>सिंहो</u> – ओं सिंहाय नमः

किंच कर्मणो निमित्तस्या प्यभावाच्च यमाधप्रवृत्त्या कुतस्तदभावः यस्मादेव तेषाम् सत्त्वस्थः ।

१– रा०यु० १८।३

२– गीता ९।३०

"क्षुपि स्थः"[1] इति क: "हृदये स्थितः"

किंकरा दण्डपाशौ वा न यमो न च यातना:।
समर्थास्तस्य यस्यात्मा केशवालम्बनस्सदा[2]

तथा न्यवुक्तं नरपतमेन इक्ष्वाकुणामनितयुतेन नूनम् ।
ये विष्णुभक्ता: पुरुषा पृथिव्यां यमस्य ते निर्विषया भवन्ति[3]

यदिदमविदन्तो यमादय: तानुग्राकृतवत् घर्षयेषु तान् हिनस्तीति-सिंह: । यथा-

प्रभवति संयमने ममपि विष्णु[4] इति

भूतमहेश्वर: - ओं भूतमहेश्वराय नम:

यतो भूतानां ब्रह्मयमादय ईश्वरा:,अयं तु तेषामपि ईश्वरतया महांश्चासौ ईश्वरो नियन्ता चेति भूतमहेश्वर: ।

"नरके पच्यमानस्तु यमेन परिभाषित: ।
किं त्वया नार्चितो देव: केशव: क्लेशनाशन:" इत्यादि

१- पा०ब० ३।२।४
२- वि०पु० ३।१।२८
३- ना०पु०
४- वि०पु० ३।७।२५

आदिदेवो - ओं आदिदेवाय नमः

महादेवो - ओं महादेवाय नमः

तेषामप्यादिः कारणं च असौ देवः तदभिभवदुष्प्रतापतया द्योतमानश्चेति आदिदेवः ।

"भीषाऽस्माद्वातः पवते"[1]

तैः क्रीडनकैः कन्दुकादिभिरिव क्रीडयतीति महादेवः ।

देवेशो - ओं देवेशाय नमः

देवभृत् - ओं देवभृते नमः

गुरु - ओं गुरवे नमः

तेषां च यथार्हविनियोगदामतया देवानां ब्रह्मादीनाम् ईशः स्वामीति-देवेशः ।

तथा तान् देवान्बिभर्तीति देवभृत् ।

तेषां वेदैस्ताधिकारबोधनाद्गुरु राचार्य इति वा

कालेनानवच्छेदात्, तेषामपि गुरुः अधिक इति वा गुरुः ।

१- तै०उ० आ० ८।१

उत्तरो - ओं उत्तराय नमः

गोपतिः - ओं गोपतये नमः

एवं ब्रह्मादेराशुरापदुत्तरणतया, तै विपदमुत्तरन्त्यस्मादीति वा ब्रह्मादिस्तुत्यनन्तरं देवकार्यार्थमुत्थितत्तर इति वा उत्तरः ।

'एवं स्तुतस्स भगवान् पुराणस्सर्वतोमुखः,
जहौ निद्रामथ तदा देवकार्यार्थमुत्थितः' इति

मन्त्रवर्णानुगुण्येन गवाम् अशेषच्छन्दोभागवर्णानां वाचां पतिः स्वामी निर्वाहक इति गोपतिः ।

गोप्ता

ज्ञानगम्यः

एवं सर्वं विद्यापालनात् -गोप्ता ।

'सर्वविद्येश्वराय' इति तन्मन्त्रवर्णः ।

परविद्यावेद्यः समाधिगम्य ज्ञानगम्यः ।

१- भा०शा० ४८।४७

<u>पुरातन:</u>- ओं पुरातनाय नम:

नैदं विधाप्रणीतनम् अद्यैव किं तु प्रतिकल्पम् इति पुरातनः ।

'सायंचिरम्[1]' इत्यादिना ट्युट्युलौ तुडागमश्च

<u>निरुक्ति</u>-

विधाप्रणीतनापोसौ प्रतिकल्पं पुरातनः ।

१- पा०अ० ४।३।२३

षष्ठं शतकम्

षष्ठोऽध्यायः

शरीरभूतभृद् - ओं शरीरभूतभृते नमः

शरीरभूतं तत्त्वजातं बिभर्तीति शरीरभूतभृत्

"तच्छिरः"

"तस्य मूर्धा समभवत् द्यौस्सनक्षत्रदेवता" इत्यारभ्य -

"उतब्धशिरः कृत्वा नानामूर्तिभिरावृतम्"[1] इत्यन्तम्

"यत्तु तत्कथितं पूर्वं त्वया हयशिरो महत् ।
हव्यकव्यभुजो विष्णोरुदक्पूर्वे महोदधौ ।।"[2]

भोक्ता - ओं भोक्त्रे नमः

कपीन्द्रो - ओं कपीन्द्राय नमः

अथैवं स्ववर्धितवेदविहितकर्मप्रवर्तकः पुरा रामः स्वविसदृशलीलामनुजावतारे स्वदासानां विसदृशतरकपिरूपं प्रपन्नानां देवानामिन्द्रः कपीन्द्रः ।

"सर्वलोकेश्वरस्सादात्लोकानां हितकाम्यया ।
सर्वैः परिवृतो देवैर्वानरत्वमुपागतः"[3] ।।

निरुक्ति-

कपिरूपं प्रपन्नानां देवानामीश्वरत्वतः ।
कपीन्द्र इति विख्यातः सप्ताणां मनुनायकः ।।

१- भा०शां० ३४८-४६

२- भा०शां० ३४८।३

३- भा०अ० ४४०।२४

भूरिदक्षिण: - ओं भूरिदक्षिणाय नम:

स एव जगदाचार्यकाय हयमेधादिभि र्यजमान: भूरिदक्षिण: ।
अश्वमेधशतैरिष्ट्वा[1] इत्यादि

निरुक्ति-

हयमेवादिभिर्यज्ञैर्जगदाचार्यकाय वै ।
यजमानस्स विज्ञेयस्सदा भूरिदक्षिण: ।।

सोमपो - ओं सोमपाय नम:

तत्रैव सोमपांशी सोमप: सोमं पिबतीति सोमप: ।

यत्किञ्चिद्धूयते वह्नौ हविर्मन्त्रैर्विधानत: ।
तत्सर्वममृतं कृत्वा विष्णवे संप्रयच्छति ।।

'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च'[2] ।

निरुक्ति-

हयमेवे सोमपो य: सोमप: परिकीर्तित: ।

१- रा०बा० १।६४

२- गीता ६।२४

अमृतप: - ओं अमृतपाय नम:

हवि: परिणामरूपम् अमृतं स्वयमेव पिबति चेति, अमृतप: स्वानुष्ठानानुविधायिभ्य: स्वानुभवरूपममृतं परमे व्योम्नि पातीति वा अमृतप: ।

"यत्र देवा अमृतमानशानास्तृतीये धामान्यभ्यैरयन्त"[1]

निरुक्ति-

परिणामी स्य हविषं पीयूषमिति चोच्यते ।
तत्पानात्स्यादमृतप: परमे व्योम्नि वा स्थित: ।
भुक्तेभ्यो य: स्वानुभवं पातीत्यमृतप: स्मृत: ।।

सोम: - ओं सोमाय नम:

"अमृतस्यैष सेतु:"[2]
"यस्य च्छाया मृतम्" इति ।
स्वस्मै, स्वानुभवितृभ्यश्च अमृतायमान: सोम: ।
सोमशब्दो ह्यमृतवाची वर्तते ।
तृतीयस्यामितो दिवि सोम आसीत्[3] ।
"स खल्वमृतोपम:"

१- तै०उ०६।१५
२- मु०उ० २।२।५
३- अष्ट ३।१।

महता तपसा राम महता चापि कर्मणा ।
राज्ञा दशरथेनासि लब्धोऽमृतमिवामरैः[1] इति

"अमृतस्येव नातृप्यन् प्रेक्षमाणा जनार्दनम् ।
शान्तिसमुद्रममृतम्"[2] इति च

निरुक्ति-

सोमः सुधायमानत्वान्मुक्तानां परिकीर्तितः ।

पुरुजित् - ओं पुरुजिते नमः

"सत्येन लोकान्जयति दीनान् दानेन राघवः ।
गुरून् शुश्रूषया वीरो धनुषा युधि शात्रवान्"[3]

इति बहूनां जयात् पुरुजित्

निरुक्ति-

लोकान् दीनान् गुरून् शत्रून् सत्यदानानुवर्तनैः ।
धनुषा जितवान्यश्च पुरुजित् स स्मृतो बुधैः ।

१- रा०अ० ६६।३
२- तै०उ०शि० ६।२
३- रा०अ० १२।२६।५

पुरुसत्तम: - ओं पुरुसत्तमाय नम:

विनयो - ओं विनयाय नम:

स्वगुणामृतसमुद्रपिपासुषु हनुमदादिषु महत्सु अस्ति तम इति पुरुसत्तम: ।

निरुक्ति-

महत्स्वस्तितमत्वादौ ह्यान्जनेयादिषु स्वयम् ।
पुरुसत्तम आख्यातो नवार्ण: स्वस्तिदो मनु: ।

ओं विनयाय नम:

मारीचादयोऽपि वीर्यादिना स्माद्विनीयन्ते दम्यन्ते इति विनय: ।

निरुक्ति-

कुम्भकर्ण महाकायखरमारीचरावणा: ।
दम्यन्ते विक्रमैर्येन विनय: स उदाहृत: ।।

जय: - ओं जयाय नम:

आश्रितैर्जेयितै विधेयो क्रियते इति जय: ।

यथा-

"आज्ञाप्योऽहं तपस्विनाम्"[1]

"ततो नारायणो विष्णु नियुक्तस्सुरसत्तमै:" इति ।

निरुक्ति-

आश्रितै जेयितै यस्माद्विधेयो क्रियते जय: ।

सत्यसन्ध: - ओं सत्यसन्धाय नम:

तेषु सत्या सन्धा प्रतिज्ञा अस्येति सत्यसन्ध: ।

यथा- अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम् ।[2]
न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषत: ।

"सत्यसन्धो जितेन्द्रिय:"[3] इति च ।

निरुक्ति-

"सत्या प्रतिज्ञा यस्येति सत्यसन्ध: स उच्यते" ।

१- रा०बा० ३।३७

२- रा०अा० १०।१९

३- रा०बु० ३९ ।

दाशार्हः -ओं दाशार्हाय नमः

दाशः- दानम् भक्तैः स्वस्मै स्वात्मनिवेदनरूपम्,तेभ्यो वा स्वात्म-समर्पणरूपम् अर्हतीति -दाशार्हः । "अर्ह" इति अच् प्रत्ययः । एवं महार्य इत्यादि कृष्णात्वं दशार्हाणामपत्यत्वात् ।

निरुक्ति-

आत्मनो वा र्पणं भक्तैस्तेभ्यो वा स्वात्मनो र्पणम् ।
दाशस्तामर्हति च यो दाशार्हः स तु कीर्तितः ।

सात्वतांपतिः - सात्वतांपतये नमः

ततः क्विपि सति,णिलोपे च कृते,सात्वतः भागवतास्तेषां पतिः सात्वतांपतिः ।

सातयति-सुखयति आश्रितानिति सात्-परमात्मा,स एषामस्तीति वा सात्त्वतः सात्त्वन्तो वा महाभागवताः,तेषां पतिः-स्वामीति सात्वतांपतिः ।

निरुक्ति-

ये सात्त्वतो भागवतास्तेषां यः पतिरीश्वरः ।
सात्त्वतांपतिरित्युक्तो नवार्णस्साधुरक्षकः ।।

जोवो - ओं जीवाय नमः

विनयिता - ओं विनयित्रे नमः

तान् भागवतान् स्वस्य स्वपरिचारकात्मक्लेशासहतया आत्मनाशा-
दृव्यावर्त्य स्वपरिचर्यया जीवयति-संजीवयतीति जीवः ।

आनन्दमूर्तिर्भगवान् हरिस्त्रैलोक्यपूजितः ।
द्रष्टुं न सहते देवि क्लिष्टान् स्वपरिचारकान् ।।

तान् राजकुमारवल्लालयन् विनयते विशिष्य प्राप्नोति
रक्षतीति विनयिता ।
णीञ् गतौ रक्षणे च धातुः ।

निरुक्ति

तानात्मनाशादृव्यावर्त्य सत्वान्यश्च स्वसेवया ।
उज्जीवयति जीवः स भक्तक्लेशासहो मनुः ।
भक्तान्नित्यं राजकुललालनन्यायतस्सुखम् ।
रक्षत्यतो विनयिता नयते रक्षणार्थकः ।।

साक्षी - ओं साक्षिणे नमः

मुकुन्दः - ओं मुकुन्दाय नमः

तदर्थं तद्वृत्तसाक्षात्कारात् साक्षी ।

तदैकान्त्यपरिष्क्या प्राप्तिः स्वयं मुक्तिभूमिं ददाति इति मुकुन्दः ।

निरुक्ति-

साक्षात्करोति यः साक्षी तद्वृत्तं रक्षणाय सः ।

तैः प्राप्तिस्स्वयं मुक्तिं मुकुन्दः स्याद्ददाति सः ।

मितविक्रमः - ओं अमितविक्रमाय नमः

तेषां ध्यानाराधनानुसन्धेयतत्त्वनिकराधारशक्तिधारणात्-

अमितविक्रमः ।

अमितः - अपरिमितः, विक्रमः - पराक्रमः-बलम् यस्येति अमितविक्रमः ।

क्रमु पादविक्षेपे धातुः ।

श्रीपौष्करे, "कालवैश्वानरशायी नाना स्थाने निवासिनः ।

आधारशक्तिसंज्ञस्य ह्यमूर्तस्य च वै विभोः ।

अभिमानतनुर्यो वै नानाभेदैश्च वर्तते ॥"

निरुक्ति-

तेषां ज्ञानानुसंधेयतत्त्ववृन्दाद्विधारिणीम् ।

तां शक्तिं धृतवान् यो सौ स्मृतो ह्यमितविक्रमः ॥

अम्भोनिधिर - ओं अम्भोनिधये नमः

पातालाम्भसि अखिलजगदाधारपीठकमठात्मना निधीयतेऽइति अम्भोनिधिः ।

"अनन्तबलशक्तये भुवनभृते कच्छपात्मने" इति तन्मन्त्रवर्णनात् ।

निरुक्ति-

आधारशक्तिकमठस्वरूपेणाणंर्याम्भसि ।
निधीयते स्वयं येन स ह्यम्भोनिधि रुच्यते ।।

अनन्तात्मा - ओं अनन्तात्मने नमः

तदुपरि जगदाधारस्तम्भभोगीन्द्रस्य आत्मतया तिष्ठतीति अनन्तात्मा श्रीज्ञायाम्,

आधारशक्तेरुपरि विमलं दीप्तविग्रहम् ।
ज्वालाशतसमाकीर्णं शङ्खचक्रगदाधरम् ।।
अनन्तेशं न्यसेद् इति
"चक्रलाङ्गलहस्तं च प्रणमन्तं परावरम्" इति च ।

निरुक्ति-

कमठस्योपरि जगदाधारस्तम्भभोगिनः ।
स्वरूपेण स्थितो यो सा वनन्तात्मा प्रकीर्तितः ।।

महोदधिशयो , ओं महोदधिशयाय नमः

स एवान्तकाले तस्मिन्नेवानन्तभोगपर्यङ्के महोदधौ शेते इति महोदधिशयः ।शीङ् स्वप्ने इति धातोः "अधिकरणे शेते" इति अच् प्रत्ययः ।

निरुक्ति-

तस्मिन्ननन्तपर्यङ्के समुद्रे शयनाच्च यः ।
महोदधिशयः ख्यातो दशार्णो मनुरुत्तमः ।।

न्तकः - ओं अन्तकाय नमः

तदा सर्वस्य अन्तं करोतीति अन्तकः । "तत्करोति" इति णिच् ण्वुल् ,चुरादौ गणसूत्रम् ।

"अन्ते पृथिव्यां सलिले दृश्यसे त्वं महोरगे"[1] ।

निरुक्ति-

अन्तं करोति कालो यो ऽसावन्तक ईरितः ।

1- रा०पु० १२०-२३

अजो - ओं अजाय नमः

वैष्णवे,

"आस्ते पातालमूलस्थः शेषो शेषसुरार्चितः।[1] इति

अस्मिन् तत्त्वावसाने प्रणवप्रकृतिभूताकारवाच्यतया स्मरणीयत्वात् अः, अकारवाच्यः जः जातः प्रादुर्भूत इति अजः।

गन्धर्वाप्सरससिद्धाः सकिन्नरमहोरगाः।
नान्तं गुणानां गच्छन्ति तेनानन्तो यमुच्यते[2]।।

तस्य वीर्यं प्रभावञ्च स्वरूपं रुपमेव च।
नहि वर्णयितुं शक्यं ज्ञातुं वा त्रिदशैरपि[3]।।

निरुक्ति-

तत्त्वावसानकाले च प्रणव प्रकृतित्वतः।
स्मर्तव्यत्वादजः प्रोक्तः षडूर्मी ह्यूर्मिनाशकः।।

१- वि०पु० ५-२-५-२०

२- वि०पु० २।५।२४

३- वि०पु० २।५।२१

महार्हः - ओं महार्हाय

"तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः"[1]

तत्र प्रणवेन महम् -आत्मनिवेदनपूर्वकं पूजनम् अर्हतीति महार्हः।
"प्रणोत्वा महस ओमित्यात्मानं युंजीतैतद् महोपनिषद्
देवानां गुह्यमिति"[2]

निरुक्ति

स्वरूपादिकृतार्थेन तारेणात्मनिवेदनम् ।
महःपूजामर्हतीति महार्ह इति कथ्यते ।।

स्वाभाव्यो - ओं स्वाभाव्याय नमः

स्वमनेन मन्त्रेण स्वमूर्तेरात्मभिः स्वामित्वेन आभिमुख्येन अवश्यं
भावनीयत्वात् स्वाभाव्यः ।

"ओरावश्यके" इति ण्यत् ।

"स्वो जीवनेच्छा यदि ते स्वसत्तायां स्पृहा यदि ।
आत्मदास्यं हरेः स्वाम्यं स्वभावं च सदा स्मर । इति

१- तै०उ०पू०ता०उ० १०-२४
२- तै०उ०ना० ६।५१

नान्यो हेतुर्विद्यते ईशनाय[1] इति

निरुक्ति-

मन्त्रेणानेनात्मभिक्षु स्वमूर्तेराभिमुख्यत:।
अवश्यं भावनीयत्वात् स्वाभाव्य: परिकीर्तित: ।।

जितामित्र: - ओं जितमित्राय नम:

नित्यस्य स्वस्वाभिभावस्य स्वाभाविकत्वेन भाव्यत्वाद्वा । एतद्रहस्यावबोधविरोध्यहंममकारकामादयो जिता: तेषा मनेनेति जितामित्र: कामादयो हि एषाम् अमित्रा: ।

जिता: अमित्रा: शत्रव: तद्रूपा: तेषामेत द्रहस्यावबोधविरोधिभूता:, अहंकार ममकारकामक्रोधादय: अनेनेति जितामित्र: ।

'काम एष क्रोध एष रजोगुणसमुद्भव:'[2] ।

इति उपक्रम्य-

'जहि शत्रुं महाबाहो कामरूपं दुरासदम्'[3] इत्यन्तम् ।

निरुक्ति-

एतद्रहस्य विज्ञानविरोधिममतादय: ।
जितास्तेषामनेनेति जितामित्रो ह्यवर्णिः ।।

१- श्वे०उ०६-१७।१०

२- गीता ३।३७

३- गीता ३।४३

प्रमोदन: - ओं प्रमोदनाय नमः

अथ स्वसंवन्धिनः तत्प्रथमानुसन्धानेन प्रमोदयतिप्रहर्षयतीति प्रमोदनः।

निरुक्ति-

ध्यानासक्तेषु भक्तेषु मोदमानः प्रमोदनः।

आनन्दो - ओं आनन्दाय नमः

अथ कपिलमूर्ति,आनन्दवल्लोमीमांस्यमानवाङ्मनसदुर्गहो महानानन्दो स्यास्तीतिआनन्दः।

निरुक्ति-

वल्यामानन्दसंज्ञायामवाङ्मनसगोचरः।
आनन्दो यस्य यस्यास्तीत्यानन्दःपरिकीर्तितः।

नन्दनो, ओंनन्दनाय नमः

तमानन्दं यथोक्तायां मुक्तौ प्रापय्य नन्दयतीति नन्दनः।

'एष ह्येवानन्दयाति'[1]

१- तै०उ० आ० ७

"एतस्यैवानन्दस्य अन्यानि भूतानि मात्रामुपजीवन्ति इति वा

<u>निरुक्ति-</u>

तमानन्दमथोक्तायाम्मुक्तौ प्राप्य यस्तदा ।
मुक्तान्नित्यान्नन्दयते नन्दनः स तु कीर्तितः ।

<u>नन्दः</u> - ओं नन्दाय नमः

<u>सत्यधर्मा</u> - ओं सत्यधर्मिणे नमः

"अधिकरणे घञ्"

<u>निरुक्ति-</u>

भोग्यैर्भोगोपकरणैर्भोगैर्भोक्तृभिरेव च ।
तस्मिन् समृद्ध्यते नित्यमिति नन्दः प्रकीर्तितः ।

इत्थं मा च प्रक्रमात् - आ च स्वप्राप्तिलक्षणपरिसमाप्तेः,आर्जवात् सत्यः- अकुटिलः धर्म- वृतम् अस्येति सत्यधर्मा ।धरतेर्मनि बलोऽस्सतरि निष्पन्नात् सच्छब्दात् यति च सत्यधर्मा ।

<u>निरुक्ति-</u>

आ प्रक्रमादा स्वप्राप्तेरार्जवात्सत्य वर्तिनः ।
यः स्यात्स सत्यधर्मा च वरवर्णस्सत्यधर्मदः ॥

त्रिविक्रमः - ओं त्रिविक्रमाय नमः

त्रीन् विक्रमते इति त्रिविक्रमः यद्वा त्रिषु लोकेषु विक्रमो यस्य इति त्रिविक्रमः,यथा-

"त्रिरित्येवं त्रयो वेदाः कीर्तिता मुनिसत्तमैः"
क्रमते तांस्तथा सर्वान् त्रिविक्रम इतिस्मृतः ।
"सर्वे वेदा यत्रकं भवन्ति"[1]

"नारायणपराः वेदाः" इति

निरुक्ति-

त्रीन् वेदान् क्रमते यो हि महिम्ना स त्रिविक्रमः ।

महर्षिः - ओं महर्षये नमः

ध्यानविधाने प्रादुर्गीयमाणऋगादिवक्तृतया कपिलमूर्तिः महांश्चासौ ऋषिः,महर्षिः -यथोक्तवेदद्रष्टा चेति ।

"श्रुतीऋगाद्या वक्त्रेभ्यः प्रोद्गिरन्तमतः स्मरेत्" इति तद्ध्याने
"ऋषिं प्रसूतं कपिलं महान्तम्"
सांख्यस्य वक्ता कपिलः परमर्षिस्स उच्यते" इति च ।
साक्षाद्द्रष्टा मन्त्रवेदान्यो महर्षिः स च स्मृतः ।।

१- आर० ३

कपिलाचार्यः - ओं कपिलाचार्याय नमः

ध्यानविधौ निर्धमाङ्गारवर्णतया, कपिलः-पिङ्गलश्चासौ मन्त्रवणात् स्वतत्त्वसंविदाचयनात् आचार्यश्चेति कपिलाचार्यः ।

"कबृ, वर्णे" इति धातोः "कबेः पश्च" इति इलच् प्रत्ययः, पकारश्चान्तादेशः कपिलः, इति । चर् गतिभक्षणयो इत्यस्माद् "ऋहलोर्ण्यत्" इतिहलन्ताण्ण्यत् उपधावृद्धिः आङ्उपसर्ग पूर्वे वर्तते । आचार्यः समासे उक्तं रूपम् ।

निरुक्ति-

तत्त्वप्रवचनादेव कपिलाचार्य उच्यते ।

कृतज्ञो - ओं कृतज्ञाय नमः

सापराधसगरापत्ये प्यंशुमति स्वामिनमृत्वक्षुकृतमेव ज्ञातवानिति कृतज्ञः वैष्णवे,

निरुक्ति-

स्वामिनमृत्वक्षुकृतं किंचिदंशुमता कृतम् ।
विदितं येन कारुण्यात् कृतज्ञः सोभिधीयते ।।

मेदिनीपतिः - ओं मेदिनीपतये नमः

कपिलरूपास्थानेन धराधारणात् ,मेदिन्याः नैरुक्त्या प्रसिद्धया मधुकैटभमेदस्संयोगात् तत्पदवाच्यायाः भुवः,पतिः निर्वोढेति मेदिनीपतिः ।

"कपिलमुपगम्य भक्तिनम्रः तदा तुष्टाव सर्वं भगवानाह"[1]

"यस्येयं वसुधा सर्वा वासुदेवस्य धीमतः ।
कापिलं रूपमास्थाय धारयत्यनिशं धराम्" ।। इति

निरुक्ति-

कापिलं रूपमास्थाय यो धारयति मेदिनीम् ।
स मेदिनीपतिः ख्यातो नवार्णो भूप्रदो मनुः ।।

त्रिपदः - ओं त्रिपदाय नमः

भोग्यभोक्तृनियन्तृणि तत्त्वानि ज्ञाप्यतया पदानि यस्येति त्रिपदः ।यथा-

सत्त्वानामुपकाराय प्रधानं पुरुषं परम् ।
दर्शयिष्यामि लोकेषु कापिलं रूपमास्थितः।। इति
प्रणवे त्रीणि पदानि तद्वाचकानि इति वा ।
तथैवास्त्रिककुदो वाराहं रूपमास्थितः" ।

1- वि०पु० ४।४।२४

निरुक्ति-

भोक्तृभोग्यनियन्तृणि ज्ञाप्यान्यस्य पदानि वा ।
प्रणवे त्रीणि वाच्यानि वाचकानि पदानि वा ।
वाराहरूपस्यास्थाने पदानि ककुदानि वा ।
यस्य सन्ति ह्यसौ नित्यं त्रिपद: परिकीर्तित: ।।

त्रिदशाध्यक्ष: - ओं त्रिदशाध्यक्षाय नम:

स एव ब्रह्मादे: प्रत्यापत्सखत्वात् त्रिदशाध्यक्ष: ।
अग्रलग्नमहीमण्डलदंष्ट्र:

निरुक्ति-

'सखा स्यात् त्रिदशाध्यक्षो ब्रह्मादे: प्रत्यापदि'

महाशृङ्ग: - ओं महाशृङ्गाय नम:

अग्रलग्नमहीमण्डलदंष्ट्रतया महान् अद्वितीय: शृङ्ग: अस्योपलक्षणतया दंष्ट्रा अस्येति महाशृङ्ग: । 'एकशृङ्गो वराहस्त्वम्'

दंष्ट्राग्रविन्यस्तमशेषमेतद्भूमण्डलं नाथ विभाव्यते ते ।
विगाहत: पद्मवनं विलग्नं सरोजिनीपत्रमिवोढपङ्कम् ।। इति

निरुक्ति-

मही यस्य च शृङ्गाग्रे महाशृङ्ग: स उच्यते ।

कृतान्तकृत् - ओं कृतान्तकृते नमः

कृतान्तकृत् यथा- "हतो हिरण्याक्षमहासुरः" इति ।

वाराहस्मृतिपुराणयोः स्वसिद्धान्तकरणात्

निरुक्ति-

अन्तकामं हिरण्याक्षं कृतवान् यः कृतान्तकृत् ।

स्वसिद्धान्तकरत्वाद्वा स्वाख्यस्मृतिपुराणयोः ।
कृतान्तकृदिति ख्यातो वरवर्णाभीष्टदायकः ।।

महावराहः - ओं महावराहाय नमः

महान् चासौ वराहः, इति महावराहः ।

निरुक्ति-

रसातलगतामुर्वी यश्चोद्धृत्योत्थितः क्षणात् ।
महावराह इति स्मृतो ह्युर्वीप्रदो प्रभुः ।।

गोविन्दः - ओं गोविन्दाय नमः

सुषेणः - ओं सुषेणाय नमः

नष्टां च धरणीं पूर्वमविन्दं च गुहां गताम् ।
गोविन्द इति तेनाहम् ।

अथान्यद्रहस्यम्, शोभना शुद्धसत्त्वमयी बद्धमुक्तनित्यविजयो-पकरणत्वात् सैनैव पन्चोपनिषत् काय: अस्येति सुषेण: ।

निरुक्ति-

नष्टां च धरणीं पूर्वं गोविन्दो यस्स लब्धवान् ।
पन्चोपनिषदङ्गत्वात् सुषेण: परिकीर्तित: ।।

कनकाङ्गदी - ओं कनकाङ्गदिने नम:

तन्मयै: उक्तरूपसौन्दर्यसन्युक्तै: अङ्गदोपलक्षितै: दिव्यभूषणैर्नित्ययोगात् कनकाङ्गदी ।

निरुक्ति-

अप्राकृतानि दिव्यानि भूषणादि च नित्यश:
रत्नानि सन्ति यस्यासौसोच्यते कनकाङ्गदी ।।

गुह्यो - ओं गुह्याय नम:

"शंसिदुहिगुहिभ्यो वेति वक्तव्यम्" इति क्यप्

निरुक्ति-

पन्चोपनिषदङ्गेन गूढत्वात् गुह्य उच्यते ।

गभीरो - ओं गभीराय नमः

तदभिव्यक्तौ स्वरमहागाम्भीर्यः गभीरः ।

"गभीरगम्भीरौ" इति गाहेरिरन् प्रत्ययः ह्रस्वत्वम्, भकारादेशश्च निपात्यते,तत्संपृक्तो हि ,कतकसंकलितमिव सलिलम् ।

अनादिविद्याकलुषो पि संसारी प्रसीदति ? किं पुनः स्वभाव दीप्तो भगवान् ।

निरुक्ति-

महागाम्भीर्ययुक्तत्वात् गभीर इति कथ्यते ।

गहनो - ओं गहनाय नमः

गुप्तस् - ओं गुप्ताय नमः

गहनः -दुर्गाहः,न हि स्वच्छगुणान्तर्वृत्तो पि रत्नाकरो जानुदघ्नः ?

गुप्तः,च तद्गौरवज्ञैः पूर्वगुरुभिः,कुत्र किं वा लक्षणो गुप्तः ,

"तमसः परमो धाता शङ्खचक्रगदाधरः" इति ।

निरुक्ति-

बालैर्दुर्गाहत्वाद् गहनः परिकीर्तितः ।

अन्यैर्दुर्बोधो यो गुप्त इत्यभिधीयते ।।

गम्भीरो - ओं गम्भीराय नमः

तदभिव्यक्तौ स्वरमहागाम्भीर्यः गभीरः ।

"गभीरगम्भीरो" इति गाहेरिरन् प्रत्ययः ह्रस्वत्वम्, भकारादेशश्च निपात्यते,तत्संपृक्तो हि ,कतकसंकलितमिव सलिलम् ।

अनाथविद्याकलुषोऽपि संसारी प्रसीदति ? किं पुनः स्वभाव दीप्तो भगवान् ।

निरुक्ति-

महागाम्भीर्ययुक्तत्वात् गभीर इति कथ्यते ।

गहनो - ओं गहनाय नमः

गुप्तश् - ओं गुप्ताय नमः

गहनः -दुरवगाहः,नहि स्वच्छगुहान्तर्वृत्तोऽपि रत्नाकरो जानुदघ्नः ?

गुप्तः,च तद्गौरववशः पूर्वगुरुभिः,क्व किं वा लक्षणो गुप्तः,

"तमसः परमो धाता शङ्खचक्रगदाधरः" इति ।

निरुक्ति-

बालैर्दुरवगाहत्वाद् गहनः परिकीर्तितः ।

अन्यैर्दुरवबोधो यो गुप्त इत्यभिधीयते ।।

चक्रादाधरः - ओं चक्रादाधराय नमः

उक्तनित्यरूपविभूषणावत् पञ्चशक्तिमयदिव्यायुध इत्यर्थः ।
धरतेः पचाद्यचि व्याख्यातो यं शब्दः ।

निरुक्ति-

यश्शक्तिमद्दिव्यहेतिः स स्याच्चक्रादाधरः ।

वेधाः - ओं वेधसे नमः

एवं विविधमनन्तमहाविभवं नित्यं विदधातीति वेधा तमसः
परमो धाता।

निरुक्ति-

महाविभवकल्याणं सततं विदधाति यः ।
भक्तेभ्यः परमं वेधाः षडर्णो मङ्गलप्रदः ॥

स्वाङ्गः - ओं स्वाङ्गाय नमः

अजितः - ओं अजिताय नमः

यथा तत्रैव समग्रस्वासाधारणभङ्गं छत्रचामरादिस्वाधिराज्य-
परिबर्हजातं नित्यमस्येति स्वाङ्गः "प्राकृतैः" उत्पत्तिमरणादिभिः
न जिता,यथोक्तद्रव्योपादाना पुरी अजिता अस्यास्तीति अजितः ।
अर्श आद्यजन्तं वा" "पुरं हिरण्मयीं ब्रह्मा विवेशापराजिता" इति ।

निरुक्ति-

स्वासनाधारणमङ्गहि क्षादिपरिवर्हणम् ।
यस्यास्ति नित्यं स स्वाङ्ग: षडर्ण: परिवारद: ।
प्राकृतै र्न जिता या सा यस्यास्तीत्यजितापुरी ।
अजितस्तेन विज्ञेय: सप्ताणां मुक्तिदो मनु: ।

कृष्ण: - ओं कृष्णाय नम:

"कृष्णवर्णे" इति नक्प्रत्यय:,तन्मयरुप एव वाराहाद्यवतारो पि इति च निरुक्ते,

"कृषामि मेदिनीं पार्थ भूत्वा कृष्णायसो महान् ।
कृष्णो वर्णश्च मे यस्मात्तेन कृष्णो हमर्जुन ।। इति
यथोक्तं सर्वं व्यनक्ति श्रीविष्णुतत्त्वादौ ।

निरुक्ति-

अप्राकृताति रुचिरमेचक: कृष्ण ईरित: ।

दृढ: - ओं दृढाय नम:

संकर्षण: - ओं संकर्षणाय नम:

दृह दृहि वृद्धौ "दृढ: स्थूलबल्यो:" इति निपातित: ।
क एवम् संकर्षण: ।क एवम् - संसारे चिदचितो वात्मनि संकृषति,सम कृषतीति वा निरुक्तानुसारात् तयोस्संकर्षं समं कर्षं स्वात्मनि कर्षणं नयतीति वा संकर्षण: ।

निरुक्ति-

स्थूलत्वाद्बलवत्त्वाच्च दृढ इत्यभिधीयते ।
यः कर्षति चिदचितौ स संकर्षण उच्यते ।।

अच्युतः -ओं अच्युताय नमः

'च्यवनोत्पत्ति युक्तेषु ब्रह्मेन्द्रवरुणादिषु
यस्मान्न च्यवसे स्थानात् तस्मात् संकीर्त्यसे च्युतः' इति ।

अच्युतः ।

निरुक्ति-

'यस्मान्न च्यवते स्थानाद् ब्रह्मादिस्सो च्युतः ।

वरुणो - ओं वरुणाय नमः

वारुणो - ओं वारुणाय नमः

'वृञ् वरणे कृवृदारिभ्य उनन्,गुणः,रपरः,णत्वम्
वरुणःइति ।तं स्वामित्वेन वृणुते इति वरुणः,तत्र भवः,वारुणः
तेषु वाप्यहम्' इति ।

निरुक्तिः-

यास्स्थिता स्सर्वमावृत्य वरुणः स तु कथ्यते ।
आपस्था वरुणास्तासु स्थितो वारुण ईरितः ।

वृद्धः – ओं वृद्धाय नमः

वृद्ध वरणे पचाद्यच् ।

'निवासवृद्धास्साधुना मापन्नानां परा गतिः' ।

'वृद्ध इव स्तब्धो दिवि तिष्ठत्येकः ।'

पुष्कराक्षः – ओं पुष्कराक्षाय नमः

तेषां प्रसादवर्णेण पोषके अक्षिणी यस्य सः पुष्कराक्षः ।

पुष्करम् – 'पुषः करन्' इति करन् प्रत्ययः किद्वद्भावः ।

निरुक्तिः-

सतां प्रसादवर्णेण पोषके यस्य चाक्षिणी ।

पुष्कराक्ष स विज्ञेयो ह्यष्टार्णः प्रीतिवर्धकः ।

महामनाः – ओं महामनसे नमः

भगवान् – ओं भगवते नमः

'तेष्वगाधोदारविस्तृतमनाः, महामनाः ।

स्वमहिमदोषविशेषिकल्याणस्वरूपतया परमपूज्यः भगवान् ।

निरुक्ति-

अगाधोदरविस्तारं मनो यस्य महामनाः ।

सर्वहेयप्रत्यनीककल्याणगुणवत्तया ।

पूज्यात्पूज्यतमो यो सौ भगवान् इति शब्द्यते ।

भगहा - ओं भगहने नमः

ऐश्वरस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा [1] ।।

तं हन्ति गच्छतीति हन्तिर्गमनकर्मा अत्र वैष्णवे गच्छेशे भगवच्छब्द निर्वचनप्रकरणं लेख्यम् ।

निरुक्ति-

भगैस्तु कल्याणगुणैः सर्वं सर्वत्र गच्छति ।
यश्चासौ भगहा प्रोक्तः षडर्णः सुखदायकः ।

नन्दी - ओं नन्दिने नमः

वनमाली- ओं वनमालिने नमः

स्वम् असौ व्यूहे संकर्षणः स्वावतारे नन्दगोपेन पितृमान् नन्दी मधुवत्वीसिंवा नन्दवान् वा ।

स्वसृज्यभूतसूक्ष्मसारसौरम्याभिमानिन्या वैजयन्त्या नित्ययोगी वनमाली ।

निरुक्ति-

नन्दगोपेन पितृमान् नन्दीति परिगीयते ।
स्वसृज्यभूतसूक्ष्माणां माल्या नित्ययोगतः ।
वनमाली समाख्यातो हृषिष्टाणां भूषणप्रदः ।।

१- वि०पु० ६।५।७४

<u>हलायुध:</u> - ओँ हलायुधाय नम:

उपलभूतसमृद्धिकृषणिबलहलपरिकर: हलायुध: ।यथा-

'बलभद्रं समृद्ध्यर्थं सीरकर्मणि कीर्तयेत्' इति ।

<u>निरुक्ति-</u>

हलं च सततं सीरं धत्ते यो सौ हलायुध: ।

सीरकार्यसमृद्ध्यर्थीविरव्यातो मन्त्रनायक: ।।

<u>आदित्य:</u> - ओँ आदित्याय नम:

स्ववाचकात् आवणात् आत:,इत्य: प्राप्य:,इति आदित्य: ।

'रतिसुतास्वृद्गुण: क्यप्' आकारो हि संकर्णणबीजमन्त्र:

यथा- वैष्णवे धर्मे देवकीं प्रति भगवान् -

'दाक्षायणी त्वमादिति: संभूता वसुधातले ।

नित्यैव त्वं आक्षात्री प्रसादं ते करोम्यहम् ।।

<u>निरुक्ति-</u>

आवणादेव प्राप्यो य: स आदित्य: प्रकीर्तित: ।

अदितिर्देवकी तस्या: आदित्यो वा ह्यपत्यत ।।

<u>ज्योतिरादित्य:</u> - ओँ ज्योतिरादित्याय नम:

<u>सहिष्णुर्</u> - ओँ सहिष्णवे नम:

प्रसिद्धो ह्यादित्य: तत्तेजसि तमायेत,श्रीनारायणीये,

"तयोर्भवेन युध्यतो: "निष्क्रमाणि च तेजांसि ब्रह्मा चैवासनाच्च्युत:" इति ।

तत्र तपराधसहनात् सहिष्णु: तत्रैव प्रसादयामास भवो देवं नारायणं प्रभुम् । शरणं जातामाथं वरेण्यं वरदं हरिम् ।

तथैव वरदो देवो जितक्रोधो जितेन्द्रिय: ।
प्रीतिमानभवत्तत्र रुद्रेण सह संगत: ।। इति ।

निरुक्ति-

समस्ततेजोहरणाज्ज्योतिषा दीव्यतेच य: ।
स वै स्याज्ज्योतिरादित्यो नवाणों ज्ञानदायक: ।।
ब्रह्मादिमन्युसहनात् सहिष्णुरिति कथ्यते ।

गतिसत्तम: - ओं गतिसत्तमाय नम:

सुधन्वा - ओं सुधन्वने नम:

स एव परमधर्माध्वदेशिकत्वेन गतिसत्तम: ।
"गतो प्रत्ययितव्य इति,
"अहो ह्यनुगृहीतो ह्ययधर्म एभिस्सुरैरिव"
सुधानिभिक्षुरा सुरसमरसंहारिशरासनत्वात् सुधन्वा
तत्र दिव्यं धनुर्दृष्ट्वा नरस्य भगवानपि ।
नरस्ततो वरकटकाग्र्यमृणमहिंणुभि: पवनपदं समावृणोत्"

निरुक्ति-

धर्मे प्रत्ययिततमो गतिसत्तम ऊच्यते ।
सुशोभनं धनुर्यस्य सुधन्वा परिकीर्तित: ।।

खण्डपरशुर् - ओं खण्डपरशवे नमः

परशुना रौद्रसंग्रामखण्डनात् खण्डपरशुः, तत्रैव

"अथ रुद्रविघातार्थी भिण्डिकां नर उद्धरन्
मन्त्रैश्च संयुयोजाशु सोऽभवत् परशुर्महान् ।
क्षिप्तश्च सहसा रुद्रे खण्डनं प्राप्तवांस्तदा ।
ततोऽहं खण्डपरशुस्ततः परशुखण्डनात् ।।"

निरुक्ति-

तीव्रकोपात् परशुना रौद्रसंग्रामखण्डनात् ।
इत्युक्तः खण्डपरशुर्निर्वाणशोकनाशकः ।।

दारुणो - ओं दारुणाय नमः

एवं बाह्याभ्यन्तराऽरिदारणात् दारुणः ।
"कृदारिभ्य उनन्" ।

निरुक्ति-

बाह्याभ्यन्तरशत्रूणां दारणादपि दारुणः" ।

द्रविणप्रदः - ओं द्रविणप्रदाय नमः

अथ व्यासावतारः ।
समग्रं शास्त्रतदर्थरूपद्रविणं प्रददातीति द्रविणप्रदः ।
यथा- "वहन्वै वामहस्तेन सर्वशास्त्रार्थसंचयम् ।
दक्षिणेन च शास्त्रार्थानादिशंश्च यथास्थितान् ।

निरुक्ति-

शास्त्रं तदर्थं द्रविणं प्रददाति जनाय यः ।
व्यासो मुख्या हरिरसादाद् द्रविणप्रद उच्यते ।।

दिविस्पृक् - ओं दिविस्पृशे नमः

परविद्यया दिवि च परमपदे स्थितं स्वतत्त्वरहः स्पृशतीति दिविस्पृक्, "स्पृशो नुदके क्विन्" हलदन्तात्० इत्यलुक् "विदितपरमार्थः" इति तन्मन्त्रे ।

निरुक्ति-

"परया विद्यया यः स्वं स्पृशतीति परे पदे" ।
दिविस्पृक् सोऽच्यते निर्त्यम् ।

सर्वदृग् - सर्वदृशे नमः

व्यासो - ओं व्यासाय नमः

अन्यदपि सर्वं वैभवं पश्यतीति सर्वदृक् ।
"दृशेश्चेति वक्तव्यम्" इति क्विन् प्रत्ययः । "क्विन्प्रत्ययस्य कुः" इति कुत्वम् । "विदुणे" इति तन्मन्त्रे ।

"युगानुसारबोधानामखेदजननाय वै ।
विभजंस्तु चतुर्धा वै वेदमेकं त्रिकालवित्" इति व्यासः ।

निरुक्ति-

सर्वदृक् सर्वदर्शनात् ।
त्रय्याश्चतुर्धा करणाद् व्यास इत्युच्यते बुधैः ।।

वाचस्पतिर् - ओँ वाचस्पतये नम:

अयोनिज: - ओँ अयोनिजाय नम:

पञ्चमवेदरुपाया: वाच: स्वामी वाचस्पति: ।
सारस्वतावतारे भगवन्मुखसंभवत्वात् अयोनिज: ।

निरुक्ति-

वाच: पञ्चमवेदस्य स्वामी वाचस्पति: स्मृत: ।
सारस्वतावतारे हि भगवन्मुखसंभवात् ।
स्मृतो ह्ययोनिज इति वरुण: कर्मनाशक: ।

त्रिसामा - ओँ त्रिसाम्ने नम:

अथ भूयो जात्सृष्टा भोशब्देनानुवनादयन्"
सरस्वतीमुच्चचार तत्र सारस्वतो भवत् ।। इति ।

निरुक्ति-

प्रोक्त स्त्रिसामा यश्चासौ बृहदादित्रिसामक:"

सामगस् - ओँ सामगाय नम:

साम- ओँ साम्ने नम:

"गणपोष्टकं" इति टक्,तदनुभवाह्लादो पि हि ।

साम योष्यते 'एतत्साम गायन्नास्ते' इति

स्वगायकानामपि पापं स्यतीति साम ।

'षोऽन्तकर्मणि' इति 'सातिभ्याम्०' इत्यादिना मनिन्

निरुक्ति-

स्वयं स्वानुभवप्रीत्या गायतीति च सामगः

स्वगायकानां कालुष्यनाशकस्साम ईरितः ।।

निर्वाणम् - ओं निर्वाणाय नमः

भेषजम् - ओं भेषजाय नमः

निर्वाणमिति 'निर्वाणोऽवाते' इति निपातितः ।

अतः असाध्यसंसारव्याधेः परमम् भेषजम्, स्वराजे ।

'नारायणाद्दृषिगणास्तथा सिद्धा महोरगाः ।

देवा देवर्षयश्चैव यं विदुर्दुःखभेषजम्' इति ।

निरुक्ति-

निर्वाणं स्यात्परगतेर्निमित्तं निर्गतिनसाम् ।।

असाध्यभवरोगस्य भेषजं यत्प्रदोषणम् ।।

भिषक् - ओं भिषजे नमः

संन्यासकृत् - ओं संन्यासकृते नमः

सम्यक् विदितनिदानचिकित्सः - भिषक् ।

कथं चिकित्सति, सात्त्विकेन संन्यासेन रजस्तमसी कृन्ततीति

संन्यासकृत् ।

निरुक्ति-

भवरोगनिदानज्ञो यो सौ भिषगुदीरितः ।
यः कृन्तति स संन्यासकृत् नवाणां मनुस्मृतः ॥

शमः - ओं शमाय नमः

"मोक्तारं यज्ञतपसाम्" इत्यादिना
इच्छाभयक्रोधशान्त्युपायमाचष्ट इति शमः ।
"तदाचष्टे" इति णिच् चुरादिगणसूत्रम् पचाद्यचि कृते रूपम् ।

निरुक्ति-

अनुद्भवः शमः प्रोक्तः ।

शान्तः - ओं शान्ताय नमः

स्वयं च शान्तः ।सत्यपि समुद्वेलहेतौ महिसमुद्रे निस्तरङ्ग-समुद्रवदनुद्विग्नः,तद्दर्शिनां हि प्रभावः यं जगौ पराञ्जलिः,
"तत्सन्निधौ वैरत्यागः"[1]
अवार्चीनश्च परितः पद्मभवेनसां दहनं धाम विलोकनक्षमम् ।
मधुरैरवशानि लम्भयन्नपि तिर्यञ्चि शमं निरीक्षितैः[2]

१- पात०सू० ४-३५

२- किरा० २-५५

निरुक्ति-

"शान्तो विकृतमानस:" ।

निष्ठा -ओं निष्ठायै नम:

शान्ति: - ओं शान्त्यै नम:

"आतस्योपसर्गे" इत्यङ्० । "निष्ठा" इति ।
परमसमाधौ विस्मृतस्वाधिकारा: शाम्यन्तीति शान्ति: ।

निरुक्ति-

तिष्ठीयते ह्यर्थिना यो हृदि निष्ठा स कथ्यते ।
स्वाधिकारा: शाम्यन्ति समाधौ परमे यत: ।
अत: शान्ति:, इति प्रोक्त: ऋत्वणो भक्तिदो मनु: ।

परायण: - ओं परायणाय नम:

समाहितानां परममयनम् अव्यवहितप्रापिका परमा भक्तिरस्मात्

इति परायण:" यथा-
"निर्मम: शान्त:"[1] इत्युपक्रम्य
"मद्भक्तिं लभते पराम्"[2] इत्यन्तम्
"भक्त्या त्वनन्यया शक्य:" इति च ।

१- गीता १८।५३
२- गीता १८।५४

निरुक्ति-

यस्मात् तु परमा भक्ति: चरमप्रापिका मता ।
तस्मात् परायण:, इति स्मृतो ह्यष्टार्ण उत्तम: ।

शुभाङ्ग: -ओं शुभाङ्गाय नम:

शान्तिद: -ओं शान्तिदाय नम:

स हि स्वयोगदोमवह: शुभाङ्ग: ।

एवं निष्पन्नभक्तिभ्य:, अप्रतिप्रसवनिर्मूलितभवोपप्लवां स्वसायुज्यरूपां शान्तिं ददाति इति शान्तिद:, यथा-

'विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवं शान्तिमत्यन्तमेति' इति

'मत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्'

'तमीशानं वरदं देवमीड्यं निचाय्यात्मानं शान्तिमत्यन्तमेति'

इत्यादि ।

निरुक्ति-

स्वशक्त्युद्भवकल्याणायमाधष्टाङ्गसंभव: ।
यस्मात् शुभाङ्ग: संप्रोक्त: सप्ताणों ध्यानदायक: ।।
एवं निष्पन्नभक्तिभ्य: शान्तिं सायुज्य संज्ञिकाम् ।
महानन्दां ददातीति शान्तिद: परिकीर्तित: ।।

<u>स्रष्टा</u> - ओँ स्रष्ट्रे नमः

एवं मुमुक्षून् मुञ्चन् सिसृक्षूंश्च प्रचितनिरन्तन कर्मवैचित्र्यो चित-परिकरैर्योजयन् सृजतीति स्रष्टा ।

'सृजिदृशोर्झल्यमकिति' इत्यम् ।

<u>निरुक्ति-</u>

कर्मवैचित्र्यतःसृष्टीन् स्रष्टा स्यात्सृजतीति यः ।

<u>कुमुदः</u> - ओँ कुमुदाय नमः

एवं सृष्टस्य साकलस्तम्बस्य उच्चावचशब्दस्पर्शादि भोगवती भूमिः कुः,प्राकृतमण्डलं तत्र भोक्तृन् भोजयन् मोदत इति कुमुदः,मूलविभुजादित्वात् कः ।

'अनीशश्चात्मा बध्यते भोक्तृभावात्'[1]
'ज्ञाज्ञौ द्वावजावीशनीशौ'[2] इति

<u>निरुक्ति-</u>

कौ प्राकृते मण्डलेऽयल्स्वभोक्तृनपि भोजयन् ।
मोदते यस्सदा कालं कुमुदः स तु गीयते ।।

१- श्वे०उ० १।८
२- श्वे०उ० १।९

कुवलेशय: - ओं कुवलेशाय नम:

कुवलेशय: - तत्र कौ कुत्सितं वा वलन्ते आसंसारं भ्राम्यन्ति इति कुवला:, जीवा:ते स्वदेहेन्द्रियादौ आपेदिकाभिमानिकाश्शास्चेति कुवलेशा: तांस्तथा नियच्छन्यातीति कुवलेशय:, "आतो नुपसर्गे क:"

निरुक्ति-

कुत्सितं वल्गेणा ते कुवला जीवसंज्ञिता:।
देहेन्द्रियादेरीशास्ते कुवलेशा इति स्मृता: ।
यस्तान्नियच्छन्यातीति कुवलेशय उच्यते ।।

गोहितो - ओं गोहिताय नम:

गोपतिर् - ओं गोपतये नम:

गो: प्रकृते: संसारबीजावापे दोत्रीभूताया: हित:- व्यवस्थापक: गोहित: ।

"यो योनिं योनिमधितिष्ठत्येको यस्मिन्निदं सन्व विचेति सर्वम् । तमीशानम् ।[1]

"गौरनाधन्तवती सा जनित्री भूतभाविनी"[2]
"सूयते पुरुषार्थेन्च तेनैवाधिष्ठिता जात्"[3]

१- श्वे०उ० ४।११

२- मन्त्रोप० ३३०।१८

३- मन्त्रोप० ३३०।१७

भोगभूमेः स्वर्गस्यापि पतिः गोपतिः ।

निरुक्ति-

संसारबीजदात्रस्य प्रकृतेः स्थापकश्च यः ।
स गोहितः स्वर्गभूमेः पतित्वात् गोपतिः स्मृतः ।

गोप्ता - ओं गोप्त्रे नमः

जस्य कर्मफलचक्रदाता गोप्ता ।

निरुक्ति-

यः कर्मफलचक्रस्य गोप्ता हि परिपालनात् ।

सप्तम

शतकम्

सप्तमो ध्याय:

תיקון חצות:

वृषभाक्षो - ओं वृषभाक्षाय नम:

वृषप्रिय: - ओं वृषप्रियाय नम:

तत्व धर्म धारणेति वृषभाक्ष:,
फलवर्षी वृषभो धर्म:,अक्ष: संसारचक्राधारो यस्मात् ।
एवं प्रवर्तकधर्मो प्रियावस्येति वृषप्रिय: ।
तत्प्रियत्वेन हि वैधानां कर्मणां धर्मत्वम् तत्प्रियत्वस्थापनमेव च विध्यर्थ:,इदन्च फलमत उपपत्ते:[1] इत्यत्र न्यरु नि०

निरुक्ति-

सत्याधारोवृषभो धर्मो वृषभाक्ष उच्यते ।
धर्मो प्रियो तावस्येति प्रवर्तकनिवर्तको ।
वृषप्रिय स विज्ञेयो ह्यष्टाणां फलदो मतु: ।।

अनिवर्ती - ओं अनिवर्तिने नम:

तत्र प्रवृत्तिकर्मरतानां धूमादिपितृयाणपुनरावृत्त्या संसारान्न निवर्तयतीति अनिवर्ती ।

गृहादित्वाणिनि:,एवं कामीत्यादय:,अतो हि संसारानुच्छेद: यथा-

धूमो रात्रिस्तथा कृष्णाष्णमासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते[2] ।।

१- ब्र०सू० ३।२।३७

२- गी० ८।२५

"कृतात्ययेनुशयवान्"[1]

इत्यादौ चैतद्व्याचारि ।

निरुक्ति-

पितृयाणप्रवृत्तानां संसारान्न निवर्तनात् ।
अनिवर्ती समाख्यातो ह्यष्टवर्णो भवदो मनु: ।।

निवृत्तात्मा - ओं निवृत्तात्मने नम:

ततो निवृत्तनिवृत्तकर्मणो ह्यात्मानां स्येति निवृत्तात्मा

निरुक्ति:-

निवृत्तिकर्मणो यस्य ह्यात्मानस्सन्ति स स्मृत:
निवृत्तात्मा इत्यष्टवर्णो दुष्कर्मैकमोचक: ।

संक्षेप्ता - ओं संक्षेप्त्रे नम:

तत्र प्रवृत्तान् संकुचितस्वाभाविकज्ञानप्रभावान् कर्तुं शीलमस्येति
संक्षेप्ता यथा- "यथा संनिकर्षितस्ता वेष्टिता नृप सर्वगा ।।[2]

निरुक्ति-

स्वाभाविकासंकुचितमेधायाश्च प्रकाशनम् ।
निवृत्तिकर्मणां कर्तुं शीलं यस्यास्ति सर्वदा ।
स संक्षेप्तेति कथित: गडणो धविकासद: ।।

१- बृ०पू० ३।१।८

२- वि०पु० ४।७६।२

'कृतात्ययेऽनुशयवान्'[1]
इत्यादौ चैतद्व्यापारि ।

निरुक्ति-

पितृयाणप्रवृत्तानां संसारान्न निवर्तनात् ।
अनिवर्ती समाख्यातो ह्यष्टवर्णो मयद्दो मनुः ॥

निवृत्तात्मा - ओं निवृत्तात्मने नमः

ततो निवृत्तनिवृत्तकर्माणो ह्यात्मानो स्येति निवृत्तात्मा

निरुक्तिः-

निवृत्तिधर्माणो यस्य ह्यात्मानस्सन्ति स स्मृतः
निवृत्तात्मा इत्यष्टवर्णो दुष्कर्मैकमोचकः ।

संदीप्ता - ओं संदीप्त्रे नमः

तत्र प्रवृत्तान् संकुचितस्वाभाविकज्ञानप्रभावान् कर्तुं शीलमस्येति संदीप्ता यथा- 'यया क्षेत्रज्ञशक्तिस्सा वेष्टिता नृप सर्वगा ॥'[2]

निरुक्ति-

स्वाभाविकासंकुचितमेवायास्य प्रकाशनम् ।
निवृत्तिधर्माणां कर्तुं शीलं यस्यास्ति सर्वदा ।
स संदीप्तेति कथितः षड्वर्णो धर्मिकासदः ॥

१- ब्र०सू० ३।१।८
२- वि०पु० ६।७६।२

क्षेमकृत् - ओं क्षेमकृते नमः

शिवः- ओं शिवाय नमः

निवृत्तानां तत्संकोचनविमोचनं क्षेमं करोतीति क्षेमकृत् एवं सर्वमुमुक्षुमुमुक्षुशिवंकरत्वात् शिवः ।

यथा- "संसारमोक्षस्थितिबन्धहेतुः"

"पितृलोके राज्यमनुशास्ति देवः"

"शिवः शिवानामशिवो शिवानाम्"[1] इति

निरुक्ति-

असंकोचनतनवक्षेमस्य करणात्सताम् ।

क्षेमकृत् चापि सर्वेषां -

शिवस्य करणात् शिवः ।

श्रीवत्सवक्षाः -ओं श्रीवत्सवक्षसे नमः

अथ शिवत्वोपपादकानि, ईशितव्याविभाजकलक्ष्मीवाल्लभ्य-सौभाग्यचिह्नं श्रीवत्सं स्व वक्षसीति श्रीवत्सवक्षाः ।

श्रीवत्सवक्षाः"[2] इति

निरुक्ति-

लक्ष्मीवाल्लभ्यसौभाग्यचिह्नं श्रीवत्सनामकम् ।

श्रीवत्सवक्षा यस्यास्ति वक्षसीति स तु स्मृतः ।।

१- भा०उ० ४१।६

२- रा०यु० ११४-१५

श्रीवास: – ॐ श्रीवासाय नम:

श्रीपति: – श्रीपतये नम:

"नित्यश्री:"[1] इति
तेन यत्सूच्यते तदुच्यते –श्रीवास: ।
"श्रियो नित्यस्वैरविहारकल्पद्रुमोद्यानम्"
"तुल्यशीलवयोवृ ताम्"[2] इतिवत्

तस्या: समुचितो नित्यस्वयंवरपति: श्रीपति:
यथा– "श्रीश्च ते लक्ष्मीश्च पत्न्यौ"[3]
"अस्येशाना जगतो विष्णुपत्नी"[4]

निरुक्ति–

श्रियो विहारस्थानत्वात् श्रीवास इति चोच्यते ।
स्वयं श्रिय: पतित्वेन वृतत्वात् श्रीपति: स्मृत: ।।

१– रा०सु० ११४–१५
२– रा०सु० १६।५
३– पु०सू०
४– श्रीसू०

श्रीमतां वरः - ॐ श्रीमतांवराय नमः

तस्याः सादरपूर्णनिर्विघ्ननित्यपात्रं भगवान्, ब्रह्मादयस्तु तन्नान्तरीयककटाक्षपातोपलक्षणलब्धम् यथा-

शुक्लमाल्याम्बरधरा स्नाता भूषणभूषिता ।
पश्यतां सर्वदेवानां ययौ वक्षस्थलं हरेः ।।

तयावलोकिता देवा हरिवक्षस्थलस्थया।
लक्ष्म्या मैत्रेय सहसा परां निर्वृत्तिमागताः[१] ।।

तस्मात् श्रीमतांवरः ।

निरुक्ति-

देवानां श्रीमतां श्रेष्ठः श्रीमतांवर उच्यते ।

श्रीदः - ॐ श्रीदाय नमः

श्रीशः - ॐ श्रीशाय नमः

नित्यनूतननिर्व्याजप्रणयनरसश्रियं तस्यै ददातीति श्रीदः । तस्या जीवातुरित्यर्थः तच्छ्रवणेन हि सा श्रीर्निरुच्यते,

---

१- वि०पु० १।९।१०६

न च सीता त्वया हीना न चाहमपि राघव ।
मुहूर्तमपि जीवावो जलान्मत्स्याविवोद्धृतौ[1] ।।

इति हि तस्याः प्रकृतिः

"विष्णोरेषानपायिनी"[2]
"अनन्या हि मया सीता भास्करेण प्रभा यथा"[3]
"अनन्या राघवेणाहम्"[4] इति च ।
"श्रियश्श्रीश्च भवेदग्र्या" इति

तस्या अपि तथा स्वनिदानत्वात् श्रीशः, यद्वा श्रीरेवास्यापि ईशा सर्वावस्थाव्यवस्थापिकेति - श्रीशः ।

निरुक्ति-

यो वै श्रियै स्वप्रणयरसदः श्रीद ईरितः ।
श्रीशः स्याच्छ्रिय ईशत्वादीशा श्रीरस्य वा मता: ।।

१- रा०अयो० ५३।३१
२- वि०पु० १९।१४४
३- रा०यु० १२१।१९
४- रा०सु० २१।१५

श्रीनिवासः - ओं श्रीनिवासाय नमः

श्रीनिधिः - ओं श्रीनिधये नमः

दिव्यवल्ल्या इव कल्पद्रुमः तस्या नित्योपश्चः श्रीनिवासः वसतिनिर्पूर्वः पूर्ववदधिकरणे घञ् वृद्धिः ।

रत्नमञ्जरीव मञ्जूषायांश्रीनिधीयते स्मिन्निति श्रीनिधिः ।

निरुक्तिः-

नित्योपश्लेषनिवासत्वात् श्रीनिवासः श्रियः स्मृतः ।
श्रीरस्मिन्निहिता नित्यं श्रीनिधिः परिकीर्तितः ।।

श्रीविभावनः- श्री विभावनाय नमः

श्रीधरः- ओं श्रीधराय नमः

सैवास्य विभावनी प्रत्योपपत्त्याहेतुरिति श्रीविभावनः ।
"अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा"[1] इतिवत् ।

१- रा०आ० ३७।१८

तां रत्नमिवार्चिषं पुष्पमिव सुरभिम् इन्दुमिव चन्द्रिकाम् अमृतमिव स्वादुताम् औत्पत्तिकेन संबन्धेन धरतीति श्रीधरः ।

"नहि हातुमियं शक्या कीर्तिरात्मवता तथा" इति

निरुक्ति-

यस्य पृथ्यौपार्थ्यहेतुः श्रीः स्यात्स श्रीविभावनः ।
रुच्यर्थिः कौमुदीगन्धान् सुधारत्नेन्दुपुष्पवत् ।
श्रियं धरति नित्यं यः श्रीधरः स तु कीर्तितः ।।

श्रीकरः - ओं श्रीकराय नमः

श्रेयश्श्रीमान् - ओं श्रेयश्श्रीमते नमः

तां परत्व इव व्यूहावतारादिष्वपि स्वानुरूपां करोतीति श्रीकरः ।

"कृञो हेतुताच्छील्यानुलोम्येषु" इति आनुलोम्ये टः, यथा- "देवत्वे देवदेहेयम्"[१] इत्यादि श्रेयसे अनुरूपार्थं श्रयणीया श्रीः श्रेयः श्रीः सा अस्य नित्ययोगिनीति श्रेयश्श्रीमान् ।

१- वि०पु० १।९।१४२

यथा-

प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा ।
अलमेषा परित्रातुं राक्षस्यो महतो भयात्[1]

शरीरारोग्यमैश्वर्यमरिपक्षक्षयः सुखम्[2]

"विमुक्तिफलदायिनी"[3] ।

"यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्"[4] ।

"श्रियं लोके देवजुष्टामुदाराम्"[5] इति हि श्रियो निर्देशः ।

निरुक्तिः

परव्यूहावतारेषु स्वानुरूपां करोति माम् ।
श्रियं यो सौ श्रीकरः स्यात् मुन्यर्णः श्रीकरोमनुः ।।
श्रेयसे श्रयणीया श्रीः श्रेयश्रोनित्ययोगिनी ।
श्रेयः श्रीमान् तावस्य वस्वर्णः पुरुषार्थदः ।।

१- रा०यु० ५८।९२

२- वि०पु० १।८।१२४

३- वि०पु० १।८।१२०

४- श्री०सू०

५- श्री०सू०

यथा-

प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा ।
अलं्मेषा परित्रातुं राक्षस्यो महतो भयात् [1]

'शरीरारोग्यमैश्वर्यमरिपक्षक्षयः सुखम्' [2]

'निमुक्तिफलदायिनी' [3] ।

'यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्' [4] ।

'श्रियं लोके देवजुष्टामुदाराम्' [5] इति हि श्रियो निर्देशाः ।

निरुक्तिः

परव्यूहावतारेषु स्वानुरूपां करोति माम् ।
श्रियं यो सौ श्रीकरः स्यात् सुन्यर्णैः श्रीकरोमनुः ।।
श्रेयसे श्रयणीया श्रीः श्रेयश्रोनित्ययोगिनी ।
श्रेयः श्रीमान् तावस्य वरवर्णैः पुरुषार्थदः ।।

१- रा०पु० ५८।९२
२- वि०पु० १।९।१२४
३- वि०पु० १।९।१२०
४- श्री०सू०
५- श्री०सू०

लोकत्रयाश्रयः - ओं लोकत्रयाश्रयाय नमः

सह तया जगन्मात्रा पितृवत् सर्वाश्रयः, लोकत्रयाश्रयः ।

यथा-

'त्वम्माता सर्वलोकानां देवदेवो हरिः पिता'[1] इति

निरुक्ति-

श्रिया सह जगन्मात्रा पितृवत् सकलाश्रयः ।

लोकत्रयाश्रयः स स्यात् दशार्णो रक्षकत्वदः ॥

स्वक्षः - ओं स्वक्षाय नमः

स्वङ्गः - ओं स्वङ्गाय नमः

तत्सौन्दर्यसुधोदधिपारीणदिव्यकरणः स्वक्षः ।

अस्या अपि स्पृहणीयदिव्यदेहः स्वङ्गः ।

निरुक्ति-

श्रीसौन्दर्य सुधासिन्धु पारीण करणो हि यः' स्वक्षः ।

श्रियः स्पृहणीयदिव्याङ्गः स्वङ्ग उच्यते ।

१- वि०पु० १।८।२५

शतानन्दः - ओं शतानन्दाय नमः

नन्दिः - ओं नन्दये नमः

परस्परप्रणयप्रवहदपरिमितानन्दः शतानन्दः ।

स्वम् - सर्वदा सर्वत्र सर्वथा च जनया समृध्यति इति नन्दिः, इन्
"सर्वधातुभ्यः" इति सूत्रेण ।

निरुक्ति -

अन्योन्यप्रणयानन्दसिन्धोस्समुदितौ हि यः ।
शतानन्दः स विज्ञेयो दम्पत्यानन्ददो मनुः ॥
नन्दिस्सर्वत्र नित्यं स श्रिया ऋध्यति सर्वदा ॥

ज्योतिर्गणेश्वरः - ओं ज्योतिर्गणेश्वराय नमः

विजितात्मा - ओं विजितात्मने नमः

उभयानुकूलोज्ज्वलशेषणशेषणासनादिनित्यपरिवारकगण-
परिचरणीयत्वात् ज्योतिर्गणेश्वरः ।

ज्योतिश्शब्दो हि, [1]
"मरीचीनां पदमिच्छन्ति वेधसः"
"साध्यास्सन्ति देवाः" [2] इति

१- पु०सू०
२- पु०सू०

सदा धौतमानसूरिपरिकरवाचकः, स्वं परत्वं च काष्ठा।
अथ सौशील्यपरमावधिः गुह्यतमः लक्ष्मीरमणीयत्वसम्य-
दुच्छ्रूङ्खलमपि मनोऽस्य प्रणम्नैः प्रणवीकृतमिति विजितात्मा।

निरुक्ति-

नित्यसूरिगणानां च ईशो ज्योतिगणेश्वरः।
सौशील्यस्य गुणस्याथः परमावधि वर्णनम्।
मानसं प्रणतैर्यस्य विजितात्मा जितं च सः।

विधेयात्मा - ओं विधेयात्मने नमः

तेषां विधेयं हि इहागच्छ इह तिष्ठ इहास्य इदं
भुङ्क्ष्व इति विधातुं च योग्यं स्वरूपमस्येति विधेयात्मा।

निरुक्ति-

इहागच्छेह तिष्ठेदं भुङ्क्ष्वेति प्रणतैस्सदा।
योग्यं विधातुं यद्रूपं विधेयात्मा स कीर्तितः।।

सत्कीर्तिः - ओं सत्कीर्तये नमः

ईदृशसौशील्यसत्त्वेनास्य अतिमहती कीर्तिरिति सत्कीर्तिः।
एतावदि सुवचनम्,
'यदस्य कीर्त्यैतं तदस्ति तावदिति। न तु यावदस्ति तावदिति
तदधिकं वा' इति।

"यथा सर्वेश्वर: कृष्ण: प्रोच्यते सर्वपण्डितै: ।
तथापि स्वल्पमेवोक्तं भूतार्थे कमा स्तुति: ।।

"स्थाने हृषीकेश: तव प्रकीर्त्या"[1] इत्यादि च ।

निरुक्ति-

"हृद्भवसौशील्यसत्त्वादि सत्कीर्तिरिति कथ्यते ।

छिन्नसंशय: - ओं छिन्नसंशयाय नम:

एवं सौशील्यप्रथया स्वविषयया सुज्ञानदुर्ज्ञानसुसाध्यदुस्साध्यसुलभ दुर्लभत्वादिसंशयश्छिन्नो येनेति छिन्नसंशय: ।

यथा- "तं हि देवमात्मबुद्धिप्रकाशम्"[2]

"त्वदन्य: संशयस्यास्य छेत्ता न ह्युपपद्यते"[3] इत्यादि ।

निरुक्ति-

सौशील्यप्रथया चैवं दुष्करत्वादिसंशय: ।
छिन्नो येन विशेषेण स प्रोक्तश्छिन्नसंशय: ।।

उदीर्णः - ओं उदीर्णाय नम:

कर्मचर्मचक्षुषामपि प्रत्यक्षयोग्यत्वेन उदीर्ण: । उल्लसित: ।

१- गीता ११।३६

२- श्वे०उ० ६।१८

३- गीता ६।३९

निरुक्ति-

प्रत्यक्षाविषयत्वेन ह्युत्पन्नसर्वचेदगुणाम् ।
उदीर्णं इति स प्रोक्तस्त्वप्रमाणां नयनप्रदः ॥

सर्वतश्चक्षुः - ओं सर्वतश्चक्षुषे नमः

अतां स्पर्शादि चक्षूंष्यपि तत्साक्षात्कारकर्माणीति सर्वतश्चक्षुः ।अतश्छिन्नसंशयत्वं सिद्धम्,स हि स्पष्टप्रत्यक्षो संशयः ।

चक्षिङ्‌व्यक्तायां वाचि' अयं दर्शने पि इति इष्टार्थं दर्शनकर्मा, इदितो प्यस्य न नुम् अन्तो इदित इति व्याख्यानात् । उसि प्रकरणे 'चक्षेः शिच्च' इति उसिः प्रत्ययः ।

'चक्षिङ्‌० ख्यान्' इत्यार्धधातुकविषयः ख्याञादेशो न, निरुक्ते हि सर्वशब्दः ततस्तसि प्रकरणे' आद्यादिभ्यः उपसंख्यानम्' इति तस्याकृतिगणत्वात् सर्वविभक्तिकस्तसिः, स्युत्वम् ।

निरुक्ति-

तत्साक्षात्कारकर्माणि सर्व चक्षूंष्यपि स्वतः ।
अतस्त्वात् सर्वतश्चक्षुः नवाणां नेत्रशक्तिदः ॥

अनीशः - ओं अनीशाय नमः

शाश्वतस्थिरः - ओं शाश्वतस्थिराय नमः

तथा तत्पराधीनस्नानपरिकर्माणोष्याधिस्वावस्थया तेष्वशिशोनेति अनीशः ।तत्परेण अनीशः ।

तदधीनस्नानपरिक्षीरिष्ट्या दिस्वविस्थत्वात् ।

तथा असकृत् प्रत्यक्षीकृतसंपातननानाविभीत्यव्यवहितश्च तिष्ठति चेति शाश्वतस्थिर: ।तथा च श्रीशाश्वते,

"निश्चाकृत्यात्मना विभ्वी सागव्यावतिष्ठते" इति

निरुक्ति-

प्रोक्तो ह्यनीशो यश्चासौ तदायत्ताखिलक्रिय: ।

निश्चाकृत्यात्मना विभ्वी स्थित: स्यात् शाश्वतस्थिर: ।।

भूशयो - ओं भूशयाय नम:

भूषणो - ओं भूषणाय नम:

सन्निधिप्राक्नया,तदर्शितायतनादिभूमिषु स्वयं व्यक्तसिद्धमानुषादिलक्षणासु तदनुग्रहसुखेन शेत इति भूशय: ।

एवं विश्वजनीनेन शीलेन श्रिय: पतिमात्मानं भूषयतीति भूषण: ।

"कृषमृषुणार्थेभ्यश्च" इति युच् ।

निरुक्ति-

स्वयं व्यक्तादिरुपेण को शेते भूशयश्च स: ।

एवं विश्वजनीनेन शीलेन च श्रिय: पति: ।

य आत्मानं भूषयति भूषण: परिकीर्तित: ।।

भूतिर् - ओं भूत्यै नमः

अशोकः - ओं अशोकाय नमः

नहि श्रीमतां अनाघ्रातविधित्वतत्संविभज्यभोज्यत्वसमानयोग-भोग्यत्वादिभूषणं किन्तु भूषणमेव,

सर्वेषाम्बृत्यान्तरोपायरिक्तानां तेषामेव सर्वसमृद्धा विभूतिरिति भूतिः ।

तेषां सुतसुरभिसुहृद एव तद्विभूतिभूत इत्यर्थः ।

एवं करय चिदप्यनाथ स्याश्रमावहणये अशोकः, विशोकः वा ।

निरुक्ति-

यो सौ समृद्धिरैश्वर्यं भक्तानां भूतिरीरितः ।

नाथत्वाच्चापि सर्वेषा मशोकस्तेन ईरितः ।

शोकनाशनः - ओं शोकनाशनाय नमः

तेषां स्वसम्बन्धव्यतिरेकशोकं नाशयतीति शोकनाशनः यथा- 'श्रुतं ह्येवमेव भगवद्दृशेभ्यः तरति शोकमात्मवित्[1] इति सो हं भगवश्शोचामि तम्मा भगवान् शोकस्य पारन्तारयतु' इति

1- छा०उ० ७।१।३

शोचन्ति हि स्वपरबन्धुभूतभगवद्दर्शनक्लेशविद: ।

निरुक्ति-

भक्तानां स्वेन संबन्धव्यतिरेकस्वरूपकम् ।
प्रपञ्चशोकं नाशयति शोकनाशन ईरित: ।।

अर्चिष्मान् - ओं अर्चिष्मते नम:

अर्चित: - ओं अर्चिताय नम:

तत्र गूढ प्रभावो हि तद्बाह्यान्तरचक्षुरुन्मयनक्षमदिव्यतेजोतिशय: अर्चिष्मान् ,अर्च-पूजायाम् इति धातो: ,

'अर्चिशुचिहुसृपिछादिछर्दिभ्य इसि:' इत्युणादि प्रत्यय: । ततो मतुप् । 'तसौ मत्वर्थे' इति भत्वात् पदान्तस्य सोरुत्वन्न, 'आदेशप्रत्यययो:' इति षत्वम्,अत्वन्तदीर्घ: नुमित्यादि: ।

सर्वमेतत् संभावयन् उदाहरति- अर्चित: ।

अर्चा अर्चावतार: सास्य सञ्जातेति सद्यवतारो न परत्वव-द्विप्रकृष्ट: सुरनराकृतावत् क्वचित् कदाचिद्वा,सदा सर्वेषु,क्षेत्रायतनेषु गृहेषु च प्रत्यक्षत्वात्,अस्य च तत्त्वगुह्यं भगवच्छास्त्रे बौधायनवैष्णव-स्मृतिपुराणादिषु निर्णव्यम्, वैष्णवधर्मेषु,

'सुरूपां प्रतिमां विष्णो: प्रसन्नवदनेक्षणाम्'[1]
'कृत्वात्मन: प्रीतिकरीं सुवर्णरजतादिभि:'

१- वि०ध० १०३-१६

'ताम्मर्चयैता प्रणमेतां यजेता विचिन्तयेत्।
विशत्यपास्तदोषस्तु तामेव ब्रह्मरूपिणीम्'[१] इत्यादि

निरुक्ति

भक्ताभ्यन्तरबाह्यैकवधुरुन्नयनधाममु।
दिव्यं तेजःसदा यस्य सोचिष्मानिति कथ्यते ।।
अर्चा ह्यचावितारो स्य क्षेत्रायतनसद्मसु ।
संजाते त्यर्जितःप्रोक्तः सप्ताणीं वाञ्छितप्रदः ।।

कुम्भो - वों कुम्भाय नमः

तत्र तैः परिचित सजातीय सौन्दर्यादिता काम्यते इति कुम्भः । 'कमे कुम् च' इत्यौणादिक म प्रत्यय कुमादेशन्च । अथवा-कौ - भूमो उक्त क्षेत्रायतनादिलक्षणायां ध्यानाराधनादीनां सौम्नि जन्ममरणमात्रेण वा स्वल्पसंबन्धवत्यां यमभयादिभ्यापह महाप्रभावत्वेन भातीति कुम्भः । पृषोदरादित्वात् साधुत्वम्,श्रीपौष्करमागे,

'बाभास्यतिमूभागं परिस्तद्रदेव हि । स्वदैत्रः' इत्यादि ।

निरुक्ति-

काम्यते यस्सजातीयैः गुणैः कुम्भः प्रकीर्तितः ।
भातीति कुम्भो नित्यं हि भक्तानां भयनाशकः ।।

१- वि०ध० १०२।३८

विशुद्धात्मा - ओं विशुद्धात्मने नमः

स्वमर्हणाश्रितेषु निरवशेषित सर्वस्वतया विशुद्धश्चासौ आत्मा चेति वा, विशुद्धः आत्मा यस्य इति वा विशुद्धात्मा ।

निरुक्ति-

स्वाश्रितेष्वशेषेण सर्वस्वत्यागतस्सदा ।
विशुद्धात्मा ।

विशोधनः - ओं विशोधनाय नमः

तत्र क्षेत्रेषु न्यस्तदेहान् स्वप्राप्त्यर्हान् विशोधयतीति विशोधनः । शुध-शौचे, इतिधातुः, विपूर्वः, णिच् गुणः, ततोल्युः ल्युड्वा इत्यादि ।अनः णिलोपः ।

निरुक्ति-

च पूर्वोक्त विभवः स्यात् विशोधनः ।

अनिरुद्धो - ओं अनिरुद्धाय नमः

अप्रतिरथः - ओं अप्रतिरथाय नमः

अथ क्षेत्रविशेषेषु पूर्वोक्तव्यूहविभवानां स्थितिविशेषः,

"जनार्दनाख्यया देवस्त्वनिरुद्धो जगत्प्रभुः।
भूभागे वासुभाण्डाख्ये नित्यसन्निहितस्थितः"

इतिअनिरुद्धः। स एव जनार्दनाख्यत्वादनिष्ट जनार्दने अप्रतिपक्षत्वात् अप्रतिरथः।

रमु क्रीडायाम् इति धातोः "हनि कुषि नीरमिकाशिभ्यः क्थन्" इति क्थन् प्रत्ययः।

निरुक्ति

वासुभाण्डाख्यभूभागे नित्यसन्निहितस्थितः।
अनिरुद्धः इति ख्यातो वरुणो मनुरुत्तमः॥
प्रतिपक्षस्य राहित्यात्, ह्यन्वानिष्टजनार्दनः।
विख्यातो ह्यप्रतिरथः नवार्णः शत्रुनाशकः॥

प्रद्युम्नो, – ओं प्रद्युम्नाय नमः

मितविक्रमः – ओं अमितविक्रमाय नमः

आत्मप्रद्योतनात् प्रद्युम्नः, "प्रद्योतयिता" इति मौलः, पाञ्चरात्रे मूल०श्लो० प्रद्युम्नः – पुरुषोत्तमः।

"अधिष्ठाय स्थितस्साक्षात् भक्तानां सुगतिप्रदः"।
त्रैलोक्येप्यपर्यवसितविक्रमत्वात् त्रिविक्रमः, अमितविक्रमः,
"यामुनं जलमाश्रित्य देवदेवस्त्रिविक्रमः।
स्थितः कमलसम्भूतनुणां च सुगतिप्रदः॥

निरुक्ति-

आत्मप्रद्योतनत्वाच्च प्रद्युम्न इति कथ्यते ।
अधिष्ठाय स्थितस्साधात् भक्तानां सुगतिप्रदः ।
लोकत्रयेऽप्यपर्याप्तविक्रमो मितविक्रमः ॥

कालनेमिनिहा - ओं कालनेमिनिघ्ने नमः

एतेषु दोत्रेषु स्थित्वा कलिकल्मषापहः,कालनेमिनिहा ।

अविद्याख्या च या नेमिः,कालचक्रस्य दुर्धरा ।
सा मयीयं समाश्रित्य विग्रहं विधुनोति च ॥
"ध्यायेचल्प्रसरघ्नं च देवम्" इति हि कालनेमिघ्नध्यानम् ।

निरुक्ति-

कालचक्रस्य या नेमिरविद्याख्या च दुर्धरा।
तां नाशयति यश्चासौ कालनेमिनिहा स्मृतः ॥

शौरिः - ओं शौरये नमः

"उत्पलावर्तके देशे शौरिसंज्ञो च्युतः स्थितः" इति शौरिः ।

शूरस्य वसुदेवस्य अपत्यम् इति शौरिः ।

निरुक्ति-

नवाङारो मनुरयमविद्यामूलमोचकः ।
शांरिनाम्ना स्थितश्शौरिः उत्पलावर्तके शुभे ।।

शूरः - ओं शूराय नमः

"धराधरे चित्रकूटे रक्षः क्षयकरो महान् ।
संस्थितश्च परो रामः पद्मपत्रायतेक्षणः"

इति शूरः, रामः । "शु-गतौ" इति धातोः "शु सिचिमिना दीर्घश्च" इति रक् प्रत्ययः ।

निरुक्ति-

सर्वरक्षःक्षयकरः शूर इत्यभिधीयते ।"

शूरजनेश्वरः - ओं शूरजनेश्वराय नमः

त्रिलोकात्मा - ओं त्रिलोकात्मने नमः

स एव विशेष्यते शूरजनेश्वरः ।
"मगधामण्डले विप्र महाबोध धराश्रितः ।
संस्थितो लोकनाथात्मा देवदेवो जनार्दनः ।।

इति त्रिलोकात्मा, भक्तानुग्रहाय त्रीन् लोकान् सातत्येन गच्छतीति "सातिभ्यां मनिन्मनिणौ" इति मनिन् प्रत्ययः । अत सातत्यगमने

निरुक्ति-

परास्मजने शश्वत् स्मृतश्शूरजनेश्वरः'
यस्मात्तत्थेन लोकांस्त्रीन् भक्तानुग्रहकाम्यया ।
गच्छतीति त्रिलोकात्मा बखणो मुक्तिदायकः ।।

त्रिलोकेशः - ओं त्रिलोकेशाय नमः

शुभ भासाय भूनागं प्राग्ज्योतिषपुरे तथा ।
देवं विश्वेश्वराख्यं तु स्थिमेत्य खगोचरात्' इति । त्रिलोकेशः ।

'केशवः क्लेशहा लोके केल्प्येण धितो स्थितः ।
मथुराख्ये महाक्षेत्रे वाराणस्यामपि द्विज' इति ।
त्रिलोकानामीशः, त्रिलोकेशः ।

निरुक्ति-

त्रिलोकानामीशतया त्रिलोकेशः प्रकीर्तितः ।

केशवः - ओं केशवाय नमः

'क इति ब्रह्मणो नाम ईशो हं सर्वदेहिनाम् ।[१]
आवां तवाङ्गे संभूतौ तस्मात् केशवनामवान्' ।।

१- हरि० २७९-४७ ।

इति निरुक्तिः ।

केशिनमवति हिनस्ति इति वा केशवः ।

कै शब्दे इति धातोः, "अन्येष्वपि ०" इति डः । टिलोपः, गुणः ।ततो स्यापि केशरुपत्वात् ।

निरुक्ति-

"ब्रह्मेशयोः स्वाड्०गजत्वात् केशवः परिकीर्तितः।

केशिहा - ओं केशिघ्ने नमः

"केशवकेशिहन्तारम्" इतिवत् स्वयमेव निर्वचनान्तरमाह केशिहा इति, केशिनं के नावन्तं तुरगदानवं हन्तीति केशिहा ।

निरुक्तिः-

"असुरं केशिनामानं हतवान् केशिहा स्मृतः" ।

हरिः - ओं हरये नमः

"गिरौ गोवर्धनाख्ये तु देवः सर्वेश्वरो हरिः ।"

"संस्थितः पूजितः स्थाने" इति हरिः ।"हृञ् हरणे" इति धातोः "सर्वधातुभ्यः, इन्" इति वर्तमाने "हृपिषिरुहिवृतिविदि-छिदिकीर्तिभ्यश्च" इति प्रवृत्ते इन् प्रत्ययः ।

निरुक्ति-

"भक्तानां दुःखहरणाद्वर्णश्रैष्ठ्याद्धरिः स्मृतः" ।

कामदेव: - ओं कामदेवाय नम:

कामपाल: - ओं कामपालाय नम:

"कामदेवस्तु भगवान् सर्वेषां सर्वकामद: ।
शंकराख्यमासाद्य संस्थितो प्सरसार्चित:" इति कामदेव: ।
दीव्यतिदानकर्मा"

स एव दत्तानुपालनात् कामपाल: । स एव दत्तं कामं पालयतीति रक्षतीति कामपाल: इति वा ।

"पाल-रक्षणे" चुरादि: । तत: पचाद्यच्, णिलोप:, काम: कर्मणि घञ्न्ति व्युत्पादित: ।

निरुक्ति-

सर्वेषां कामदत्वाच्च कामदेव इतीरित: ।
दत्त्वा तु पालनकर: कामपाल: प्रकीर्तित: ।।

कामी - ओं कामिने नम:

कान्त: - ओं कान्ताय नम:

प्रदेयातिशयात् कामी । सव कामा: प्रदेयार्था: वतिशयिता:, अस्य सन्तीति कामो, काम उक्त:, ततो तिशायने मत्वर्थीय इनि: ।

स एव स्वयमेव कमनीय: कान्त: ।

अतो ह्यप्सरसार्चितः एवमुत्तरत्रापि संज्ञासामर्थ्यादिना तवल्पोत्र संबन्ध ऊहनीयः ।

निरुक्ति-

प्रदेयातिशयात् कामी ।
कान्तः स्यात् कमनीयकः ।

कृतागमः - ओं कृतागमाय नमः

अनिर्देश्यवपुः - ओं अनिर्देश्यवपुषे नमः

अथ शक्तिशावतारः ,

नानामन्त्रमयीं दिव्यां व्यन्व्यत्यमलात्मनाम्" इति कृतागमः ।

तदधुगुणानुग्राहकरूपवैचित्र्यात् अनिर्देश्यवपुः, अनिर्देश्यम् इदम् ईदृशमिति निर्देष्टुम् अशक्यं वपुः शरीरमस्येति विग्रहः ।युगानुसारिकान्तिश्च इति ।

निरुक्ति-

मन्त्रविधाव्यञ्जकत्वात् कृतागम इतीरितः ।
युगानुसारिरूपत्वात् अनिर्देश्यवपुः स्मृतः ॥

विष्णुर् - ओं विष्णवे नमः

एवं व्याप्तिनियमनादिशक्तिद्वारा विश्वव्याप्तेः विष्णुः ।

"सर्वशक्त्यात्मने" इति तन्मन्त्रवर्णो आदित्यपुराणे-

"यस्मादिष्टमिदं सर्वं तस्य शक्त्या महात्मन: ।"

उभौगे "विष्णुर्विक्रमणाद्देव:" इति वा

निरुक्ति-

स्वशक्त्या जगतो व्याप्त्यैव विक्रमणात् स्वत: ।

विष्णु: स्मृतो विशेषेण ।

वीरो - ओं वीराय नम:

आज्ञाप्रतीघाकेणैव गदाचक्रद्वयेन तु ।

प्रेरितेन हिनस्त्याशु साधुसन्तापकारिण:" इति वीर: ।

निरुक्ति-

वीर: स्यात्साधुदु:खहा" ।

नन्तो, - ओं अनन्ताय नम:

धनञ्जय - ओं धनञ्जयाय नम:

नास्य देशकालवस्तुतो नव्यवस्थन्तोति अनन्त: ।

"अनन्तमूर्तये" इतिमन्त्रवर्णात् ।

"नास्त्यन्तो विस्तरस्य मे"[1]

"यथैतस्यैवान्तो नास्ति यद्ब्रह्म"[2] इति

१- गीता १०-१९

२-तै० उ० आ० १ ।

सदा सर्वत्र सर्वथा च प्रवृत्तस्वभाव इत्यर्थः ,न च वस्तुपरिच्छेदा-भावो वस्त्वभेदः देशकाल्योरतथात्वप्रसङ्गात् न चैतदिष्टमानन्त्यं गुणविभूतिभ्यामप्युपपद्यते - धनञ्जयः ।

द्रव्योपार्जनलोभगृहनोपजीवनादियोग्यत्वाधिक्येन हेमरत्नादिकं धनमयः करोतीति ।

'संशायां भृतवृजिधारिसहितपिदमः' इति सूत्र ।

ब्रह्मण्यो - ओं ब्रह्मण्याय नमः

इह हि बृहत्तु ब्रह्म शब्दं प्रयुक्ते तत्र तत्र तत्तत्कर्मज्ञानाभ्यामशेष भोगमोक्षाभावकत्वबृहत्त्वात् जीवात्मापि ब्रह्मोच्यते, 'तज्ज्ञानं ब्रह्मसंज्ञितम्'[1] निर्दोषं हि समं ब्रह्म' इत्यादिषु । ताभ्यां स्थितिभोगादिसर्वावस्था-हेतुत्वेन हितः ब्रह्मण्यः । तत्कार्यं महदहंकारादिप्रभृति च ब्रह्म,वस्तोकविस्तर-त्वात्' तस्मादेतद् ब्रह्म नाम रुपमन्नं च जायते[2]। इत्यादौ ।

निरुक्ति-

देशतः कालतो वापि गुणतो वस्तुतो पि वा ।
अवधिर्यस्य नास्तीति सो नन्तः समुदाहृतः ।।
द्रव्योपार्जनलोभादियोग्यत्वाधिक्यतस्ततः ।
मणिमौक्तिकरत्नानि हेमरुप्यादिकं धनम् ।।
यो यः करोति सततं धनञ्जय इतीरितः ।
जीवात्मा प्रकृतिश्चापि ब्रह्मेति व्यपदिश्यते ।

१- गी० ५।१९

२-मु०उ० १।१।९

ताभ्यां यः स्थितिभोगादेस्त्वविस्थासु कारणम् ।
ब्रह्मण्यः स च विज्ञेयस्सप्तार्णो भोगदायकः ॥

<u>ब्रह्मकृद्ब्रह्मा</u> - ओं ब्रह्मकृद्ब्रह्मणे नमः

तस्य कर्ता ब्रह्मा यस्य सर्वथा नियाम्यः, सः ब्रह्मकृद्ब्रह्मा ।

महदादितमः कार्यं ब्रह्मेति ह्यभिधीयते ।
तस्य कर्ता स्वयं ब्रह्मा नियाम्यो यस्य सर्वदा ।
स तु स्यात् ब्रह्मकृद्ब्रह्मा नवार्णस्सर्वशक्तिदः ॥

<u>ब्रह्म</u> - ओं ब्रह्मणे नमः

स्वं व्यक्ताव्यक्तसमष्टिव्यष्टिपुरुषान् बृंहयति निरतिशय-कल्याणगुणगणैः स्वरूपगुणविभवैः स्वयं च बृंहतीति वनापेक्षितं वेदान्तवेद्यं परं ब्रह्म, ब्रह्म ।

"बृंहेर्नोऽच्च" इति मनिन्प्रत्ययः, नलोपश्च । "बृहत्वाद्बृंहणत्वाच्च ब्रह्मेति परिकीर्त्यते" इति ।

<u>निरुक्ति-</u>

व्यक्ताव्यक्त समष्ट्यादिपुरुषांश्चैव नित्यशः ।
गुणैश्च कल्याणकरैर्ब्रह्म बृंहयतीति च ।
रुपैः स्वरूपेण गुणैर्विभवैश्च स्वयं मुहुः ।
बृंहेति स तु वा ब्रह्म षडर्णस्सन्ततिप्रदः ॥

ब्रह्मविवर्धनः – ओं ब्रह्मविवर्धनाय नमः

ब्रह्मवित् – ओं ब्रह्मविदे नमः

सर्वस्यास्य निमित्तं तप उपलक्षितो धर्मोऽपि ब्रह्म,

"तपो ब्रह्म" इति श्रुतेः तैत्तिरीयोपनिषदि । तं विवर्धयतीति ब्रह्मविवर्धनः ।

तत्प्रतिपादको वेदोऽपि ब्रह्म, "ब्रह्माध्येष्यमाणः, इत्यादेः

"अनन्ता वै वेदाः" काठकम् ।

तानप्यवधिना वेत्तीति "ब्रह्मवित्" ।

अनादिनिधनं ब्रह्म न देवा नर्षयो विदुः ।

एकस्तद्वेद भगवान् धाता नारायणः स्वयम् ॥

निरुक्ति–

तपो विवर्धनान्नित्यं स्मृतो ब्रह्मविवर्धनः ।

यो वेदानन्ततो वेत्ति स ब्रह्मविद् उदीरितः ॥

ब्राह्मणो – ओं ब्राह्मणाय नमः

ब्रह्मी – ओं ब्रह्मिणे नमः

वेदव्यवस्थापनार्थं स्वयमत्रिगोत्रादौ दत्तात्रेयादिरूपेण

ब्राह्मणो भवति, इति ब्राह्मणः । "ब्रह्म मयत्यणाति" इति यानेरुक्ताः ॥

सर्वमेतत्प्रमाणप्रमेयरूपं ब्रह्म स्वमिति ब्रह्मी ।

"सर्वब्रह्ममयो हरिः" इति ।

निरुक्ति-

दधानैयादि रूपेण ह्युदीणाँ ब्राह्मण: स्मृत: ।
पठनाञ्च वेदस्य ब्राह्मण: परिकीर्तित: ।।
मानमेयस्वरूपत्वात् स्वयं ब्रूते शब्दतो ।।

ब्रह्मज्ञ - ओँ ब्रह्मज्ञाय नम:

ब्राह्मणप्रिय:- ओँ ब्राह्मणप्रियाय नम:

वेदानर्थयन्तं साक्षात्करोतीति ब्रह्मज्ञ:, "वेदविदेव चाहम्" इति। तदधिकारिणो ब्राह्मणा: प्रिया यस्येति ब्राह्मणप्रिय:,यथा-

घ्नन्तं शपन्तं परुषं वदन्तं यो ब्राह्मणं न प्रणमेद्यथाहम् इत्यादि

"ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रिया:"[1]

यद्ब्राह्मणस्य मुखत:

"विप्रप्रसादादसुरान्जयामि"[2]

"किं पुनर्ब्राह्मणा: पुण्या:"[3]

"महतो महीयान्"[4],

"परात्परं यन्महतो महान्तम्"[5]

"महान्तं विभुमात्मानम्"[6]

१- गीता १२।२०
२- वि०पु०५२।५२२
३- गीता ९।३३
४- तै०उ० १
५- तै०उ० १।५
६- कठ०उ० २-४

'महत: परमो महान्' इत्यादि ।

निरुक्ति-

यो वेदानर्थतो वेत्ति सो पि ब्रह्मज्ञ विश्रुत: ।
वेदाधिकारिणो विप्रा: प्रिया यस्येति वै सदा ।
ब्राह्मणप्रिय इत्युक्तो नवाणो धर्मदो मनु: ।।

महाक्रमो - ओं महाक्रमाय नम:

अथैवमुत्सुकीकृतेषु वात्सल्यतो ध्यानन्त्यं परमतुङ्गमात्मानं परमनिम्नभवपातालाज्जीवानारोहयतो महत्यारोहणसोपानपद्धानुपूर्व्यस्येति महाक्रम: ।

यथा जननी, स्तनन्धयमादौ स्तन्यन्धापयति, अथ दुग्धम् अथाहारम्, अथ भोगान् गमयति- स्वमयं सुकृतिनम् अहेच्यास्तिष्ठया भिमुख्यानुवर्तनज्ञानभक्तिविस्रम्भक्रमेणैव प्रापयति, अभ्युत्थानार्थं छन्दानुवर्तनार्थंन्च, अन्यथा, 'अन्यायैव भवत्येणा अविधा ह्युपक्रमोज्झिता' अत: सत्वाहु: -

'जन्मान्तरसहस्रेषु तपोध्यानसमाधिभि: ।
नराणां क्षीणपापानां कृष्णे भक्ति: प्रजायते' इति
'बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते'[१]

१- गीता ७।१९

"अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय"[1]

निरुक्ति-

परमोन्नतिमात्मानं धनिम्नात् भवपातकात् ।
जीवान् समारोहयतो ज्ञानभक्त्यादिरूपिणी ।।
पवानुपूर्वी यस्यास्ति महाक्रम इतीरित: ।।

महाकर्मा - ओं महाकर्मणे नम:

कृमिकीटादिभावे दुर्जरपरोच्छिष्टलिवधक्त्मात्र जन्तुं स्वमहाविभवानुभवाभियुक्तं करोतीत्यतिविस्मयनीयमहद्स्य कर्मेति महाकर्मा ।

निरुक्ति-

अत्यन्तहीनान् जन्तूंश्च योग्यान् स्वानुभवस्य च ।
करोति महदाश्चर्यं कर्म यस्यास्ति सर्वदा ।
महाकर्मा स विज्ञेयो ह्यष्टाक्षरो मनुरुत्तम: ।।

महातेजा - ओं महातेजसे नम:

एवं तामधानामप्यनाथविद्यातमस्तस्करतेजस्त्वात् महातेजा ।

निरुक्ति-

अनाथविद्याख्यतमोहारि तेजो महत्त: ।
महातेजा ह्यत: स्यातस्तेजोदो वसुमणकि: ।।

१- गीता १२।९

महोरग:- ओं महोरगाय नम:

कथमयमतिमहान् दवीयसां नेदीयान् विषयान्तरवत्
तत्करणान्यनुप्रविश्य तत्रान्त: करणानुप्रवेशात् - महोरग: ।उर:
प्रदर्शितं हृदयमुर: तद्द्वारा तान् गच्छतीति -

"उरसो लोपश्च" इति डप्रत्यय: ।

"यो न चित्रैर्न विभवै: न वासोभि र्न भूषणै: ।
तोष्यते हृदयेनैव तस्मीशान्न पूजयेत् ।। इति ।

निरुक्ति-

महोरग इति ख्यातश्चित्तद्वारा प्रवेशनात् ।।

महाक्रतुर - ओं महाक्रतवे नम:

महायज्वा - ओं महायज्वने नम:

महत्सर्वक्रियारूपमाराधनमस्येति महाक्रतु: ।
समर्पणसंस्कारस्वादुकृतै:, आगमशास्त्रकारितसर्वव्यापारैराराध्य-
त्वात् ।यथा-
"यत्करोषि[१]" इत्यादि

१- गीता ९।२७

स्वायाजिनामन्ययाजिभ्योऽप्यत्युत्कर्षणात् महायज्वा 'सुयजोङ्वनिप्' यथा-

'तेषामेकान्तिनश्श्रेष्ठास्ते चैवानन्यदेवताः' इति ।

निरुक्ति-

सर्वैश्च सुकरा पूजा यस्य स्यात्स महाक्रतुः ।
देवतान्तरयाजिभ्यः स्वयाज्युत्कृष्टकारकः ।
महायज्वा समुद्दिष्टः सत्कर्मफलदो मनुः ।।

महायज्ञो - ओं महायज्ञाय नमः

अभिगमनभोगमधुपर्कादिसाष्टाङ्गयागोऽप्यन्येभ्यस्तथेति महायज्ञः

यथा- 'सर्वेषां किल धर्माणामुत्तमो वैष्णवो विधिः' ।
रक्षते भगवान् विष्णुर्भक्तानात्मशरीरवत्'
याः क्रियास्संप्रयुक्तास्स्युरेकान्तगतबुद्धिभिः ।
तास्सर्वाः शिरसा देवः प्रतिगृह्णाति वै स्वयम् ।इति
'अहो ह्येकान्तिनस्सर्वान् प्रीणाति भगवान् हरिः ।
विधिप्रयुक्तां पूजां च गृह्णाति शिरसा स्वयम् ।
'न तत्र पशुघातो भूत्'[१]

१- भा०शा० ३३७-६

निरुक्ति-

अन्येभ्यो देवयागेभ्यः स्वयागोत्कृष्टकारकः ।
महायज्ञः समाख्यातो ह्यष्टानां हरियागदः ।।

महाहविः - ओं महाहविषे नमः

अहिंसासात्त्विकोपनिषदानि हवींष्यस्येति महाहविः ।

यथा- "ब्रह्मार्पणं ब्रह्महविः"[१] इत्यादि,

"ज्ञानयज्ञेन"[२]

"यो हमस्मि स सन्यजे यस्यास्मि न तमन्तरेमि"[३]

"इदमहममामृत योनौ सूर्ये ज्योतिषि जुहोमि"[४]

"श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः"[५]

इति च सर्वं मनः शरीरयोः व्यापारसमाराध्यत्वम् ।

निरुक्ति-

"आत्मरूपं हविर्यस्य स महाहविरुच्यते ।

१- गीता ४।२४

२- गीता ९।१५

३- ३ ब० ७।४७

४- तै०उ०२।२५

५- गीता ४।३३

स्तव्य: - ओं स्तव्याय नम:

स्तवमर्हतीति, यत् अनध्यारोप्यमहामङ्गलनित्यनिरवधिक-
निरवद्यगुणो नाम यदसद्व्यपदेश्य:, पतिरेव स्तुतिमर्हति, इति न तु
विपरीतगुणो देवतान्तरादि:, बार्हस्पत्यस्मृतौ,

'आदरेण यथा स्तौति धनवन्तं धनेच्छया ।
तथा चेद्विश्वकर्तारं को न मुच्यते बन्धनात्'[1] ।।

'एतोदं कीर्तनीयस्य' इत्यादि ।

निरुक्ति-

चेतश्शरीरयोर्जन्तोर्व्यापाराराध्यता हरे: ।
उभता नारायणस्याथ वागाराध्यत्वमुच्यते ।
स्मृत: स्तुत्यर्हणात् स्तव्य: गदणो बन्धमोचक: ।।

स्तवप्रिय: -ओं स्तवप्रियाय नम:

यथाकथञ्चित्, यया कयाचिद्भाषया, येन केनापि, तेजस्कर:
तिरस्करी वा, गुणसंकीर्तनाभिमानेन क्रियमाणस्तव: स्वविषय:
प्रियतमो स्येति स्तवप्रिय:, वकण्ठकमेतत् घण्टाकर्णादिवृ‍‍‍त्ते-

निरुक्ति-

यया कयाचिद्भारत्या येन केनापि जन्तुना ।
यथाकथंचित् कथितो यस्य प्रियतमस्तव: ।।
स्तवप्रिय: स कथितो वस्वर्ण: प्रीतिवर्धक: ।।

1- बा० स्मृ०

स्तोत्रम् - ओं स्तोत्राय नमः

स्तुतः - ओं स्तुताय नमः

स्वस्तोत्रमपि प्रसन्नेनानेन करणभूतेन निष्पाद्यते इति स्तोत्रम्
"दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे" इति ष्ट्रन्।
इदन्तु ध्रुवस्तवे द्रष्टव्यम्। सहस्रफणात्रयीमयादिभिस्सूरिभिः,

निरुक्ति -

अनन्तैः, ब्रह्मादिभिरस्मदादिभिश्चाविशेषेणानवधौ काले स्तुत इति
स्तुतः। स्वेनैव निष्पादितया स्वस्तुतेः स्तोत्रमुच्यते।
शेषशेषासनाद्यैः सूरिभिश्चास्मदादिभिः।
स्तुतत्वादविशेषेण स्तुत इत्यभिधीयते॥

स्तोता - ओं स्तोत्रे नमः

रणप्रियः - ओं रणप्रियाय नमः

स्वस्तोतारं स्तोतुं शीलमस्येति स्तोता।
"यं स्तुवन् स्तव्यतामेति वन्द्यमानश्च वन्द्यताम्"[१]
इति एतत् वैलक्षण्यात्रायाम्।
श्रीमद्रामायणमहाभारतप्रभृत्यभिष्टुताभीष्टदिव्यचेष्टितः रणप्रियः।

१- वि०ध० ७५-५५

"युद्धप्रीणनरणादिवेष्टितो हि सः ,यथा-

"ततस्त्वकाम सुग्रीवमङ्गदं च महाबलम् ।

चकार राघवःप्रीतो हत्वा रावणमाहवे ।।

निरुक्ति-

स्तोतारं परं स्तोतुं शीलं यस्यास्ति सर्वदा ।

स्तोता स स्यात् पञ्चवर्णः सर्वस्तुत्यत्वदो मनुः ।

युद्धप्रियं युद्धकर्म यस्यास्ति स रणप्रियः ।

पूर्णः - ओं पूर्णाय नमः

बहुव्यथा यासत्कारविरहे पि स्तोत्रादिमात्रसाध्यायम् , कुतः यतः

पूर्णः ।स्वत स्वा वाप्तसमस्तकामः ।

निरुक्ति-

अवाप्तसर्वकामत्वं यस्यासौ पूर्ण उच्यते ।

पूरयिता - ओं पूरयित्रे नमः

पुण्यः - ओं पुण्याय नमः

किन्तर्हि पुरणीयवत् स्तोत्रादिकमपेक्षते, तन्मनोरथपूरण-

शीलत्वात् तदाह-पूरयिता ।

पातकिनां पि स्वस्तुत्यर्थिन् पुनन्तीति पुण्यः ।

"पूनो मण्णाुद्रुस्वश्च"

निरुक्ति-

'सदा पूरयितुं शीलं यस्य स्वातृमनोरथान्
स स्यात्पूरयिता ।
पुण्य: ओं ओं पातकिपावन: ।

पुण्यकीर्तिः - ओं पुण्यकीर्तये नम:

संकीर्तनमपि तथेति पुण्यकीर्तिः ।
नामसंकीर्तनं भक्त्या विलायनमनुत्तमम् ।
मैत्रेयाशेषपापानां धातूनामिव पावक: ।
अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः ।[1]
पुमान् विमुच्यते सद्य: सिंहत्रस्तैर्मृगैरिव ।।

'कलौ संकीर्त्य केशवम्'[2]
अत एव हि तत्परसूक्तादीनां षड्गिलतपावनत्व श्रुति: ।

निरुक्ति-

पुण्य: श्लोको स्ति यस्येति पुण्यकीर्तिः स तु स्मृत:' ।

१- वि०पु० ८-९१

२- वि०पु० ६।२।१७

अनामयः - ओं अनामयाय नमः

एवं स्वसंस्पर्शदिव्यौषधेन अनामयः ।

संसारमहाव्याधिविरोधी भवो हि व्याधिः,भगवदनुभवशक्ति-प्रतिबन्धकत्वात्,

'व्याधिभिःपरिपूर्णोऽस्मि' इति तज्ज्ञवचनात् ।।

निरुक्तिः-

'संसाराख्यमहाव्याधेः विरोधित्वात् अनामयः ।

मनोजवः - ओं मनोजवाय नमः

तीर्थकरः - ओं तीर्थकराय नमः

उक्तेषु शीघ्रकारित्वात् मनोजवः,यथा हि

'क्षिप्रं भवति धर्मात्मा'[1]

सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु ।

विष्णोराराध्यविन्यासप्रारम्भादेव नश्यति' ।। इति च

आत्मवत् स्मरणकीर्तनादिमात्रेण स्वपावनानां गङ्गापुष्करादि-तीर्थानां हेतुत्वात् तीर्थकरः ।

श्रुतिस्मृत्यादिसत्समयप्रवर्तनाद्वा,यथा-[2]

'योगो ज्ञानं तथा सांख्यम्'

१- गीता ९।३१

२- भा०वानु० १५०-१४१

इत्यादि अणायदुष्प्रवेश सिन्धो रिवात्मन: । प्रवेशावतार सोपान-करणात्ता ।

निरुक्ति-

भक्तानां सम्यक: शोधं करोतीति मनोजव: ।
गङ्गादितीर्थहेतुत्वात् श्रुतिस्मृत्यो: प्रवर्तनात् ।
आत्मप्रवेशसोपानं कृत्वा तीर्थकर: स्मृत: ।।

वसुरेता: - ओं वसुरेतसे नम:

तत्र कृष्णावतार: दिव्यज्योतिरुपादानहेतुत्वात् वसुरेता: ।
वस्विति हि ज्योति: पर्याय: ।

"उज्जहारात्मन: केशौ सितकृष्णौ महामुने"[1]

"मम ते केशसंज्ञिता:"[2]

इति केशशब्दश्च व्याख्यात: ।

निरुक्ति-

वसुशब्दो ज्योतिरर्थ: रेतस्तत्कारणं मतम् ।
दिव्यज्योति: कारणत्वात् वसुरेता: प्रकीर्तित: ।।

१-वि०पु० ५।१।६०

२- भा०शा० ३४२।४८

वसुप्रदः - ओं वसुप्रदाय:

वसुप्रदो - ओं वसुप्रदाय नमः

परमनिधिमात्मानं देवकीवसुदेवाभ्यां पुत्रत्वेन प्रददातीति वसुप्रदः। ताभ्यां जात्पितुः स्वस्य पितृत्वरुपं महतेजः प्रददातीति पुनश्च वसुप्रदः।

निरुक्ति-

देवकीवसुदेवाभ्यामात्मरुपं महद्धनम्।
पुत्रत्वेन प्रकर्षेण ददातीति वसुप्रदः॥
देवकीवसुदेवाभ्यां स्वपितृत्वं महत्तु।
तेजो यः प्रददातीति वसुप्रद इतीरितः॥

वासुदेवो; ओं वासुदेवाय नमः

वसुदेवापत्यत्वाच्च वासुदेवः।

निरुक्ति-

'वसुदेवापत्यतश्च वासुदेवः प्रकीर्तितः॥

अष्टम

शतकम्

अष्टमो ध्याय:

קיבוץ שדות:

वसुः -ओं वसवे नमः

वसुमनाः - ओं वसुमनसे नमः

एतदवताराणमं क्षीरार्णवनिकेतनत्वमाह - वसुः ।

तत्र वसतीति यथा

"स लोकानां हितार्थाय क्षीरोदे वसति प्रभुः"[1]

"एषः नारायणः श्रीमान् क्षीरार्णवनिकेतनः ।

नागपर्यङ्कमुत्सृज्य ह्यागतो मथुरां पुरीम्"[2] ।इत्यादि ।

तत्र लक्ष्मीजन्मभूमौ वसतौ यि वसौ वसुदेवे मनो यस्येति वसुमनाः।

देवदत्तो दत्तः,सत्यभामा भामेतिवत् वसुः,वसुदेवः इति भाष्यादि ।

निरुक्ति-

वसतीति वसुर्लोकहितेच्छुः क्षीरसागरे ।

जन्मभूम्यर्णवे लक्ष्म्याः वसतौ यस्य वै मनः ।

वसतीति वसुदेवे हि स स्यात् सुमनाः परम् ॥

1-भा०४०४७।२६

2- हरि० ११२।६२

हविः - ओं हविषे नमः

देवकिवसुदेवसमोपवासरु चिरपि अविदप्रेमाकुलाभ्यां ताभ्यां कंसात् गुप्तये नन्दयशोदाभ्यामादीयतेति हविः ।

निरुक्ति-

नन्दगोपयशोदाभ्यां कंसोपद्रवशान्तये ।

आदीयते स्वीक्रियते स हविः परिकीर्तितः ।।

सद्गतिः - ओं सद्गतये नमः

सत्कृतिः - ओं सत्कृतये नमः

जायमान एव असुरकृतापदपनोदनः सतां गतिः सद्गतिः,

यथा- सन्तसन्तोषमधिकं प्रथमं चण्डमारुतः[1] इति

सत्यः सकलसंसारनिगलच्छेदिभ्यः दधिनवनीतचौरणोलूखलबन्धरिङ्खण रासक्रीडादिका मुग्धकृतयो यस्येति सत्कृतिः- यथा-

जन्म कर्म च मे दिव्यम्[2] इत्यादि ।

निरुक्ति-

उत्पन्न एवकंसादिकृतबाधापनोदनात् ।

सतां प्राप्यतया चैव सद्गतिः समुदाहृतः ।।

रासक्रीडादिकृतयः सत्यो यस्य च सत्कृतिः ।।

१- विष्णु० ५।३।४

२-गीता ४।९

सखा - ओं सखाये नम:

सद्भूति:- ओं सद्भूतये नम:

सखापि सतां स्वयमेवेति सखा ।
न हि तदव्यतिरेकेण किंचित् स्यात् ।
"नतदस्ति विना यत् स्यात् मया"[1] इति
सतां पुत्रो मित्रबन्धु: दूत: सारथि: अन्यच्च तद्भवन् सद्भति: ।
"कृष्णाश्रया: कृष्णबला: कृष्णनाथाश्च पाण्डवा: । कृष्ण:
परायणं तेषां" इति

निरुक्ति-

स्वयमेव सतांसखा यस्मात् सखेति कीर्त्यते ।
सतां पुत्रकलत्रादिभूत्यासद्भूति रुच्यते ।।

सत्परायण: - ओं सत्परायणाय नम:

सत्परायणम् ब्राह च - -
"मामेवैष्यसि"[2] इति
पुल्लिङ्गत्वे सन्तो स्य परायणमिति सत्परायण: यथा-
"मम प्राणा हि पाण्डवा:"[3]
"पाण्डवानां भवान्नाथ:, भवन्तं च श्रितावयम् ।
ज्ञानी त्वात्मैव मे मतम्"[4]

१- गीता ४।६

२- गीता १८।६५

३- मा०उ० ६०।३३

४- गीता ७।१८

निरुक्ति-

सतां परं स्यादयनं सन्तो यस्योऽयनम् ।
स सत्परायणं ख्यातो यद्वा स्यात् सत्परायणः ।।

शूरसेनो - ओं शूरसेनाय नमः

यदुश्रेष्ठः - ओं यदुश्रेष्ठाय:

यादव पाण्डवादयो भूभारावतरणे च शूराः विक्रान्ताः सेनाः तदनुग्रहात्साहायकपरिवारसहिताः,यादवपाण्डवादिपृतना यस्येति शूरसेनः,

अयं स कथ्यते प्राज्ञैः पुराणार्थविशारदैः
गोपालो यादवं वंशं मग्नमभ्युद्धरिष्यति[1]

निरुक्ति-

भूभारहरणार्थाय यादवाः पाण्डवाश्च ये ।
शूरास्सहाया यस्येति शूरसेनः स कथ्यते ।।
मग्नं तु यादवं वंशमुद्धरिष्यति यश्च सः ।
यदुश्रेष्ठ इति स्यातः,वरुणो वंशवर्धनः ।।

सन्निवासः - ओं सन्निवासाय नमः
मनुष्यधर्मशीलत्वे पि सतां सनकादीनां विश्रान्तिभूमिः

सन्निवासः,यथा-
'सनन्दनाद्यैर्मुनिभिः सिद्धयोगैरकल्मषैः ।
संचिन्त्यमानं तत्रस्थः नासाग्रन्यस्तलोचनैः ।।[2]

१- वि०पु०

२- वि०पु० ५।८४२

निरुक्ति-

सनकादिनिवासो हि मनुष्यत्वेऽपि यस्सदा ।
सन्निवासः स विज्ञेयो ह्यष्टार्णः स्थानदायकः ॥

सुयामुनः - ओं सुयामुनाय नमः

शोभनं पावनं मनोहरं यमुनासंबन्धिजलक्रीडापुष्पापचयरास-
क्रीडादि यस्येति सुयामुनः ।

निरुक्ति-

गोपीभिर्यमुनायां सुशोभनं पावनं महत् ।
जलक्रीडादि यस्येति सुयामुन इतीरितः ॥

भूतावासो - ओं भूतावासाय नमः

वासुदेवः- ओं वासुदेवाय नमः

कृष्णत्वे निह्नुतपरभावत्वात् -
"वसन्ति त्वयि भूतानि भूतावासस्ततो हरिः" इति
भूतावासः । वसतिः, आङ्पूर्वः, "हलश्च" इति अधिकरणे घञ् ।
भवतेः कर्तरि क्तः । दीर्घस्संहितः ।
वसुदेवापत्यत्वे छिन्नरूढाध्यात्मं नियच्छतीति वासुदेवः ।
वसुदेवस्य अपत्यं वासुदेवः ॥अत एव हि च-
"जाग्रत्सुवासुदेवो माथुरायाद्भुतमायाय" इति मथुरावतारेण
विशेष्यते ।

निरुक्ति-

यस्मिन् वसन्ति भूतानि भूतावासः स कथ्यते ।
वसुदेवापत्यतया वासनाद्वात्ममन्यता ।
निवसति सदा यस्तु वासुदेवः स ईरितः ॥

साधुनिलयः- ओं साधुनिलयाय नमः

नलः - ओं अनलाय नमः

एवं सर्वप्राणालम्बनम् 'साधुनिलयः' यथा-

'विना कृष्णेन गोव्रजाः'

'असूर्यमिव सूर्येण निवातमिव वायुना ।
कृष्णेन समुपेतेन जहृषे भारतं पुरम्'[1] इत्यादि ।

तेषामेव सर्वस्वकारत्वे ऽपि अनलः"
न किञ्चित् कृतमेषां मयेत्यवितृप्तः,
'ऋणं प्रवृद्धमिव मे हृदयान्नापसर्पति'[2] इति ।

१- मौ०स०३३।१५

२- भा०उ० २८।२२

निरुक्ति-

सर्वांशुनिलय स्स स्यात् सर्वप्रणावलम्बनम् ।
सर्वं कृत्वापि गोपानां किंचिन्मया कृतम् ।
इत्यैवमवितृप्तो यो नरः परिकीर्तितः ।
स्वभक्तेभ्यः कृतं मन्तुं नालं वोढुं स वा नरः ।।

दर्पहा - ओंदर्पघ्ने नमः

दर्पदो - ओं दर्पदाय नमः

गोवर्धनोद्धरणपारिजातापहरणबाणदोष्षण्डखण्डनादौ

देवानां दर्पमात्रं हतवान् इति दर्पहा ।

शत्रुशमनदुर्घटाखर्वीकरणशङ्खपवनिधिगुरुतरु पुष्पमाहरणादिना

निर्भरी कृतेभ्यो यादवेभ्यो मधुपानादि दर्पं दत्तवान् इति दर्पदः ।।

निरुक्ति-

गोवर्धनस्योद्धरणे पारिजातपरिग्रहे ।
बाणदोर्दण्डषण्डानां खण्डनादौ तदा तदा ।
देवानां वै दर्पमात्रं हतवान् यस्स दर्पहा ।।
मथुरायां यादवेभ्यो मधुपानादिना ततः ।
दर्पञ्च दत्तवान् यो सौ दर्पदः परिकीर्तितः ।।

दृप्तो - ओं अदृप्ताय नमः

दुर्धरो - ओं दुर्धराय नमः

यथापि स्वयम् अदृप्तः, आपर्षणि,

एवंविधानि कर्माणि कृत्वा गरुडवाहनः ।

न विस्मयमुपागच्छत् पारमेष्ठ्येन तेजसा[1] इति

यशोदानन्दलालन दृप्तः, वा ।

बाललीलादिप्रसङ्गेषु मकमाङ्कवत् ताभ्यां दुर्धरः, दुर्वार-

बन्धवेष्टितः इति यथा आह-

'यदि शक्नोषि गच्छ त्वमतिबन्धवेष्टितः'[2] इति ।

दुरात्मना वा दुर्धरः, यथा-

दुर्ग्रहः पाणिना वायुः दुःस्पर्शः पाणिना शशी ।

दुर्धरा पृथिवी मूर्ध्ना दुर्ग्रहः केशवो बलात्[3]

निरुक्ति-

यथाख्यातिवितो यो वै अदृप्तः स उदाहृतः ।

बाललीलाप्रसङ्गेषु यशोदानन्दलालनात् ।

दृप्तो भवो भवेताभ्यां दुर्ग्रहो दुर्धरो मतः ॥

१- भा०१०।५२।२८

२- विष्णु० ५।६।१५

३- भा०उ० १२८-४०

अपराजितः - ओँ अपराजिताय नमः

अथ भारतसंग्रामे, निष्परिग्रहा अपि सत्यपरिग्रहात् पञ्चापि पाण्डवाः, शतेनापि बहुप्रकारण रुङ्मूलैर्धार्तराष्ट्रैर्न पराजिता इति, अपराजितः,

"अजः शाश्वतो ध्रुवः"[1]

"अजितः खड्गधृक्"[2]

"यतः कृष्णस्ततो जयः"[3]

"यत्र योगेश्वरः कृष्णः"[4] इत्यादि

आयुर्वेदे चरके औषधपेषणमन्त्रे -

"यथाहं नाभिजानामि वासुदेवे पराजयम् ।
मातुश्च पाणिग्रहणं समुद्रस्य च शोषणम् ॥

एतेन सत्यवाक्येन सिध्यतामगदो ह्ययम्" आयुर्वेदे । वैतरणे च विषहरणमन्त्रं वदन् -

"रत्नाकर इवाक्षोभ्यो हिमवानिव चाचलः ।
जातवेदा इवाधृष्यो नारायण इवाजयः" इति वैतरणी ।

निरुक्ति

दुर्योधनादिभिर्नित्यं रुङ्मूलैः पराजयः ।
न यस्य कुत्रचिन्नापि सो पराजित ईरितः ॥

१-रा०पु० ११४-१५

२- रा०पु० ११०-१४

३-भा०उ० ६।७६

४-गीता १८।७८

विश्वमूर्तिर् - ओँ विश्वमूर्तये नमः

कथं दुर्बलान् बलवन्तो न ध्नन्ति, सर्वस्य तच्छरीरत्वात् नहि स्वशरीरम् स्वानिष्टे चेष्टते इत्यमभिप्रेत्याह-

विश्वमूर्तिः, यथा-

"अहमात्मा गुडाकेश सर्वभूताशयस्थितः"[1] इति

निरुक्ति-

विश्वं मूर्तिस्तनुर्यस्य विश्वमूर्तिस्तु स स्मृतः ।

महामूर्तिर् - ओँ महामूर्तये नमः

दीप्तमूर्तिर्- ओँ दीप्तमूर्तये नमः

विश्वाश्रयमूर्तिः, महामूर्तिः यथा- इहैकस्थं जगत् कृत्स्नं पश्याद्य सचराचरम् । मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ।[2] इति

यत् किंचित् मूर्तिर्किंचित् गुणेन दीप्तं तदस्य विशेषेण मूर्तिरिति दीप्तमूर्तिः, यथा-

"यच्चाभिमूतिमत्सत्त्वं श्रीमदूर्जितमेव वा"[3]

1-गीता 10।20

2-गीता 11।7

3-गीता 10।41

निरुक्ति-

विश्वैकाग्रमूर्तित्वान्महामूर्तिरिति स्मृतः ।
यत्किंचित्केनचिद्दीप्तं गुणेनात्र विशेषतः ।।
तत्सर्वं मूर्तिरस्येति दीप्तमूर्तिं रसौ स्मृतः।।

अमूर्तिमान् -ॐ अमूर्तिमते नमः

अमूर्तयः,अव्यक्तपुरुषादयोऽप्येवमस्य स्वमिति अमूर्तिमान्,

यथा- "भूमिरापोनलो वायुः"[1]
"अपरेयमितस्त्वन्यां प्रकृतिम्"[2] इति
"यस्याव्यक्तं शरीरम्"[3]
"यस्यात्मा शरीरम्" इति च शतपथब्राह्मणे
पूर्वोत्तरमूर्तिमत्त्वोक्तिविरोधात् अमूर्तिरित्येतावता

निर्णयसिद्धौ मतुब्व्यथर्म्यअनेन मूर्तिनिर्णयः ।

निरुक्ति-

अमूर्तिशब्देनोच्यन्ते ह्यव्यक्तपुरुषादयः।
त एव यस्य स्वमिति स स्मृतः स्यादमूर्तिमान् ।।

१- गीता ७।४
२- गीता ७।५
३- सु०उ० ७

अनेकमूर्तिः – ओं अनेकमूर्तये नमः

अव्यक्तः – ओं अव्यक्ताय नमः

कृष्णात्वेऽप्यजहदातुर्देवादिवपुर्मूर्तित्वात् –

'षोडश स्त्रीसहस्राणि शतमेकं ततोऽधिकम् ।[1]
तावन्ति चक्रे रूपाणि भगवान् देवकीसुतः', इति

असाधारणानेकमूर्तित्वात् अनेकमूर्तिः ।
इदं मनुष्यत्वेन गूढत इति अव्यक्तः, यथा-

'नाहं प्रकाशः सर्वस्य'[2]

'नाहं वेदैर्न तपसा'[3] इत्यादि

षोडश स्त्री सहस्राणि शतमेकं ततोऽधिकम् ।
अनेकमूर्ति रित्युक्तः तत्सहस्त्र्यादेधारणात् ॥
मनुष्यत्वेन तत्र परभावाप्रकाशनात् ।
बुधैरव्यक्त इति च कथितस्तत्त्वपारगैः ॥

शतमूर्तिः – ओं शतमूर्तये नमः

शताननः – ओं शताननाय नमः

अथ दिदृक्षवे अर्जुनाय व्यक्तविश्वरूपः, शतमूर्तिः,
पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः' इति ।

१– वि०पु० ५।३२-१८

२– गीता ७।२५

३– गीता ११।५३

अनेकमूर्तिः - ओं अनेकमूर्तये नमः

अव्यक्तः - ओं अव्यक्ताय नमः

कृष्णत्वेऽप्यजहत्सुदेवादिवन्मूर्तित्वात् -

"षोडश स्त्रीसहस्राणि शतमेकं ततोऽधिकम् ।[1]
तावन्ति चक्रे रूपाणि भगवान् देवकीसुतः", इति

असाधारणानेकमूर्तित्वात् अनेकमूर्तिः ।
इदं मनुष्यत्वेन गुप्त इति अव्यक्तः, यथा-

"नाहं प्रकाशः सर्वस्य"[2]

"नाहं वेदैर्न तपसा"[3] इत्यादि

षोडश स्त्री सहस्राणि शतमेकं ततोऽधिकम् ।
अनेकमूर्ति रित्युक्तः तत्संख्यादेहधारणात् ।।
मनुष्यत्वेन स्वीय परभावाप्रकाशनात् ।
बुधैरव्यक्त इति च कथितस्तत्त्वपारगैः ।।

शतमूर्तिः - ओं शतमूर्तये नमः

शताननः - ओं शताननाय नमः

अथ दिदृक्षवे अर्जुनाय व्यक्तविश्वरूप्यः, शतमूर्तिः,
"पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः" इति ।

१- वि०पु० ५।३२-१८
२- गीता ७।२५
३- गीता ११।५२

शतानन, तत्र अर्जुनः।

"अनेकवक्त्रनयनम्"[1] इति

निरुक्ति-

अर्जुनाय व्यक्ततया विश्वरूपप्रदर्शनात् ।
शतमूर्तिरिति ख्यातः शतशो व बहुशः ।
अनेकाननसंपत्त्या शतानन इतीरितः ।

एकः - ओं एकाय नमः

उक्ते महिम्नि सजातीयसंख्येयीसंभवात् अद्वैतं गच्छतीति एकः ।
"इण् गतौ" इत्यस्मात् "इण्भीका०" इत्यादिना कन्प्रत्ययः ।
एकोपाधिपतितान् हि सम्बध्यते, यथा द्वौ ब्राह्मणौ त्रयः क्षत्रियाः, इति ।

नहि भगवतः कश्चित् केनचिदुपाधिना तुल्यकक्ष्यः, यथा-
एकःहराजा जातो बभूव[2]
"न तस्य प्रतिमास्ति" इति च

निरुक्ति-

द्वितीयसजातीयराहित्यादेक उच्यते ।

१- गीता ११।१०
२- का० १-२२

नैक: - ओं नैकाय नम:

स: - ओं साय नम:

अत इदमैक्यं न सर्वनिह्नवनिवर्तसंस्कारणपरिणामादिनिमित्तम्, किन्तु विभूतितया विजातीयेन सर्वेण तिथिवानेव इति -

नैक:, यथा-

"नान्तो ऽस्ति मम दिव्यानां विभूतीनां परंतप:,[१] इति

इच्छाकुमारम् अखिलप्रसिद्ध्या स्वविषयं ज्ञानं स्यतीति स:, स्यते:,

"शमिमुणिस्यति०" इत्यादिना प्रत्यय: ,यथा-

निरुक्ति-

नैक: सख्यापारतया विभूतीनामितीरित: ।

सर्वेषु कृष्णरूपेषु आकुमारप्रसिद्धित: ।

ज्ञानं हि यस्य विषयं स्यत्यसौ स इतीरित: ।।

व: - ओं वाय नम:

निरुक्तात् सर्वाधारस्वरूपम् यथाप्रसिद्धिमत्र वसतीति व:

वसते: ड: ।

"वसन्ति तत्र भूतानि भूतात्मन्यखिलात्मनि ।

स च भूतेष्वशेषेषु वकारार्थस्ततो मुने इति ।

१- गीता १०।४०

निरुक्ति-

यथाप्रसिद्धिवाचित्वात् तस्यापि वसतेश्च सः ।
भूतावासतया वः स्यात्

कः - काय नमः

किम् - ओं किमे नमः

महोमसेष्वंशु वसन्नपि कनति दीप्यते इति कः ।
कनतेर्डः
"कनी, दीप्तिकान्तिगतिषु" धातु प्राग्वदेव डः टिलोपश्च

निरुक्ति-

सर्वेषु कनतीति कः ।
तत् सर्वेप्सितबुभुत्सूनां निरमाधिप्रष्टव्यत्वात् किम् ।
"प्रच्छ ज्ञीप्सायाम्" इत्यस्मात् धातुः
"प्रच्छिर्डमि" इत्यादिना
डम् प्रत्ययः कादेशश्च
"सोन्वेष्टव्यः स विजिज्ञासितव्यः"[१]

निरुक्ति-

य ईप्सितार्थप्राप्त्यर्थं प्रष्टव्यः किं इति स्मृतः"

१- छा०उ० ८।७।१

यत् - ओं यते नमः

रक्षार्थं यतते इति यत्

"यति प्रयत्ने" क्विप् यथा,

"कृष्ण कृष्णेति कृष्णेति यो मां स्मरति नित्यशः
जलं भित्वा यथा पद्मं नरकादुद्धराम्यहम्" इति ।

निरुक्ति-

"रक्षार्थं प्रपन्नानां स यतते (यत्) इति स्मृतः"

तत् - ओं तते नमः

स्वज्ञानभक्तिं तनोतीति तत्

"गमादीनाम्"[1] इति क्विप् नकारलोपः तुगागमश्च ततोऽपि
"ओम तत् सत्" इति निर्देशः[2]

पदमनुत्तमम्-ओं पदायानुत्तमायनमः

तेषां परमप्राप्यत्वात् पदमनुत्तमम् ।
पद्यते प्राप्यते इति पदम्

निरुक्ति-

परमं यत्प्रपन्नानां प्राप्यं पदमनुत्तमम् ।

१- पा०अ० ६।४।४०

२- गीता १७।२३

ओं लोकबन्धवे नमः

स्वमविशेषेणाशेषानुगृहे अवर्जनीयं बान्धवं निबन्धनमाह-

लोकबन्धुः

लोकानां स्वजनः

"बन्ध,बन्धने" धातु क्र्यादिः

"शृस्वृस्निहि" इत्यादिना उ प्रत्ययः यथा

माता पिता भ्राता निवासश्शरणं सुहृत गतिर्नारायणः[1]

"पिता महस्य जगतः[2] इत्यादि

निरुक्ति-

लोकानां स्वजनत्वादि लोकबन्धुरिति स्मृतः ।

लोकनाथो -ओं लोकनाथाय नमः

माधवो - ओं माधवाय नमः

तन्मूलमसाधारणं स्वाभाविकं च सम्बन्धमाह लोकनाथः इति

स्वामी ।

बान्धवविशेषमाह मातापितृत्वम् श्रिया सहास्य सूचयति

माधवः मधुकुलोद्भवत्वाद्वा- माधवः ।

"मौनाद्ध्यानाच्च योगाच्च विद्धि भारतमाधवम्"[3]

निरुक्ति-

लोकनाथत्वसंबन्धः श्रीमतश्चेति माधवः ।

माधवंशोद्भवत्वाच्च माधवः परिकीर्तितः ॥

१- सु०४०६

२- गीता ९।१७

सुवर्णवर्णो - ओं सुवर्णवर्णाय नमः

उक्तगुणवत् कनकनिकषनिर्दोषोज्ज्वलदिव्यवर्णतया सुवर्णस्य हिरण्यस्येव वर्णो रूपगुणो ऽस्येति सुवर्णवर्णः ।

"यदा पश्यः पश्यते रुक्मवर्णम्"[1]

"आदित्यवर्णम्"[2]

"हिरण्मयः पुरुषः सर्व एव सुवर्णः"[3]

इत्यादि वर्णाधिष्ठानं च

हेमाङ्गो - ओं हेमाङ्गाय नमः

वराङ्गश् - ओं वराङ्गायनमः

चन्दनाङ्गदी

नित्यं दिव्यं सत्त्वमयमङ्गमस्येति हेमाङ्गः ।

वरम् देवक्या क्रियमाणम् अङ्गमुपनिषदम् वनिह्नुतदिव्य चिह्नमाविष्कृतम् रूपमस्येति वराङ्गः यथा -

"कुवलेन्दीवरपत्राभं चतुर्बाहुं निरीक्ष्य तम्[4] ।
श्रीवत्सवक्षसं जातं तुष्टावानकदुन्दुभिः" इति

१- मु०उ० ३-३

२- पु०सू० २०

३- छा०उ० १।६।६

४- वि०पु० ५।३।८

निरुक्ति-

वर्णाश्रयं तु यस्याङ्गं दिव्यसत्त्वमयं यत:
ततो हेमाङ्ग इत्युक्त: सप्ताणाँ हेमवर्णद: ।।
देवकीप्रीतये गुप्तदिव्यालान्हत्नमङ्गलम् ।
आविष्कृतं स्वतो येन वराङ्ग स्स तु कथ्यते ।।

वीरहा - ओं वीरघ्ने नम:

विषम: - ओं विषमाय नम:

शून्यो - ओंशून्याय नम:

अतिमुग्धत्वमन्यथोपि वीरान् बन्धकान् पूतनाशकटार्जुनादीन्

सुरादीन् स्मूलघातं हन्तीति वीरहा ।

ऋजुकुटिलाशयेषु सोमंकरभयंकरवृत्तया विषम: समो नेति -

विषम: ।

मनुष्यत्वेपि अशेषदोषैर्विवर्जित: शून्य: ।

'शुन गतौ' ब्यद् धातु:

निरुक्ति-

समूलं पूतनादीन्वै यो जघान स वीरहा ।

शून्य: स्यात् दोषवर्जित: ।

घृताशीर - ओं घृताशिये नम:

अचल: - ओं अचलाय नम:

चल: - ओं चलाय नम:

'घृ सेचने'

घृतं सेचनं स्कुग्णैः आदाप्यायनम् तत्र वा गोपगृहगव्ये वा आशास्तिरस्येति घृताशी: ।

दुर्योधनादिभिः दुरात्मभिरभेद्यः अचलः ।

निरुक्ति-

गोपानां सद्मगव्ये वा आदाप्यायनेन वा
घृतेत्वाशा हि यस्यास्ति घृताशीः परिकीर्तितः
दुर्योधनाद्यभेद्यत्वात् अचलः परिकीर्तितः ॥

अमानी - ओं अमानिने नमः

दूत्याधिकारादौ अनपत्रपिष्णुत्वप्रयोजिकाया भक्तेष्वनहंयुतया मानः चित्तसमुन्नतिः अस्यास्तीति सः अस्य नास्तीति अमानी)

"मान पूजायाम्" धातु चुरादि भावे घञ् ततः
'मत्वर्थीयोत इनिः' (यस्य०" इति लोपः
नञो नस्य लोपः इन्नन्तादीर्घः इत्यादि ।

निरुक्ति-

यो नहंकारी भक्तेष्वेव स ईरितः अमानी"

१- पा०अ० ६।४।१४

मानदो - ॐ मानदाय नमः

मान्यो - ॐ मान्याय नमः

अर्जुनोग्रसेनयुधिष्ठिरादिभ्यः रथित्वाधिराज्यबहुमानं ददाति मानदः।

सर्वैरयत्वेन सम्माननीयः मान्यः।

निरुक्ति-

मानदो र्जुनादिभ्यो मानं राज्यं च दत्तवान्।

मान्यस्तदीयत्वेन स्यात् सम्मान्यस्सर्वदैव सः॥

लोकस्वामी - ॐ लोकस्वामिने नमः

त्रिलोकधृत् - ॐ त्रिलोकधृते नमः

लोकानामशेषाणाम् स्वर्गादीनाम्भुवनानाम् स्वामी निरुपाधिकरक्षणीति लोकस्वामी।

स्वमहिम्नाः कथं नित्रिभर्ति यः त्रिलोकधृत्।

निरुक्ति-

लोकभर्तृतया चैव लोकस्वामीति शब्द्यते।

लोकत्रयस्य धरणात् स त्रिलोकधृत् ईरितः।

मेधजो - ॐ मेधजाय नमः

धन्यः -ॐ धन्याय नमः

अतो मेधे देवकिपुत्रीयक्रतरूपे यज्ञे जात इति मेधजः सहि तामाह-

"स्तुतोऽहं यत्त्वया पूर्वं पुत्रार्थिन्या तदद्य ते ।
सफलं देवि जातोऽहं यत्त्वोदरात्[1] ।।

तज्जन्मधनलाभात् धान्य:
"धनगणं लब्ध्वा"[2] इति यत्
"अहं वो बान्धवो जातः"[3] इति

<u>सत्यमेधा</u> - ओं सत्यमेधसे नमः

<u>धराधरः</u> - ओं धराधराय नमः

<u>तेजोवृषो</u> - ओं तेजोवृषाय नमः

तथा सत्या नष्टमानत्वभावादवितथा मेधा वस्तुतत्त्वबुद्धेरादि साक्षात्कारिणी बुद्धिः यस्येति सत्यमेधाः ।

गोवर्धनं यस्मादधात् - धराधरः ।

स्वं सुहृत्पालनलक्षणं तेजो वर्षतीति -तेजोवृषः ।

<u>निरुक्ति-</u>

धरं गोवर्धनं शीघ्रं धृतवान् स धराधरः ।
तेजोभिर्वर्षति यतः सुहृत्पालनलक्षणम् ।
तेजोवृषः समाख्यातो वस्वर्णैः सिन्धुविदः ।।

१-वि०पु० ५।३।१४
२- पा०उ० ४।४।८४
३- वि०पु० ५।१३।११

धृतिधरः -ओं धृतिधराय नमः

सर्वशस्त्रभृतां वरः - ओं सर्वशस्त्रभृतां वराय नमः

एतेन तादृश्येऽपि इन्द्राभिभावुकामनिमातुषां धृतिं धृतवान् धृतिधरः ।

नरकजरासन्धादिसमरेषु दिव्यानेकास्त्रमोचनात् सर्वशस्त्रभृतां सर्वास्त्रिणाम् वरः श्रेष्ठ इति - सर्वशस्त्रभृतांवरः ।

प्रग्रहो - ओं प्रग्रहायनमः

निग्रहो - ओं निग्रहाय नमः

व्यग्रो - ओं व्यग्राय नमः

अर्जुनः रश्मिनिरिव प्रगृह्यते प्रकर्षेण गृह्यते सारथिनानेनेति प्रग्रहः ।

"ग्रह उपादाने" इत्यादिः प्रपूर्वः ।

"अकर्तरि च कारके"[1] इत्यनुवृत्तौ ।

"ग्रहवृदृनिश्चिगमश्च"[2] इति करणार्थे अप् प्रपूर्वो बहुव्रीहिः

अर्जुनपौरुषनिरपेक्षेण सारथ्यवैचित्र्येण निगृह्यन्ते शत्रव इति -निग्रहः ।

अर्जुनवैरिनिग्रहे अर्जुनयुद्धव्यासक्तमानः तत्र व्यग्रः ।

"युद्धव्यासक्तचित्तत्वात् पार्थविद्विषिनिग्रहे ।

योऽसौ व्यग्रः समाख्यातः भक्तानां वैरिनाशकः ॥

१- पा०सू० ३।३।१९

२- पा०सू० ३।३।५८

नैकशृङ्गः - ओं नैकशृङ्गाय नमः

युक्तिभेदाद्व्यवस्थानाभावशृङ्गेण व्याजः प्राप्तकाले:
तच्छृङ्गाणीति बहूनि विषाणकमस्येति नैकशृङ्गः ।

'शृ, हिंसायाम्' धातुः क्र्यादिः

'शृणातेर्ह्रस्वश्च' उणादि इति गन् प्रत्ययः किन्नुगामश्च

निरुक्ति-

यस्यस्यान्नैकशृङ्गः सः बहुशोवैरिविषाणकम्'

गदाग्रजः -ओं गदाग्रजाय नमः

गदनाम्नो ग्रजः -गदाग्रजः ।

चतुर्मूर्तिः - ओं चतुर्मूर्तये नमः

चतुर्बाहुः -ओं चतुर्बाहवे नमः

चतुर्व्यूहः - ओं चतुर्व्यूहाय नमः

अथ निर्भवेऽपि तन्मूलभूतो व्यूहः प्रत्यभिज्ञाप्यते यदुकुलेऽपि
बलभद्रवासुदेव प्रद्युम्नानिरुद्धाख्याश्चतस्रो मूर्तयो यस्येति - चतुर्मूर्तिः

व्यूहमुखेन निरुपाधिकपररूपेण देवक्यामवततारेति चतुर्बाहुः
सा ह्येनमाह ।

उपसंहर सर्वात्मन् रूपमेतच्चतुर्भुजम् ।

जानातु मावतारन्ते कंसोऽयं दितिजन्मजः[१] ।

१- विष्णु० ५।३।१२

अत्रापि तथैव अमलाव्यक्तलक्षणात् षाड्गुण्यव्यवस्थत्वात्-चतुर्व्यूहः ।

उपासकाभियोगतारतम्यकृतक्रमाच्चतस्रः प्राप्त -योऽस्मिन् इति चतुर्गति ।

निरुक्ति-

चतस्रः प्राप्तयो यस्मिन् भक्तानां स चतुर्गतिः ।

चतुरात्मा -

पूर्ववत् ।

चतुर्भावः - ओं चतुर्भावाय नमः

चतुर्वेदवित् - ओं चतुर्वेदविदे नमः

एवं चातुरात्म्यकचतुर्व्यूहाविर्भूतजगद्व्यापारात् प्रदानादि स्थूलसूक्ष्मप्रयोजनपुञ्जाभिव्यञ्जनात्, चत्वारः उक्त चतुर्व्यूहप्रभावाः भावाः भवनाः प्रयोजनाभिव्यञ्जनानि अस्येति - चतुर्भावः ।

व्यूहविभवयोर्विभावितमिदं महावैभवम् महाविभूति महार्णवत्वमानम् परापरविभवको विदानां चतुर्वेदविदां प्रतिभातीति चतुर्वेदवित् ।

समावर्तः - ओं समावर्ताय नमः

निवृत्तात्मा - ओं निवृत्तात्मने नमः

दुर्जयः - ओं दुर्जयाय नमः

एतादृशं सदा सर्वत्रसर्वदा समन्ताद्व्यूहवैभवावर्तनमस्येति समावर्तः ।

कृपालुतया एष कात्स्न्येनाधिकार: स्वस्तुतदम्भमाना:
निवृतात्मा यथा-

'अवाक्यनादर:[१]'

सुरनरादिशक्त्या दुरवशीकरणतया जेतुमशक्य इति-दुर्जय:

निरुक्ति-

निवृतात्मा मनो यस्य सदा नादमिश्रितम् ।
शक्त्या देवमनुष्याद्यैर्जितुं न शक्यते ।
अन्वेष्टुं वापि य: तस्मात् दुर्जय: सप्तवर्णक: ।।

दुरतिक्रम: - ओं दुरतिक्रमाय नम:

दुर्लभो - ओं दुर्लभाय नम:

दुर्गमो - ओं दुर्गमाय नम:

सर्वेषामपि स्वपादमूलमतिक्रम्य गत्यन्तरविरहात् तै:
अतिक्रमितुमशक्य इति - दुरतिक्रम: ।

'क्रमु, पादविक्षेपे'
अतिपूर्व: दुरुपपदे पूर्ववत् खल् औरुत्त्वम् एवमुत्तरत्राप्युभयत्र ।
तथान्यमनस्कै: अजितेन्द्रियै: लब्धुं प्राप्तुमशक्य इति दुर्लभ: ।
'डुलभष् प्राप्तौ'
दुरि पूर्ववत् खल् अन्यञ्जेत्युच्यते
नेत्रदुर्बलानामिव मध्याह्नभास्कर: अप्रधृष्यतेजा: दण्डापूपिकया
दुर्गम: ।

छा०उ० २।१४

निरुक्ति-

अजितेन्द्रियदुष्प्रापो दुर्गमः स च कथ्यते ।
नेत्रदुर्निरीक्ष्यौ नाना मध्याह्नसुरुपेशिषा ।
प्राप्तिर्दुष्करतेजस्त्वात् दुर्गमः परिकीर्तितः ॥

दुर्ग -ओं दुर्गाय नमः

दुरावासो -ओं दुरावासाय नमः

दुरारिहा -ओं दुरारिघ्ने नमः

अविद्यावावरणैर्दुष्प्रवेशश्च दुर्गः
'दुदुरोरधिकरणे'[१] इति ड ।स्वंच दूरे दुष्करः तत्पदावासः इति
दुरावासः ।
एवं दर्शित्वम् अपितुपापविषये प्रपञ्चन् दुहावतारं नियच्छति-
दुरारिहा ।
दुमर्गिगामिनो दुरारिणः तान् अधर्मागत्यावना दिभिस्वीसी-
इपायैहतिवान् इति यथा वैष्णवे ।
'हतास्च ते दुरा दैवैस्तन्मार्गपरिपन्थिनः'[२] ।

निरुक्ति-

कुप्रवेशत्वाद्दुर्गः पापिभिस्तु कदाचन
दुरारिणस्तु दुमर्गिगामिनस्तान्निहन्ति यः ।
अधर्मात्यीजनादैस्तु स्यान्नित्यं दुरारिहा ।

१- पा०व्या० ३।३।४८

२- वि०पु० ३।१८।३४

शुभाङ्गो - ओं शुभाङ्गाय नमः

लोकसारङ्गः - ओं लोकसारङ्गाय नमः

सुतन्तुः - ओं सुतन्तवे नमः

कथं तानुप्रविष्टः तत्रोच्यते असुरविप्रलम्भनमायामोहनविग्रहतया शुभमङ्गमस्येति शुभाङ्गः ।

कीदृक् विप्रलम्भः लोकसारङ्गः ।

लोके यत् सारं न्यायादनपेतं भोगमोक्षापवर्त्तं

"तद्गच्छति"

"गमेस्सुप्युपसंख्यानम्"[1]

"खच्च वा" इति खलाह

"कुरुध्वं मम वाक्यानि यदि मुक्तिमभीप्सथ"[2]

शोभनो न प्रतिरुद्धप्रसरप्रसरणवागुरातन्तुः कृत्रिमशान्तिभावनादि-रूपो यस्येति सुतन्तुः ।

निरुक्ति-

न्यायानपेतं यत्सारं भोगनिर्वाणलक्षणं ।
लोके तद्गच्छति सदा लोकसारङ्गः ईरितः ॥
तन्तुः कृत्रिमशान्त्यादिरूपस्तत्प्रसरणाय वै ।
सुतन्तु शोभनोऽस्येति प्रमाणादीर्णनाशकः ॥

१- पा०वा० ३।२।३८

२- वि०पु० ३।१८।५

इन्द्रकर्मा-ओं इन्द्रकर्मणे नमः

महाकर्मा- ओं महाकर्मणे नमः

कृतकर्मा- ओं कृतकर्मणे नमः

कृतागमः - ओं कृतागमायनमः

एवम् शणागतेन्द्रार्थं एवं विषव्यापारतया इन्द्राय तत्प्राधान्येन तद्व्यपदेशात् तत्प्रभृतिभ्यो देवेभ्यः कर्म एतादृशव्यापारोऽस्येति इन्द्रकर्मा।

एवंप्रपन्नपरिपालनार्थत्वादसुरादिखण्डनार्थत्वाच्च लघु परमकारुणिकस्यैव विप्रलम्भसंभवः एवं न्यायवृत्तत्वात् महाकर्माः।

तत्प्रतिपत्त्यर्थं स्वयमप्यनुष्ठिततदाचारः कृतकर्मा

तदर्थमेव कृणोति बुद्धादिशास्त्रमपि आगमः कृतागमः।

निरुक्ति-

प्रपन्नेन्द्रार्थमसुरा दैत्यसंहारकर्मकम्।
कर्म यस्यास्ती(न्द्रकर्मा)प्युक्ताणां महत्कर्मः॥
स्वानुष्ठिततदाचारः कृतकर्मेति कथ्यते।
कृतबुद्धागमत्वात् कृतागम उदाहृतः॥

उद्भवः - ओं उद्भवाय नमः

सुन्दरः - ओं सुन्दरायनमः

सुन्दः -ओं सुन्दाय नमः

रत्ननाभः - ओं रत्ननाभाय नमः

सुनक्षुपरीशनाद्रिलकेन उद्गतः स्व भावादिति वा उद्भूतः ।
तद्दृष्टिमनोहरतया च सुन्दरः रमणीय इति सुन्दरः ।

तेन च सौन्दर्येण बहुरत्नानामपि सुष्ठु -सुतराम् उनत्ति क्लेदयति-
आर्द्रयतीति सुन्दः ।

पाण्डित्य विज्ञानसृष्टोपरत्नान्तरत्नाभितया, रत्नम् तस्य
नाभिरस्येति रत्ननाभः ।

<u>सुलोचनः</u> - ओं सुलोचनाय नमः

तथा सुदयासुवीरलोचनतया सु-शोभने लोचने अस्येति सुलोचनः ।
'लोचृ दर्शने' करणे ल्युट् अनः सुपूर्वो बहुव्रीहिः ।

'ततो दिगम्बरो मुण्डः[१]'

<u>निरुक्ति-</u>

सुलोचन इति प्रोक्तो हनूमायामोक्षिरेषणः'

१- वि०पु० ३।१८।२

नवम्

शतकम्

नवमो ध्याय:

अर्को - ओंअर्काय नमः

अहो महात्मा अतिधार्मिक इति तैः स्तुतः (अर्कः)

"अर्च, स्तुतौ"

निरुक्ति-

अत्यन्तधार्मिक इति स्तुतस्तै एवं ईरितः"

वाजसनिः - ओं वाजसनये नमः

शृङ्गी - ओं शृङ्गिणे नमः

नास्तिक्यवादेन ऐहिकमन्नादिकमेव संभजतीति- वाजसनिः

वन- षण संभक्तौ" इन्

"सर्वधातुभ्यः" उणादि दापणाक्तं हीदम्,यत् प्रातः

प्रातः दध्योदनकवलान् गृह्नत् इति ।

शृङ्गमिव अहिंसा विडम्बनपिच्छिका यस्य करे अस्तीति शृङ्गी ।

निरुक्ति-

अन्नादीनैहिकानेव यस्मान्मह्यां भजन्ति हि ।

स वाजसनि रित्युक्तः वरवर्णो न्नप्रदो मनुः ।

करेस्ति पिच्छिका यस्य शृङ्गवत् हिंसा विडम्बनात् ।

सर्वप्रपञ्चमिथ्यात्वसंविदात्मत्ववादनः ।

जयन्तम् - ओं जयन्ताय नमः

सर्वविज्जयी - ओं सर्वविज्जयिने नमः

सुवर्णविन्दुः -ओं सुवर्णविन्दवे नमः

आस्तिक्यवादिनः संविदात्मत्वप्रपन्चमिथ्यात्वमिथ्यावादैर्जितवान् - जयन्तः ।

'जि जये' धातुः

तृभूवहिवसिभासिसाधिगडिमण्डि' उणादि इति भच् प्रत्ययः कथं चैतान् प्रमाणविरुद्धं प्रत्याययति तत्रोच्यते यतस्सर्वज्ञानामप्येतज्जय्यतया जयम्, सर्वविदः सर्वज्ञान् तेषां जेतुं शीलमस्येति सर्वविज्जयी ।

निरुक्ति-

आस्तिक्यवादिनां जेता जयन्त इति कथ्यते ।

यस्य जय्याश्च सर्वज्ञाः स चोक्तः सर्वविज्जयी ।

स्वशक्तित्वात् पटुतरपदवर्णैरास्तिकतापलापात् - सुवर्णविन्दुः

सर्ववागीश्वरेश्वरः

वादित्ववाग्मित्वपारीणतया सर्वेषाम् - वागीश्वराणाम् वाचः वाण्याः ईश्वरः ब्रह्मा बहुवचनादार्थलाभात् ब्रह्मादीनामपि ईश्वरः स्वामीति- सर्ववागीश्वरेश्वरः ।

निरुक्ति-

वादिवाग्मित्वयोः पारं यो गच्छति स विश्रुतः ।

रचनायां वाक्पद इति सर्ववागीश्वरेश्वरः ।।

महागर्ता

महाभूतो

महानिधि

एवम् बाह्यकुदृष्टिविनिष्टतया नष्टात्मनाम महान्तः-गर्ताः अवटाः तदुपलब्ध्याः रौरवादयो अस्मादिति महागर्तः ।

अश्रद्दधानाः पुरुषाः धर्मस्यास्य परंतप ।[1]
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ।।

इत्थम् स्वशासनातिलङ्घिनाम् असुराणाम् निग्राहकत्वमुक्तम्, अथ दैवीं संपदमभिजातानां स्वशास्त्रवश्यानाम् अनुग्राहकत्वमभिधीयते-
महान्तः महात्मानः भूताः- स्वभूता अस्येति - महाभूतः ।
तथा ते महान्तो निधयः तद्दतिप्रिया अस्येति महानिधिः ।

कुमुदः - ओं कुमुदाय नमः

कुन्दरः- ओं कुन्दराय नमः

कुन्दः- ओं कुन्दाय नमः

कां प्रकृतिमण्डल एव तैस्सह मोदत इति कुमुदः ।
कुं मुक्तिभुवं ददातीति वा-

१-गीता ६।३

कुन्दकुसुमवद्भिस्वाद कुन्दम् परतत्त्वज्ञानम् पृषोदरादिः ददाति ददातीति कुन्दरः ।

स्वयं कुञ्चितपूर्वपूर्वज्ञानवैराग्यादिभूमिकेभ्यः उत्तरोत्तरां पराभक्ति-परज्ञानादिभूवम् ददातीति वा कुम् विदारितम् पापम् दायति शोधयतीति वा- कुन्दः ।

पर्जन्यः

अर्ज अर्दने पर्जन्य इति अन्यप्रत्ययः पजादेशश्च निपात्यते स्वतत्त्वज्ञापनेन त्रितापापहः - पर्जन्यः ।

पावनो -ओं पावनाय नमः

निलः- ओं अनिलाय नमः

अमृताशो - ओं अमृताशाय नमः

अमृतवपुः -

तथा च पवते गच्छतीति- पवनः ।

पवि गत्यार्थः

तदनुग्रहे प्रेरक निरपेक्षत्वात् अनिलः ।

"इल्" प्रेरणे प्रेरयतीति इलः[1]

"इगुपधात् कः"

१- पा०अ० ३।१।१३५

सोऽस्य नास्ति इति यथा

"तदप्यप्रार्थितं ध्यातो ददाति मधुसूदनः" इति

तानमृतं स्वगुणामृतम् आशयति भोजयतीति- अमृताशः ।

अमृतं तद्भक्तेभ्यः स्वदमानं वपुः रूपमस्येति -अमृतवपुः ।

तेषां शक्याशक्यसाध्यासाध्यादिकमनुसन्धत्त इति सर्वज्ञः ।

निरुक्ति-

स्वस्य स्वस्मात् प्रेरकोऽन्यः प्रपन्नानुग्रहे सदा ।

नास्तीति सो निलः प्रोक्तो मुन्यणामिनुरुत्तमः ।

यश्चाशयति भक्तान्वैस्वगुणामृतमादरात्

अमृताशः स इत्युक्तः शृतपीयूषदो मनुः ।

वपुर्यस्यामृतमिति स चा मृतवपुः स्मृतः ।

सुलभः - ओं सुलभाय नमः

सुव्रतः - ओं सुव्रताय नमः

सिद्धः - ओं सिद्धाय नमः

अतस्स्वयमनर्घोऽपि नक्रवक्त्रादिना रागादिमूल्याभावेन स्वाधीनीकरणात् लब्धुं शक्य इति सुलभः ।

लभेस्सावोषदित्यादिना खल् नुम प्रतिषेधश्च प्रागेवोक्तः यथा-

"वस्त्रे प्रगृह्य गोविन्दं मम गेहं व्रजेति वै" इति

यथा कथंचित् प्रविष्टानां सर्वथा परिपालनहठव्रतः - सुव्रतः यथा-

सकृदेव प्रपन्नाय तवास्मि च याचते
अभयं सर्वभूतेभ्यो ददाम्येतत् व्रतं मम[1] ।।

सदा वृत्त एव सर्वोप्युत्त्वादिदमीयगोप्तृत्वस्या नौपाधिकतया स्वतत्त्वस्थितिविदाम् सिद्धो न हि यत्नसाध्य इति - सिद्धः ।

शत्रुजिच्छत्रुतापनः

न्यग्रोधोदुम्बरो

तत्र शत्रुजिद्भिः ककुत्स्थपुरुकुत्सादिभिः स्वदिव्यतेजसाप्यायितैरथैपरिपन्थिनस्तापयतीति-शत्रुजिच्छत्रुतापनः ।

निरुक्ति-

पुरुकुत्सककुत्स्थाद्यैश्शत्रुजिद्भिः स्वतेजसा ।
आप्यायितैरपि गणानन्यस्तापयति नित्यशः ।
शत्रुजिच्छत्रुतापन इति विद्वद्गणोदितः ।।

न्यग्रोधश्चासौ उदुम्बरश्चेति न्यग्रोधोदुम्बरः
न्यग्भूतैरयं कृताञ्जलिभिरुध्यते स्वप्रसादोन्मुख्येन
व्यवस्थाप्यत इति - न्यग्रोधः यथा-
'अञ्जलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी' इति

1- रा०यु० १८।३३

निरुक्ति-

न्यग्भूतं: प्रणतै: स्वानुग्रहोन्मुख्येन रुध्यते
यो व्यवस्थाप्यते नित्यं न्यग्रोधस्स उदाहृत ।।
गुणत्रयादुद्गतं यत परमं धाम चाम्बरम् ।
लक्ष्मीपरिजनादिश्च यस्यास्ति स उदुम्बर: ।
ऊर्ध्वा उदुम्बर इति श्रुते: -
न्यग्रोधोदुम्बर इति ह्येकं नाम प्रकीर्तितम्
अत्युच्छ्रितानां सेव्यो योऽप्यतिनीचानुवर्तनात् ।
न्यग्रोधोदुम्बर: स स्यादश्वार्ण: सर्वसिद्धिद: ।

चाणूरान्ध्रनिषूदन: - ओं चाणूरान्ध्रनिषूदनाय नम:

सहस्रार्चि: - ओं सहस्रार्चिषे नम:

तद्विरोधिनं चाणूरनामानमसुरान्ध्रमल्लं निषूदितवान इति-
चाणूरान्ध्रनिषूदन: ।

सुनामादित्वात् षत्वम्

पाचनशोषणप्रतापनप्रकाशनधर्माण्यध्यदोषापकारीणि

सहस्रमर्चीष्यनेन सूर्ये निर्मितानीति- सहस्रार्चि: ।

सप्तैधा: - ओं सप्तैधसे नम:

सप्तवाहन: - ओं सप्तवाहनाय नम:

अमूर्तिर् - ओं अमूर्तये नम:

रन्धनानि पाकहविस्सोमसंस्थानि प्रत्येकं सप्त संस्थानि इष्टापूर्तरूपाणि सप्त वानस्पत्यास्समिधोऽस्येति - सप्तैधा: ।

तत्प्रकाशकगायत्र्यादिच्छन्दवैदिकमन्त्राभिमानीनि सप्तवाहनानि रविरथकृत्याण्यस्येति वा सप्त वायुस्कन्धान् वहति वाहयतीति वा सप्तवाहन

"वह प्रापणे" धातु: भ्वादि

स्वमधिष्ठेयेभ्यस्तेभ्य: स्वभावविप्रकर्ष उच्यते स्थूलभौतिकमूर्ति व्यावृत्तया नास्ति तादृशी मूर्तिरस्येति-अमूर्ति: ।

मूर्तिशब्दो हि निरुक्ते बहुव्रीहि क्तो न लोप: ।

निरुक्ति-

ओं वहत्यनिलस्कन्धान् सप्तासौ सप्तवाहन: ।
वाहनानि च सन्त्यस्य सप्त वा सप्तवाहन: ।
स्थूलभौतिकमूर्तिभ्यो व्यावृत्तो मूर्तिरुच्यते ।

अनघो -

अचिन्त्यो-

अकर्मवश्यत्वेन तन्मग्नजीवविलक्षण: अनघ: ।

मुक्तोपम्येनापि दुर्निरूपतया चिन्तयितुमशक्यत्वेन अचिन्त्य: स नैति अचिन्त्य: ।

निरुक्ति-

जीवेभ्य: कर्मयेभ्यो व्यावृत्तश्चा नव: स्मृत: ।
अचिन्त्यो दुर्निरुप: स्यान्मुक्ताधुमयापि स: ।।

भयकृद् - ओं भयकृते नम:

भयनाशन:- ओं भयनाशनाय नम:

अणुर् - ओं अणवे नम:

स्वशासनातिवर्तिनां भयं करोतीति -भयकृद् ।

"कृञ: क्विपि तुगित्यादि"

"ञिभी,भये

अज्विधौ भयादीनामुपसंख्यानं नपुंसके क्तादिनिवृत्त्यर्थमिति भावे अच् गुण: अय् -

तदनुवर्तिनां च भयं नाशयतीति -भयनाशन:

अतिप्रकृष्टमैश्वर्यमितिसूक्ष्मदहराकाशाव्यक्तजीवानुप्रवेशसामर्थ्यात् अणु: ।

"गत्यर्थादणतेरुणश्च" उणादि इत्युप्रत्यय: तदणिमाप्येतदणु: ।

"अणोरणीयान्"

बृहत् - ओं बृहते नम:

विसीणायोव्याप्त्या विपुलपरमव्योमादि चुलकीकृत्य अतिमहंता महिम्ना बृहत् ।

पृषत् बृहत्,महत्" उणादि इत्यादिना बृहे ।

१- तै०उ० ३ पृ०१० अ०

कृश: - ओं कृशाय नम:

स्थूल: - ओं स्थूलाय नम:

तूलानि लाघति शायिना लघिम्ना सर्वत्राव्याहतगत्वर:-कृश:

'कृश तनूकरणे' इगुपधत्वात् तु: कृशिमायं लघिमा चेतिप्रकरणात् गम्यते यथा -

'अप्रमेयो नियोज्यश्च यत्र कामगमोवशी

सर्वमव्यवहितमेकत्र स्थित्वा स्प्रष्टुम भूमिष्ठस्य च चन्द्रमसं परिमाष्टुं शक्ति:तयातिप्रकृष्टया विशिष्ट: - स्थूल: ।

निरुक्ति-

सर्वत्राव्याहतगतिर्लघिम्ना कृश ईरित: ।

स्थित्वैकत्राखिलं स्प्रष्टुंशक्तिर्या महती सदा ।

तया प्रकृष्टा शक्त्या विशिष्ट: स्थूल: उच्यते ।।

गुणभृत् - ओं गुणभृते नम:

निर्गुणो - ओं निर्गुणाय नम:

महान्- ओं महते नम:

स्वसंकल्पेन सर्वं स्वगुणभूतसर्वावस्थं कुर्वन् बिभर्तीति- गुणभृत् ।

इदमस्य प्रकृष्टमीशितृत्वात्-

'सर्वस्य वशी सर्वस्येशान:' इति

अतदवस्थतया तत्संस्पर्शेपि अस्पृष्टतद्गुणा: - निर्गुण: ।

परमस्वतन्त्र: इदमस्य परमं वशित्वम्

"विश्वस्य मिषतो वशी"[१]

"सत्वादयो न सन्तीशे यत्र च प्राकृता गुणा:"

इति च प्रत्याम्यमिमिर्ज्ञानमिधानमूमो उन्मज्जति निमज्जति च यथोदके,

अस्य परमप्रकर्षात् - महान्

"महत: पृषत् बृहत०" इत्यादिना पूर्वनिपातनम् -

अधृत: - ओं अधृताय नम:

स्वधृत: - ओं स्वधृताय नम:

तादृशैश्वर्यप्रकर्षेण क्वचिद्धृत: न नियमित: इति-अधृत: ।

निरुक्ति-

यश्चानियाम्य: केनापि ह्य(धृत) स तु कोर्तित:

अथ मन्त्रोण्घतनस्माधिसिद्धात् भगवदैश्वर्यम् व्यावर्त्यते सोपाधिकतदैश्वर्योक्तोपाधिवधुयात् स्वेन स्वाभाविकेनैश्वश्वर्येण धृत इति वा उक्तहेतुना स्वेन स्वभावेन धृतमैश्वर्यम् स्वधृतं तदस्यास्तीति वा- स्वधृत: ।

धृत उक्त: स्वरतेडै स्वशब्दस्य अनुकल्पे

स्वधृत शब्दात् अर्शआद्यच् मत्वर्थीय: ।

१- तै०उ० ६ पृ० १ अ०

स्वास्य: - ओं स्वास्याय नम:

अथ मुक्तैश्वर्यात् स्वास्य:

आस्या आसनम्[१]

"आसश्चोपसर्गे" इति अङ्० सा शोभना अस्येति हि अविर्भूत स्वाभाविकैश्वर्यरुपम् आसनं दृष्टम् पूर्वमविद्या तिरोहितत्वात्

"नैवं भगवतस्सदाविर्भावात्" इति

निरुक्ति-

आसनं शोभनं यस्य स स्वास्य इति चोच्यते ।

प्राग्वंशो - ओं प्राग्वंशाय नम:

वंशवर्धन: - ओंवंशवर्धनाय नम:

अथ नित्यानामैश्वर्यात् -प्राग्वंश: ।

"यत्र पूर्वे"[२] इति श्रुति: अनादिमुक्ता: प्राञ्च: तेषां वंश: समुद्भवभूमि: नित्यस्वरुपाधिभाविनिबन्धनभूत: इति सर्वं हि सर्वथा तदिच्छोपाधिकमिति अविवाद: स्वस्यास्य संज्ञो वैष्णवे ।

तदाष्टगुणमैश्वर्यं नाथ स्वाभाविकं परम् ।

निरस्तातिशयं यस्य ततसोष्याभिधिं त्वहम्" इति

अथ तद्विलक्षणस्य तत्ताद्रूप्यहेतुत्वात् तत्र -वंशवर्धन: ।

निरुक्ति-

नित्यसिद्धस्य वर्गो यो वंशं सन्तानलक्षणम् ।

तं वर्धयति यश्चासौ वंशवर्धन उच्यते ।।

१- पा०सू० ३।३।१०६

२- पु०सू० १ अ०

भारभृत - ओं भारभृते नम:

कथितो - ओं कथितायनम:

योगी - ओं योगिने नम:

मुक्तानां च बन्ध ध्वंसनस्वरुपा विभाविस्वप्राप्तिभारं विभर्तीति-

भारभृत् ।

तत्र प्रमाणयति कथित:

उक्तवक्ष्यमाणगणवत्या स्वशास्त्रेषु यथा-

"वेदेषु स पुराणेषु साङ्गोपाङ्गेषु गीयसे"

"वचसां वाच्यम्"

सर्वम् इदं संभाव्यत् इति प्रदश्यतै,

युज्यतेनेन इति योग: अघटिताघटनं

महाप्रभाव: सो तिशयितो नित्ययुक्तश्च यस्यास्ति इति योगी

सर्वकामद: - ओं सर्वकामदाय नम:

आश्रम: - ओं आश्रमायनम:

योगस्खलितेभ्यो पि अणिमादिकामान् अन्तरायतया-ददाति

इति सर्वकामद:। यथा-

"प्राप्य पुण्यकृतां लोकानुषित्वाशाश्वतीस्समा: ।[१]

१- गीता ६।४१

तत: निवृत्त्य शुभिक्षापरविषेषु वैष्णवगेहेषु तेषां विश्रान्ति हेतु: आश्रम: ।

<u>श्रमण:</u> - ओं श्रमणाय नम:

भोगजन्मभ्याम् अनुपक्षीणस्वसंस्कारैः तत्र समाधिशेणो नायासेन श्रम्यते अभ्यस्यते इति -श्रमण: ।

'पुर्वारनाको'[1]

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।

यतते च ततो भूय: संसिद्धौ कुरुनन्दन ।।[2]

<u>क्षामस</u> - ओं क्षामाय नम:

एवं स्वयोगाभिमुख्यमात्रेण ते योगभ्रष्टा अपि

दुर्ग तरितुं क्षमन्ते स्यात् इति - क्षाम:

यत्

'नहि कल्याणकृत् कश्चित् दुर्गतिं तात गच्छति'[3]

<u>सुपर्णा</u> - ओं सुपर्णाय नम:

एवं प्रत्यापन्नसमाधीन् आधिविपाकद्वारा

तमस: पारं नयति इति- सुपर्ण:

'स्वपारं भगवान्नयति' इति भाष्ट:

१-
पा०अ० ७।१।१

२- गीता ६।४३

३- गी० ६।४०

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्विषः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ।[1]

धनुर्धरो - ओं धनुर्धराय नमः

स्वीयोपासकानां कण्टकोद्धरणाय स्वयमेव-धनुर्धरः ।

"एतदर्थं हि लोकेऽस्मिन् क्षत्रियैर्धार्यते धनुः"

"धार्यते क्षत्रियैश्चापो मा तशब्दो भवेदिति"

निरुक्ति-

उपासकानां भक्तैर्यः प्रत्यूहविनिवृत्तये

धनुषो धारको नित्यं स्वयं तस्या धनुर्धरः ।

धनुर्वेदो - ओं धनुर्वेदाय नमः

दण्डो - ओं दण्डाय नमः

अन्येऽपि सुरनरेन्द्रादयो धनुरादिकं तच्छास्त्रप्रवर्तकेऽस्मिन्विन्दन्तीति

धनुर्वेदः ।

वेदधर्मद्रोहंकरनृपतिमुखेन दण्डनीत्या

दुष्टान् दाम्यति इति - दण्डः

निरुक्ति-

सुरेन्द्राद्या धनुश्शास्त्रं यस्माद् विन्दन्ति च भुवः ।

धनुर्वेदो ह्यष्टवर्णो धनुर्वेदप्रदायकः ।

वेदधर्मद्विष्टतातिनृपादिमुखतः खलान् ।

दण्डनीत्या दाम्यतीति दण्डः स्याद्दुत्तवर्णकः ॥

१-गीता ६।४५

दमयिता- ओं दमयित्रे नमः

दमः - ओं अदमाय नमः

स्वयंच रावणादीन् ताड्योत्येन - दमयिता ।
न तस्यान्यः कश्चिदेवमिति -अदमः यथा-

भस्मकुर्याज्जगत्सर्वं मनसैव जनार्दनः ।
न तु कृत्स्नं जगच्छक्तं किंचित् कर्तुं जनार्दने[१] ।।

अपराजितः - ओं अपराजिताय नमः

सर्वसहो - ओं सर्वसहाय नमः

एवं सर्वतोमुखे प्रशासनेक्वचित् कदाचित् कुतश्चिद् प्रतिहतः
अपराजितः - यथा-
"दाशार्हमपराजितम्"
स्वशासनेन सर्वं देवतान्तरमपि मन्दाधिकारिणाभाराध्यतया
सहते बिभर्तीति - सर्वसहः ।

नियन्ता- ओं नियन्त्रे नमः

तत्र तत्पदुचीन् प्रोच्यन् नियच्छतीति-नियन्ता ।

निरुक्ति-
दैवतेषु च सर्वेषु तत्पदिच्छा प्रोच्यन् ।
मन्दाधिकारिणां यो सौ नियन्ता स्यान्नियच्छति ।।

१- भा०उ० ६७।८

नियमो - ओं नियमाय नमः

यमः - ओं यमाय नमः

तत्फलं च जात्यायुर्भोगादिकं नियम्यते स्मिन्निति-नियमः ।

'यमस्समुपनिविष्णु च' [1] तत्पम् यथा-

'लभते च ततः कामान् मयैव विहितान् हि तान्' [2] ।

तत्तत्फलनियमाकान् यमादीनपि यच्छतीति- यमः

'प्रभवति संयमने ममापि विष्णुः' [3]

सत्त्ववान् - ओं सत्त्वते नमः

परमप्रकाशलाघवसुखसंपदा मोदामूलं सत्त्वं

सातिशयमस्येति- सत्त्ववान् यथा-

'महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः' [4] इति

द्रुहिणादिमुखे हि रजस्तमसो भ्रीमति वाराहे देवः

तच्च पैतामहं वृत्तं सर्वशास्त्रेषु पठ्यते ।

यद्रजस्तमसो पेतं सोहं नास्त्यत्र संशयः ।। [5]

१-पा०उ०३।३।६३

२- गीता ७।२२

३- वि०पु० ३।७।१३

४- श्वे०उ० ३।१२

५-व०पु०

सात्त्विक: - ओं सात्त्विकाय नमः

सत्य: - ओं सत्याय नमः

धर्मज्ञानवैराग्यैश्वर्यरूपफलनियमनेन च सत्त्वमर्हतीति-

सात्त्विक: ।

"तदर्हति"[1] इति ठक्

सात्त्विकशास्त्रप्रतिपाद्यतया यथार्थीभव: सत्य: ।

सत्ये प्रतिष्ठित: कृष्णस्सत्यमस्मिन् प्रतिष्ठितम् ।

सत्तासत्ते च गोविन्दस्तस्मात्सत्यस्सतांमत: ।।[2]

सत्यधर्मपरायण: - ओं सत्यधर्मपरायणाय नमः

अभिप्राय: - ओं अभिप्रायाय नमः

निरुपाधिसात्त्विकचोदनाधिकारिफलसत्यधर्मस्य

परायणं परमप्रीणनम् इति - सत्यधर्मपरायण: ।

सत्यधर्मनिष्ठैन निरुपाधिकोद्देश्यतया अभिप्रेत: इति-अभिप्राय: ।

प्रियार्ह: - ओं प्रियार्हाय नमः

स्वमिदमर्थ्यशानिनं प्रियमेवार्हति इति- प्रियार्ह: ।

स्वत एव प्रावण्यम् आर्तार्थिजिज्ञासुषु

एकभक्तिषु हि भगवत: स्वत एव प्रावण्यम्

औदार्यबलात्कारेण ।

१- पा०अ० ५।१।६२

२- मा०अ० ६६।१२।१३

"तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते"[1]
"उदाराः सर्व एवैते"[2] इति

अर्हः - ओं अर्हाय नमः

प्रियकृत् - ओं प्रियकृते नमः

अनन्यस्पृहाणां तेषामर्च्यमेव योग्य इति - अर्हः ।

"आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम्"[3]

अन्यपरानपि भजतः तच्छन्दानुवर्तनेन प्रियान् करोति इति ।

प्रियकृत् ।

"निराशीः" कर्मसंयुक्तान् सात्त्वतांश्चाप्यकल्पयन्" इति

निरुक्तिः-

अनन्येच्छावतां पुंसां योग्यस्त्वर्ह इति स्मृतः ।
भजतोऽप्यन्यभक्तान् यः स्वप्रियान् कुरुते सदा ।
छन्दानुवर्तनेनेति प्रियकृत् स च कथ्यते ।

प्रीतिवर्धनः - ओं प्रीतिवर्धनाय नमः

विहायसगतिर् - ओं विहायसगतये नमः

अर्थोवरोंवसुणा विष्कारेण तां प्रीतिं वर्धयति इति

प्रीतिवर्धनः ।

१- गीता ७।१७

२- गीता ७।१८

३- गीता ७।१८

'जगतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तम्'[1] इति

तथा निरुद्धभक्तिपरकोटिभिः विहायसं पदमेवगम्यते स्मात् इति विहायसगतिः, स स्वाह -

'भुक्त्वा च भोगान् विपुलान्त्वमन्ते मत्प्रसादतः ।
ममानुस्मरणं प्राप्य मम लोके निवत्स्यसि'[2] ।।

इति सूत्रञ्च -

'तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतश्शताधिकया' इति ।

निरुक्ति-

गुणाविष्करणान्नित्यमुवरोवरतो धिकम् ।
यस्तु प्रीतिं वर्धयति प्रीतिवर्धन ईरितः ।।
निरुद्धभक्तियुक्तैर्हि नित्यं यस्मात्तु गम्यते ।
विहायसं परं व्योम विहायस गतिस्तु सः ।।

ज्योतिः- ॐ ज्योतिषे नमः

तदारोहणनिश्रेण्या अर्चिरादिगतेः प्रथमं पदमर्चिराह- ज्योतिः ।

निरुक्ति-

स्वप्राप्तेः साधनत्वाद्यः स्वयं नित्यं विशेषतः ।
अर्चिरादिगते ज्योतिः प्रथमं पर्व कथ्यते ।।

१- गी०१०।१

२- भ०गी०।

<u>सुरुचि:</u> - ओं सुरुच्यै नम:

"चोत्स्यते स्यादिति श्रुतेरिसन् जादेशश्च यथा-
"तेचिषम मिसंभवन्ति"

इति उपासनप्रसङ्गेन भगवता उपासकालिनहने नियुक्तत्वेनातिवाहिका ह्यर्चिरादय: ।

"अर्चिरादिना तत्प्रथिते:"[२]

"आतिवाहिकास्ताल्लिङ्गात्"[३]

इत्यादौ चिन्तिता: ।

सुधादियाद्रोचते इति रुचिरह: सा स्या शोभनेति सुरुचि: ।

"इगुपधात् कित्" इति इन् कित्

"अर्चिषो ह"[४] इति

अह: शुभं यस्य स वै सुरुचि: परिकीर्तित: ।

<u>हुतभुग्विभु:</u> - ओं हुतभुग्विभवे नम:

अमृतपरिणामं हुतं भुञ्जान: सोम: यस्मिन् शुक्लपक्षात्मा विभु: पूर्णो भवति स: हुतभुग्विभु: ।

"अहन्नापूर्यमाण: पक्ष:" इति ।

<u>निरुक्ति-</u>

सुधापरीणामहुतं भुञ्जानश्चन्द्रमास्तथा ।

विभु: पूर्णो भवेद्यस्मिन् स वै स्यात् हुतभुग्विभु: ।।

१- छा० ५।१०।१

२- शा० ४।३।१

३- शा० ४।३।४

४- छा० ५।१०।१

रवि: -ओं रवये नमः

विरोचन:- ओं विरोचनाय नम:

उत्थानकालत्वया उदगयनद्वारा रुयते प्रशस्यते इति रवि: ।

"आपूर्यमाणपक्षात् यान् षड्डुदन्वेति मासान्"[1] इति ।

आभ्यामयनगतिभ्यां संवत्सर: रथेनादित्यं विरोचयतीति विरोचन: ।

"मासेभ्यस्संवत्सरम्"[2]

"संवत्सरो सा वादित्य:"[3]

सविता- ओं सवित्रे नम:

सूर्यद्वारा वृष्टिसस्यादिकं सूते इति -सविता ।

"संवत्सरादादित्यम्"[4]

"वायुमब्दाद विशेण विशेणाभ्याम्"[5]

न्याय्यं व्यवधानम्

निरुक्ति-

वृष्टिसस्यादिकं सूते सविते ति स्मृतात् ।

१- छा० प्र।१०।१

२- छा० प्र।१०।२

३-तै० ६ न्यासविधा

४- छा० प्र।१०।२

५- छा० ४।३।२

रवि: -ओं रवये नमः

विरोचन:- ओं विरोचनाय नमः

उत्थानकालतया उदगयनद्वारा रूयते प्रशस्यते इति रविः।

"वायुर्भूमिण पदात् यान् षडुदन्वेति मासान्"[1] इति।

षाण्मासयनगतिभ्यां संवत्सरः रथेनादित्यं विरोचयतीति विरोचनः।

"मासेभ्यस्संवत्सरम्"[2]

"संवत्सरो वा आदित्यः"[3]

सविता- ओं सवित्रे नमः

सूर्यद्वारा वृष्टिसस्यादिकं सूते इति -सविता।

"संवत्सरादादित्यम्"[4]

"वायुमब्दाद विशेष विशेषाभ्याम्"[5]

न्याय्यं व्यवधानम्

निरुक्ति-

वृष्टिसस्यादिकं सूते सवितेति स्वेमुखात्।

१- छा० ५।१०।१

२- छा० ५।१०।२

३-तै० ६ न्यासविद्या

४- छा० ५।१०।२

५- छा० ४।३।२

रविलोचनः – ओं रविलोचनाय नमः

अथ चन्द्रमाः अमानवापरनामा विद्युद्वरुणश्च रविणा सूर्येण तदुपलभ्य तद्रश्मिसंक्रान्त्यादिमुखेन चन्द्रविद्युद्वरुणान् लोचयति दर्शयतीति – रविलोचनः। यथा–

"आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतम्"[1]

निरुक्ति–

सूर्यस्य रश्मिसंबन्धाद् विद्युद्वरुणचन्द्रकान्।
निरन्तरं लोचयति रविलोचन ईरितः॥

अनन्तहुतभुग्भोक्ता– ओं अनन्तहुतभुग्भोक्त्रे नमः

सप्ततन्तुषु हुतं भुङ्क्त इति इन्द्रो हुतभुक् – प्रजाः भुनक्ति पालयतीति प्रजापतिः भोक्ता तौ महान्तावस्येति –अनन्तहुतभुग्भोक्ता।[2]

"स इन्द्रलोकं स प्रजापतिलोकम्"

निरुक्ति–

महत्त्वान् हुतभुग्भोक्ता भुनक्तीति प्रजाविधिः।
तौ नन्तहुतभुग्भोक्ता महान्तौ यस्य तौ सदा॥

१– छा०उ० ४।१०।२

२– कौ०ब्रा० १–३

नैकदो - ओं नैकदाय नम:

ग्रज: - ओं अग्रजाय नम:

एकं ददातीति एकदा: तद्भिन्ना नैकदा: असंख्येयमालाञ्जनवास: प्रभृति ब्रह्मालंकारदायिन्यो मुक्ताभ्युत्थानविदो दिव्याप्सरसो स्येति - नैकद: ।

तं पंचशतान्यप्सरस उपधावन्ति शतं -
मालाहस्ताश्शतमञ्जनहस्ता:[1]इत्यादि
तं ब्रह्मालंकारेणालंकुर्वन्ति"

एवं प्राप्तवतां मुक्तानामग्रे सह सर्वैश्वर्यभिया यथापर्यड्.कविध परमभोग्या जायत इति अग्रज: ।

"जनी प्रादुर्भावे"
"सप्तम्यां जनेर्ड:[2] इति ड: टिलोप: अड्.गेर्गत्यर्थात् ।

"ऋज्रेन्द्राग्र०" इत्यादिना रकि इदित्त्वान्नुमो निपातनाल्लोपे "नेट"[3] इतीट्प्रतिषेधे च अग्रशब्द उक्त: ।

सदामर्षी - ओं सदामर्षिणे नम:

लोकाधिष्ठान - ओं लोकाधिष्ठानाय नम:

तत: प्रभृति सर्वकालं तेन कृतप्रतिकृतमर्षितुं निवोढुं शीलमस्येति सदामर्षी यथा-

---

१- कौषी० १।४

२- पा०अ० ३।२।९७

३- पा०अ० ७।२।८

"भूमा तिशिदायाम्"
"अनुकौमूर्मेषु लोकेषु"[1]
इति श्रुतानां भुक्तभोग्यानां नित्याश्रय: -लीलाधिष्ठानम् ।

तत्र च अद्भुत: ।

निरुक्ति-

लोकानां भुक्तभोग्यानां लीलाधिष्ठान् माश्रय: ।
तत्सदा सर्वथा सर्वैर्भुज्यमानोऽप्यपूर्ववत् ।
स्मयनीयो द्भुत: ।

सनात् - ओं सनाते नम:

प्रोक्तस्तेषां संभजनात् सनात् ।

सनातनतम: - ओं सनातनतमाय नम:

कपिल:- ओं कपिलाय नम:

सदातनांपि तदातनवन्नित्यभोग्यतया अतिशयितस्सनातन:
पुराण: इति सनातनतम: ।
नित्यनूतनभोग्यत्वात् सनातनतम: स्मृत:
स किंरुप: तत्रोच्यते मध्यस्थनीलतोयदविद्युद्वैशोज्ज्वलवर्णतया कपिल:
पिङ्गल इति-कपिल: ।

छा० १-२

"किमु कान्तौ" फलॄ,वर्णौ,इलद् प्रकरणे

"कमे: पश्च" "कवे: इति वा पाठ: उणादि

इति लव् मस्य पाठान्तरे वस्य च वा पकार:

<u>कपिरव्यय:</u> - ओं कपये अव्ययाय नम:

स्वयमप्यव्यय: अप्ययौ वानुपक्षीण: कम् ह्लायं सुखार्थ: तदनुभवमुखनिर्वृत्तिं पिबति पाति रक्षतीति इति वा- कपिरव्यय: ।

"पा,पाने" "पा रक्षणे"

"इन् सर्वधातुभ्य:" इति इन्

"अच् इ:" पूर्वत्र बाहुलकात् "इगुपधात् कित्" इति कित्त्वमन्यतोऽपि भवति अपरत्र अकृतस्त्वमपि इ प्रत्ययस्य कित्त्वं बाहुलका लभ्यते तस्य हि महान् प्रभाव: इयांस्तु विशेष: इन: कित्त्वं श्रुतं क्वचिदन्यतोऽपि इस्तु अश्रुतमेव कुत्रचित् कल्प्यते इति ऐदमर्थ्येन हि अच इरित्येव वक्तव्ये इनोऽपि ग्रहणम् कित्त्वादातो लोप:"

"कै शब्दे" "कृ०शब्दे"

"कनी,दीप्तिकान्तिगतिषु" कायतेरात्त्वम्, त्रिष्वपि

"अन्येष्वपि०"[1] इति ड: टिलोप:

"इण् गतौ" धातु:

"एरच्"[2] इति भावे अच् गुण: अय् विपूर्व: पाठान्तरे तु

अयमेवापिपूर्व: तत्र

१- पा०अ० ३।२।१०१

२- पा०अ० ३।३।५६

"वष्टिभागुरिरल्लो॰" इति भागुरीष्टया पर तलोप: शेषं प्राग्वत् उभयत्रापि यण् यकार: ।

नञ्पूर्वो बहुव्रीहि: नञो न लोप: संहितायां पूर्वस्य रोरावसानिको विसर्ग: ।

निरुक्ति-

वनस्यसुखं पाति स वका: कपिरव्यय: ।

द श म्

श

त

क

म

दशमो ध्याय:

दशमो ध्याय:

स्वस्तिदः - ओं स्वस्तिदाय नमः

स्वं महत् मङ्गलं ददातीति स्वस्तिदः ।

निरुक्ति-

भक्तेभ्यो मङ्गलस्वस्ति तद्दानात् स्वस्तिदः स्मृतः ।।

स्वस्तिकृत् - ओं स्वस्तिकृते नमः

स्वस्तिः - ओं स्वस्तिने नमः

स्वस्तिभुक् - ओं स्वस्तिभुजे नमः

स्वगुणैः, स्वभोगाशिणं करोतीति स्वस्तिकृत् ।
स्वयमेव महत् मङ्गलं स्वस्ति ।
'स्वस्ति शिवाशिणोः' उणा० ।
'भावशेशित्'[1]
इति ति प्रत्ययः । शित्वात् भुभावाभाव ।
सर्वमेतत् स्वस्ति भुनक्ति पालयतीति स्वस्तिभुक् ।

निरुक्ति-

स्वस्ति स्वभोगाशिणं यः करोति स्वस्तिकृत् च ।
महामङ्गलरूपत्वात् स्वयं स्वस्तीति कथ्यते ।
पालनान्मङ्गलस्यैव स्वस्तिभुक् चेति गम्यते ।

१-उणा०पा० ४

स्वस्तिदक्षिणः - ओं स्वस्तिदक्षिणाय नमः

वरीद्रः - ओं वरीद्राय नमः

अन्यदपि स्वपरिचरणानुगुणं दिव्यशरीरशक्त्यादि स्वस्ति स्वात्मदानदोषिते कस्मिंश्चित् देया दक्षिणा स्येति स्वस्तिदक्षिणः ।
परमैश्वर्येऽपि गुणशीलमिम्ना वरीद्रः ।

निरुक्ति-

शक्त्याद्या प्रकृतिः स्वस्ति स्वात्मदानं च दक्षिणा ।
आत्मार्पणाख्ययागे तु यस्यास्ति स्वस्तिदक्षिणः ।
सर्वैश्वर्येऽपि सुगुणः शीलतो रौद्र उच्यते ।

कुण्डली - ओं कुण्डलिने नमः

यथोचितनित्यदिव्यभूषणः कुण्डली ।

निरुक्ति-

दिव्यभूषणवान् यो सौ कुण्डलीति प्रकथ्यते ।

चक्री - ओं चक्रिणे नमः

तादृशदिव्यायुधः, चक्रं तदुपलक्ष्यं तादृशदिव्यायुधजातं नित्यमस्येति चक्री ।

"चक तृप्तौ प्रतिघाते च" इति धातोः, रक्प्रकरणे-
"चकिरम्योरुच्चोपधायाः" इति रक्प्रत्यये बाहुलकादिहनोत्त्वम् ।

निरुक्ति-

"नित्यदिव्यायुधश्चक्री"

विक्रमी - ओं विक्रमिणे नमः

अजितशासनः - ओं अजितशासनाय नमः

गाम्भीर्यानुकूलविलासः विक्रमी ।

विरिञ्चिपुरन्दराद्यलङ्घ्यशासनः अजितशासनः

क्रमु-पादविक्षेपे विपूर्वः, भावे घञ्[2] "नोदात्तः"[1]

इत्यादिना वृद्धिः ततः संज्ञायां मन्माभ्याम्" इति ठनां बाधनार्थं नियमितो मत्वर्थीयः उक्तार्थे इनिः ।लौपदीर्घादि ।

निरुक्ति-

"स्याद्विलासी तु विक्रमी ।

कृतालङ्घ्यशासनो यः स स्यादजितशासनः ।

शब्दातिगः - ओं शब्दातिगाय नमः

अनन्तजिह्वेनानन्तेन अनन्तशाखैराम्नायैस्साक्षात् सरस्वत्या च दुरुदाहमहिमा शब्दातिगः ।

निरुक्तिः-

अनन्तशाखैराम्नायैर्वाग्देव्यानन्तभोगिना ।

वक्तुं ह्यशक्यमहिमा यस्य शब्दातिगो स्ति सः ।

१- पा०अ० ७।३।३४

२-पा०अ० ३।३।१२६

शब्दसह: - ओं शब्दसहाय नम:

शिशिर: - ओं शिशिराय नम:

अथगजेन्द्रनोदाणाम् अस्पष्टशब्दानां तिरश्चामपि आर्तशब्दम् अतिभारमिव सहते इति शब्दसह: ।

'भक्तिं तस्यानुचिन्त्येति
आर्तशब्दश्रवणानन्तरम् अतित्वरया गत: शिशिर: ।
शश् प्लुतगतौ' इति धातो: -
'अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिरा:' इति किरच् प्रत्यय: ।

निरुक्ति:-

अतिभारमिवास्पष्टं गिरिशं शब्दमार्जितम् ।
सहते य: शब्दसहो वस्वणों मनुरुकम: ।
गजेन्द्र पालनार्थ य: शिशिरस्त्वरया गत: ।

शर्वरीकर: - ओं शर्वरीकराय नम:

तथा शर्वरी हिंस्रापरविदारिणो पन्चायुधो करे अस्यीति शर्वरीकर: । कृञ् पचाघच् ।
'शृणाते: कृशृवृन्चतिम्य: ष्वरच्' इत्यौणादिक ष्वरच् प्रत्यय:। णित्वात् ङोष् ।

निरुक्ति-

उच्यते शर्वरीशब्दा हिंस्रापरविदारिणो ।
पन्चायुधो करे चास्येत्युदित: शर्वरीकर: ।।

अक्रूर: - ओं अक्रूराय नम:

गजपरिजिहीर्षया करस्थैरप्यायुधैर्ग्राहमपि झटित्यकृन्तान्

इति अक्रूर: ।

"कृतेश्छ: क्रू च" उणादौ इति रक् प्रत्यय: क्रू आदेशश्च -यथा-

ग्राहग्रस्तं गजेन्द्रं च तं ग्राहं च जलाशयात् ।

उज्जहाराप्रमेयात्मा तरसा मधुसूदन:" इति ।

पेशलो - ओं पेशलाय नम:

संभ्रमादयथातथाभूषणाम्बरमण्डनीय:, पेशल: ।

"पिश- अवयवे" "वृषादिभ्यश्चित्" इति कल:, चित् उणादौ

कित्त्वे पि बाहुलकाद् गुण: ।

निरुक्ति-

यो सौ धृतायुधोग्राहमक्रूरो मङ्०क्ष कृन्तन्

त्वरातिशयत: स्रस्तभूषणाम्बर सुन्दर:।

गजेन्द्ररक्षासमये यो सौ स्यात् पेशल: स्मृत:।।

दक्ष: - ओं दक्षाय नम:

दक्षिण:- ओं दक्षिणाय नम:

दिक्प्रागन्ता (दक्ष:) दक्ष् वृद्धौ शीघ्रार्थे च" इत्यर्थं शीघ्रार्थ: ।

पचाद्यच् । तथा गत्य चिङ्० मां दूरगतो हं त्वमिति सान्त्वनैर्गजेन्द्रस्यानुकूल:

दक्षिण: । दक्ष वृद्धौ "द्रुदक्षिभ्याम् ० उणादौ इनन् यथा-

'प्रीतिमान् पुण्डरीकाक्षः शरणागतवत्सलः ।

भवन्तं गजराजानं मधुरं मधुसूदनः' ।। इत्यादि

निरुक्ति-

दयार्द्रो यो द्रुतमागन्ता रक्षणाय स उच्यते ।

गजेन्द्रस्य प्रपन्नस्य यः प्रीतो दक्षिणस्तु सः ।।

दाक्षिणां वरः - ओं दाक्षिणां वराय नमः

तद्दर्शनेन पूतात्मा दाक्षिणां वरः ।

'अभवत्तत्र वै देवः । इति ।

निरुक्ति-

गजेन्द्रदर्शनमात्रो पूतात्मा दाक्षिणां वरः ।

विद्वान् - ओं विद्वाय नमः

तच्चिकित्सायाम् विद्वान्: अथवा स्वहस्तसंस्पर्शादिना तच्चिकित्सा अयमतिशयेन विद्वान् ज्ञाता इति विद्वान् ।

'विद् ज्ञाने' ततो वर्तमाने लट् 'लटः शतृशानचावप्रथमासमानाधिकरणे'[1] इति लटः शता शित्त्वात् सार्वधातुकत्वे कर्तरिशप् तस्य अदादिको लुक् वसुश्च ।

१- पा०सू० ३।२।१२४

निरुक्ति:

गजेन्द्रार्तिचिकित्सायां विद्वान् विद्वमस्तु सः ।

वीतभयः - ओं वीतभयाय नमः

तत्समागमतुमुलोपलम्भात् वीतं भयं गजेन्द्रस्य इति वीतभयः ।

निरुक्ति-

वीतं भयं गजेन्द्रस्य यस्मात् वीतभयश्च सः ।

पुण्यश्रवणकीर्तनः - ओं पुण्यश्रवणकीर्तनाय नमः

श्रुतेन हि कुरुश्रेष्ठ स्मृतेन कथितेन वा ।

गजेन्द्रमोक्षणेनैव सद्यः पापात् प्रमुच्यते" इति ।

पुण्यश्रवणकीर्तनः "कृत संशब्दने" इति धातोः सिद्ध्यति ।

निरुक्ति-

गजेन्द्रमोक्षणं श्रुत्वा सद्यःपापात् प्रमुच्यते ।

यस्मात् तत्कीर्तनं पुण्यं श्रवणं चेति स स्मृतः ।।

द्वादशार्णो मनुश्रेष्ठः पुण्यश्रवणकीर्तनः ।।

उदारधीः - ओं उदारधिये नमः

दुष्कृतिहा - ओं दुष्कृतिघ्ने नमः

तीर्थस्य उदारितवान् इति उदारणः ।

"दृ प्लवनतरणयोः" इति धातोः ल्युट् ।

स्थलस्थं दारयामास ग्राहं चक्रेण माधवः[१] इति

दुष्कृतिनं पूर्वविदणवारात् अपुण्यकर्माणं ग्राहं हन्ति स्मेति दुष्कृतिहा ।

निरुक्ति-

सरःस्थं तारितवानित्युवारण ईरितः ।
ग्राहं विदारयामास यस्माद् दुष्कृतिहा च सः ।।

पुण्यो - ओं पुण्याय नमः

दुःस्वप्ननाशनः - ओं दुःस्वप्नाशनाय नमः

अनया कीर्त्या असदादीनपि पुनाति स्वयमेतानेवं कारयित्वा शुभकर्मा भवति तान् पुण्ययति स्वप्राविलत्व- लक्षणपुण्यवतः करोति इति वा पुण्यः ।
पूञः पुणातेर्वा ग्रैथिष्वपि हिकरणेषु न्यरूप्यतायं प्रागेव ।
क एवं वचनात् दुःस्वप्नोपशमनतया स्वात्मानं गजेन्द्रं तच्च

वरः स्मरतांभाव्यनिष्टसूचनं दुःस्वप्नं नाशयति अपनोदयतीति - दुःस्वप्ननाशनः ।

निरुक्ति-

कीर्त्यासदादीनपि यो गजेन्द्रत्राणरूपया ।
पुण्यः स स्यात् पुनातीति षडणः पावनत्वतः ।।
गजेन्द्रमोक्षणाध्यायजपाद्दुःस्वप्नजं फलम् ।
नाशयत्यन्यथा सो ऽयमिति दुःस्वप्ननाशनः ।।

१-विष्णु० ६६

वीरहा - ओं वीरघ्ने नमः

रक्षणः- ओं रक्षणाय नमः

वीरहा - पूर्ववत्

तं स्पर्शपरिरम्भणसान्त्वनादिभिः रक्षितवान् रक्षणः ।

"रक्ष, पालने"

"कृत्यल्युटः"[1] इति बाहुलकात् कर्तरि ल्युट्

"बहुलमन्यत्रापि" इति युच वा" अनः

"षट्कुप्वाङ्०"[2] इति णत्वम्

निरुक्ति-

स्पर्शसंश्लेषणादिभिस्तं रक्षतीति स रक्षणः ।

जीवनः - ओं जीवनाय नमः

पद्यस्थिताः -

स्वहस्तेन हननात् ग्राहमपि गन्धर्वत्वेन जीवयन् - जीवनः ।

स हि देवलशापेन हूहूर्गन्धर्वसत्तमः ।

ग्राहत्वमगमत् कृष्णात् वधं प्राप्य दिवं गतः[3] ।।

निरुक्ति-

स्वहस्तेन हतं ग्राहं गन्धर्वत्वेन जीवयन् ।

पूर्वशापं निरस्याथ यस्तिष्ठति स जीवनः ।

१- पा०अ० ३।३।११३

२- पा०अ० ८।४।२

समवैतकारी आश्रितार्थ: संभ्रमो हि साम्प्रतम् इति -
अन्येषां चतुर्मुखमुखानाम् अप्रवृष्यगम्भीर्यः गम्भीरात्मा ।
तेषां विनयगद्गदस्तुतिगिरामस्य दूरे विविधा: दिशा
देशा इति - विदिश: ।

निरुक्ति-

समवैतकारी य: स्यात् चतुरम: स कीर्तित: ।
विनयाद्गद्गदस्तोत्रधात्रादीनां विशेषत: ।
दूरेस्य विविधा देशा विदिश: स तु कीर्तित: ।

व्यादिशो - ओं व्यादिशाय नम:

दिश: - ओं दिशाय नम:

तेषाम् अभिमतं तत्तत् पदम् अतिसृजतीति- व्यादिश: ।
इगुपधत्वात् क:
न तान् गजेन्द्रवदन्तारङ्गीकारोति किं तु आज्ञापयतीति-दिश:
पूर्ववत क: ।

निरुक्ति-

ब्रह्मादीनां तत्तत्स्थानसर्जनाद् व्यादिश एव स:
धात्रादीन्स्वकृत्येषु ह्याज्ञापयति यस्तदा ।
दिश: स तु समाख्यात: षडर्णो मनुरुत्तम: ।।

<u>सुमुखो</u> - इति पूर्ववत्

<u>लक्ष्मी</u>:- ओं लक्ष्म्यै नम:

<u>सुवीरो</u> - ओं सुवीराय नम:

इति तेषाम् लक्ष्मी: सर्वसंपच्च
'भवदुपत्तं मे राज्यं च जीवितं च सुखानि च'[1] इति

कृष्णाश्रया: कृष्णबला: कृष्णनाथाश्च पाण्डवा:।
कृष्ण: परायणं तेषां ज्योतिषामिव चन्द्रमा: ।।[2]

<u>रुचिराङ्गद:</u> - ओं रुचिराङ्गदाय नम:

<u>जननो</u> - ओं जननाय नम:

तेभ्यस्त्वं रुचिरम् अतिमनोहरमनुभवयोग्यं अङ्गं ददातीति
रुचिराङ्गद: यथा-
'न ते रूपम्' इति -
अथ सर्वभगवद्व्यापाराणां प्रयोजनमभिधीयते तदनु-
भवात्मकरणयुक्तान्त्यानपि जनयतीति जनन:
'जनी प्रादुर्भावे' णिच्
'जनिवध्योश्च'[3] इति प्रतिषेधात् नोपधावृद्धि: ल्युरित्यादि
जन: णिलोप: ।

१- रा०पु० १६-६
२- भा०द्रो० १८३-२४
३- पा०धा० ७।३।३५

<u>जनजन्मादिर</u> - ओं जनजन्मादये नमः

<u>भीमो</u> - ओंभीमाय नमः

तेषां जनानां जन्मनः आदिर्निमित्तंप्रयोजनमिति- जनजन्मादिः

यथा -

"अद्य मे सफलं जन्म"[१]

"जन्मन्यविफला सैका या गोविन्दाश्रया क्रिया।

सुजन्मदेहमत्यन्तं तदेवाशेषजन्तुषु

यदेव पुलकोद्भासि विष्णुनामनि कीर्तिते।

"अद्य जन्म यथार्थं मे

"भीमो - इति पूर्ववत्।

<u>निरुक्ति-</u>

अथोच्यते च भगवद्व्यापाराणां प्रयोजनम्।

जननी जनजन्मादि र्भीमो जन्मनाशकः।।

<u>भीमपराक्रमः</u> - ओं भीमपराक्रमाय नमः

<u>आधारनिलयो</u> - ओं आधारनिलयाय नमः

अन्येष्वपि जगदहितनिरतेषु हिरण्यादिषु भीमपराक्रमः

भवमप्यनुग्रह एव यथोन्मादिनो निगलादिनिग्रहस्तस्य तद्व्यानां

चानुग्रहः इति -

१ वि०पु० ५।१।७२

धार्मिकतया जगदाधाराः प्रह्लादविभिषणपाण्डवादयः तेषाः निलयः आधारनिलयः ।

ते ह्याधाराः यथा श्रीविष्णुस्मृतौ -

वर्णाश्रमाचारपराः सन्तः शास्त्रैकतत्पराः ।

त्वां धरं धारयिष्यन्ति तेषु त्वद्भारमाहितम् [१] इति

धाता - ओं धात्रे नमः

पूर्ववत् सदृश्यः

पुष्पहासः - ओं पुष्पहासाय नमः

प्रजागरः -ओं प्रजागराय नमः

एवं निष्पादितस्वानुभवशक्तीनां सायंपुष्पस्येव हासः

मोच्यतोल्लासो स्येति - पुष्पहासः

"हसे, हसने" इति भावे घञ् वृद्धिः

"पुष्प, विकसने" दिवादि पचाद्यच् बहुव्रीहि व्यधिकरणानामप्यस्ति हि सः ।

"सप्तमीविशेषणे बहुव्रीहौ" [२] इत्यत्र सप्तमीग्रहणात् ज्ञापकात् इत्युक्तम् ।

सर्वेष्विव कृणविरः तेषु रात्रिंदिवं प्रजागर्तीति - प्रजागरः ।

य एषु सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः"

जागृ निद्राक्षये" प्रपूर्वः पचाद्यच् गुणो रपरः ।

१- वि०स्मृ०

२- पा०अ० २।२।३५

ऊर्ध्वगः - ओं ऊर्ध्वगाय नमः

सत्पथाचारः - ओं सत्पथाचाराय नमः

कुतस्तदर्थनिद्रो यतः ऊर्ध्वगः

स्वभावतुङ्गः यथा-

'महात्मनां संश्रयमभ्युपेतो नैवावसीदत्यतिदुर्गतोऽपि' इति

तन्महत्त्वकलम् सत्पथे स्वाभाविकदास्यमार्गे आचरणं

तेषां प्रवर्तनमस्येति - सत्पथाचारः यथा-

'अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्' इति ।

निरुक्ति-

यो वै स्वभावतस्तुङ्ग ऊर्ध्वगः परिकीर्तितः ।

सत्पथाचार इत्युक्तः सन्मार्गे तत्प्रवर्तनात् ।

प्राणदः -

इति पूर्ववत् रूपम्

प्रणवः - ओं प्रणवाय नमः

पणः - ओं पणाय नमः

प्रमाणं - ओं प्रमाणाय नमः

स्वचरणारविन्दयोः तान् प्रणमयतीति प्रणवः ।

'प्राणान् सर्वान् परमात्मनि प्रणामयति एतस्मात् प्रणव इति'

अथर्वशिरसि ।

एवं तेषां स्वाम्यदास्यव्यतिहारेण व्यवहरति इति पणः ।

"पण: व्यवहारे" धातुः

प्राणमिति -पूर्ववत्

प्राणनिलयः - ओं प्राणनिलयाय नमः

प्राणधृत - ओंप्राणधृते नमः

प्राणन्तीति प्राणाः अन्ये हि जीवाः ते स्वनीड इव शकुन्ताः तस्मिन् लीयन्ते इति - प्राणनिलयः ।

"पुंसि संज्ञायाम्"[1] इत्यादिना घः

तान् मातृवद्धारयति चेति - प्राणधृत् । धृञः क्विपि तुकः अगुणः जश्त्वचर्त्वेधृग् इति पाठेपि उक्तैव गतिः ।

निरुक्ति-

तान् मातृवद्धारयति प्राणधृत् संस्मृतो बुधैः ।

प्राणजीवनः - ओं प्राणजीवनाय नमः

तत्त्वं - ओं तत्त्वाय नमः

तान् प्राणान् अन्नपानादिज्जीवयतिप्राणान् धारयति इति प्राणजीवनः ।

"जीवप्राणधारणे" णिच् ल्युरित्यादि अनः णिलोपः ।

दधिदुग्धयोरिव दधिसारः चिदचितोर्व्याप्ति प्रयोजनाभ्यां साराशः - तत्त्वम् ।यथा-

---

१- पा०अ० ३।३।११८

यस्माद्विश्वेशगस्य जगत: प्रभवाप्ययम् ।
शरण्यं शरणंगच्छन् गोविन्दं नावसीदति ।।

निरुक्ति-

जीवयत्यन्नवज्जीवान् स उक्त: प्राणजीवन: ।
सारांशभूतो जगतो यो सो तत्त्व मिति स्मृत: ।।

एकात्मा - ओं एकात्मने नम:

जन्ममृत्युजरातिग: - ओं जन्ममृत्युजरातिगाय नम:

सर्वस्य चिदचिद्वर्गस्य अयमेक एव शेषी भोक्ता अभिमानी चेति-
एकात्मा ।

तथापि तद्गुणयविकर्मात्मा जन्ममृत्युजरातिग: ।

भूर्भुव: स्वस्तरु: - ओं भूर्भुव: स्वस्तरवे नम:

भूर्भुव: स्वरुपलक्षितै: पक्षिपक्षिविप्राणिभिरुप -
जीव्यमानच्छायफल: पारिजात: - भूर्भुव:स्वस्तरु: ।
समाश्रिताद् ब्रह्मतरोरनन्ता न्निसंशय:
पत्रफलप्रपात: ' इति ।

निरुक्ति-

भूरादिभिर्लक्षितानां जीवानां य: समाश्रय: ।
भूर्भुव: स्वस्तरु: स स्याद्दशार्णस्त्ववदो मनु: ।

तार:

सविता

प्रपितामह:

यज्ञो

यज्ञपतिर्

पूर्ववत्

तेषां संसारतारणात् - तार:

सर्वेषां साक्षाज्जनयिता- सविता

पितामहस्यापि जनकत्वात् - प्रपितामह:

स्वाराधनधर्मसमृद्धिरिक्तानां तदर्थिनां स्वयमेव -यज्ञ:

स्वयज्ञफलप्रद: यज्ञपतिरिति -

यज्वा - ओं यज्वने नम:

यज्ञाङ्गो - ओं यज्ञाङ्गाय नम:

अशक्तानां स्वयमेव यजमान: -यज्वा

"सुयजोर्ङ्वनिप"[१]

आश्वमेधिके वैष्णवे धर्मे भगवान् -

तेषां तु पावनायाहं नित्यमेव युधिष्ठिर ।

उभे संध्ये नुतिष्ठामि ह्यस्कन्नं तद्व्रतंमम् ।।

समर्थानुष्ठितमपि यज्ञान्तरमस्य शेषभूतमिति-यज्ञाङ्ग: ।

१- पा०सू० ३।२।१०३

यज्ञवाहन: - ओं यज्ञवाहनाय नम:

तेषां शक्तिश्रद्धाधिकारदानेन यज्ञं वाहयतीति-यज्ञवाहन:

निरुक्ति-

तेषां श्रद्धाधिकारादिदानात् स्याद् यज्ञवाहन:

यज्ञभृत् - ओं यज्ञभृते नम:

यज्ञकृत् - ओं यज्ञकृते नम:

यज्ञी - ओं यज्ञिने नम:

विकलमपि यज्ञं स्वस्मरणपूर्णाहुतिभ्यां पुष्णातीति-यज्ञभृत् यथा-

प्रमादात् कुर्वतां कर्म प्रच्यवत्यध्वरेषु यत् ।
स्मरणादेव तद्विष्णो: संपूर्णं स्यादिति श्रुति:' इति
जगद्धिताय यज्ञमादौ कृतीति-यज्ञकृत्
सर्वयज्ञानां शेषी - यज्ञी ।

यज्ञभुग् - ओं यज्ञभुजे नम:

यज्ञसाधन: - ओं यज्ञसाधनाय नम:

तान् भुङ्क्ते भुनक्तिवेति यज्ञभुक् । ते स्य ज्ञानद्वारा सिद्ध्युपाया इति यज्ञसाधन: ।

यज्ञान्तकृत - ओं यज्ञान्तकृते नम:

'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते'[१] इति

१- गीता ४।३३

यज्ञपर्यवसानं स्वतत्त्वज्ञानं करोतीति -यज्ञान्तकृत

<u>यज्ञगुह्यम्</u> - ओं यज्ञगुह्याय नमः

<u>अन्नम्</u> - ओं अन्नाय नमः

यन्निरपेक्षोऽपि सापेक्षवद्यज्ञेषु पुरोडाशादिकं भुक्त्वा तृप्यंस्तर्पयति, तज्ज्ञानिधिगतिसाधनविद एव विदन्ति न स्थूलदृश इति- यज्ञगुह्यम् ।

एवं निष्पादितमोक्षतृशक्तिभिर्भुज्यत इति अन्नम् ।

<u>अन्नाद,</u> एव च - ओं अन्नादाय नमः

तांश्च तथा भुंक्ते इति अन्नादः ।
कोऽन्य ईदृश इत्येवकारः चशब्दस्सर्वमुक्तमेकत्रास्मिन् समुच्चिनोति ।

<u>निरुक्ति-</u>

य आदये तथा भुंक्ते स्वयं सो (न्नाद) ईरितः ।

<u>ओं आत्मयोनये नमः</u>

दुग्धेनेव सितावल्यं शर्कराविशेषम् आत्मना स्वात्मना यौति भोक्तारं मिश्रयतीति वा, आत्मनं भोक्तारं स्वात्मना यौतीति वा- आत्मयोनिः ।

"यु मिश्रणे" करणे नि प्रकरणे, धातौ अदादौ
"वहिश्रियुद्रुग्लाहात्वरिभ्यो नित्" उणादौ
इति कर्तरि निः नित् गुणः

"नेट्"[१] इति नट् आत्वा इयुक्तः ? यथायथं तृतीयेति द्वितीयेति वा योगविभागात् समासः षष्ठीसमासो वा ।

स्वयं जातो - ओं स्वयंजाताय नमः

वैखान: - ओं वैखानाय नमः

प्रार्थनानिरपेक्षतयाजात: - स्वयंजात:
जनित्वा भवदु:खविखननात् - वैखान:
विपूर्वात् खनतेः
"सनो घ च"[२] इति कन् विखान:
"तत्र साधुः"[३] इत्यण्

निरुक्ति-

जातो यो सौ स्वयंजात: प्रार्थनाद्यनपेक्षया
जनित्वाभवदु:खं यो विविधं खनति स्वत: ।
वैखान: स च निर्दिष्ट: सप्ताणा शिवदु:खहा ।

सामगायन: - ओं सामगायनाय नमः

स्वप्राप्तिमधुपानेन हाव् हाव् हाव् इति सामानि गायमानो मुक्तो स्यास्तीति- सामगायनः ।
"ण्युट् च"[४] इति ण्युट्
"एतत्सामगायन्नास्ते"[५] इत्यादि

१- पा०अ० ७।२।८ २- पा०अ० ३।३।१२५
३- पा०अ० ४।४।९८ ४- पा०अ० ३।३।१४७
५- तै०भृगु०अ० १०-५

देवकीनन्दन: - ओं देवकीनन्दनाय नम:

एवं विधो न परावस्थ: किन्तु- देवकीनन्दन: ।

य एष पृथुदीर्घादिस्संबन्धो ते जनार्दन:

एष भूतं भविष्यञ्च भवञ्च भरतर्षभ इति

निरुक्ति-

देवक्यास्तनयत्वेन परावस्थ: प्रजज्ञिवान् ।

वात्सल्यादवरो यो सो देवकीनन्दन: स्मृत: ।।

द्रष्टा-

पूर्ववत्

क्षितीश: - ओं क्षितीशायनम:

सर्वेशत्वेपि आर्तिभूयिष्ठत्वात् भूयिष्ठं भूमेरीश: क्षितीश: ।

पापनाशनाय नम:

अत्र दधिनवनीतस्तैन्यरासक्रीडादिकथामृतेन परेषाम् पापनाशन: ।

निरुक्ति-

देवकीतनयत्वेपि प्रपन्नानां विशेषत:

बाह्यान्त: शत्रुसंहारो यस्स स्यात् पापनाशन: ।

<u>नन्दकी</u>- ओं नन्दकिने नमः

भगवताऽपि मामयं नन्दादिति प्रार्थ्यो नन्दकः
आशिषि च[1]

इति वुन् सोऽस्य नित्ययोगोऽस्तीति -नन्दकी ।

<u>शाङ्‌र्गधन्वा</u> - ओं शाङ्‌र्गधन्विने नमः

शाङ्‌र्गं च विस्फारितज्याघोषेणासुराणां शितशरेण विद्धेणिवार्त स्वसदृशं धनुरस्येति -शाङ्‌र्गधन्वा ।

<u>गदाधरः</u> - ओं गदाधराय नमः

गदाधिपत्नीं च क्षुभितसमुद्रान्तकल्पान्तानलस्फुलिङ्गिनीं नित्यसंनोदिनीं कौमोदकीं धारयतीति -गदाधरः ।

<u>रथाङ्गपाणिर्</u> - ओं रथाङ्गपाणये नमः

यथोचितं रथाङ्गं च पाणावस्येति रथाङ्गपाणिः ।

<u>निरुक्ति</u>-

यथोचितं रथाङ्गं च पाणौ यस्यास्ति नित्यशः ।
रथाङ्गपाणिरास्यातो नवाणां भयनाशकः ।।

१- पा०अ० ३।१।१५०

<u>सर्वप्रहरणायुध:</u> - ओं सर्वप्रहरणायुधाय नम:

स्वनिष्ठानां सर्वानिष्टोन्मूलयितृणि असंख्येयानि
अमर्यादसामर्थ्यानि आत्मोचितान्यनन्तान्याभरण
विकल्पानि सदा सर्वत्र सर्वथा सर्वप्रकारसमाश्रितसंरक्षादीक्ष-
सनदोदितानि सर्वैश्वर्यधुरंधराणि, अन्यान्यपि दिव्या-
युधान्यस्येति - सर्वप्रहरणायुध: ।

एवं अशेषदोषप्रत्यर्थ्युपाधिसंख्यातविविरोधितुङ्गमङ्गल-स्वरूपरूपगुणविभवचेष्टितमनङ्कुशैश्वर्यसौशील्यमापत् सकमधिकल्पकं प्रपन्नैक जीवातुं श्रिय: पतिं भगवन्तं पुरुषोत्तममाश्रितानामाश्चर्यसर्वस्वं संपत् समुदाय: ।

उपसंहार

भारतीय संस्कृतिः महाप्राणा विश्रुता । एतस्याः संस्कृतेः उषः कालो वैदिककालोऽस्ति । अतः प्राचीनतमा काचित् संस्कृतिरस्ति चेदस्तु परं सा जीर्णा शीर्णा च स्वस्तित्वं वेदे एव सन्निधापितवती ।

वेदविमर्शनेन एतज्ज्ञायते यत् ज्ञानकर्मणोरैक्यं पूर्वमासीत् प्राचीनैः व्यवहितिरावरण विकास क्रमेणाभवत् । द्रव्ययज्ञान्ज्ञानयज्ञस्य श्रेष्ठता पूर्वमप्यङ्गीकृताचार्यैः । ज्ञानं यदि एव कर्मणां परिसमाप्तिरिति स्वचिन्तितं वचः । चिद्रूपात्मनः प्राप्तिरेव लौकोत्तरचिन्मुक्तिः अस्याः प्राप्तिरेव कर्मणः ज्ञानस्य साध्यम् । इयं चिन्मयभूमिरेव सर्वाधिष्ठात्री ।

नीहारकुण्ठलोकेऽपि भाष्यं न तु परमा प्रमाणिको वेदः । शुक्लयजुर्वेदः कर्मकाण्डस्य मूलाधारभूतस्तस्य च परिसमाप्तिः ईशोपनिषदाख्ये ज्ञानकाण्डे भवति । इयमुपनिषद् संहिताभाग एवान्तर्भुक्ता । कर्मवेदान्तौ सार्वभौमज्ञानदीपं प्रज्वाल्य तत्त्वज्ञाने बलाधानं कृतम् ।

अध्यात्मसाधनाया यन्मूलं यद् वेदे उपलभ्यते तत्र देववादस्य परमं महत्त्वमुपलभ्यते । एतस्य विकासः महाभारते पुराणेष्वनुदृश्यते । देववादस्य मूलाधारः श्रद्धा वर्तते । श्रद्धा मानवचित्तस्य मौलिकवृत्तिरास्ति । अत्र वादेऽसौ विश्रुतो । देवः आत्मा चातीन्द्रियः इति प्राकृतमेव तत्त्वद्वयम् । अतः कश्चित् देववादी कश्चिदात्मवादी भवति । आत्मवादो दैवस्य निमित्तमादाय अध्यात्मसाधनायाः अस्पष्टभावान् अपसारयति । आत्मचेतनायाः प्रसार एवापेक्षितो ध्यात्मसाधनायाम् ।

देववादेऽपि विकास एव तत्परो भवति । यथा आत्मवादी आत्मपरायणः सन् विश्वस्योपादानं निमित्तं च आत्मचेतनामेवाङ्गीकरोति । देववादिनोऽपि भूतमात्रे देवतत्त्वमेवानुस्यूतमाप्नोति, भूतानामपि भगवतः आत्मस्वरूपत्वम् विश्वंच वासुदेवमयं साधयन्ति । तथा च उभावपि वैयष्टिकतया समष्टिकल्याण भावनायामेव तत्परायावति । भगवत्सेवायाश्च समग्रं जीवनमर्पितः । देवत्वप्राप्तौ साधनं भगवत्से

चैव तत्र च मतावैधस्य कारणम् ।इयमेव मुनिधारा । स्वाभाविकी वाङ्मयशून्या भगवदर्चनमेव सर्वथा कर्तव्यमिति ।आचार्येण रामानुजमुनिना सकलस्य ब्रह्माण्डस्य चिदचिद्विशिष्टरूपत्वेन भगवद्रूपत्वं प्रसाधयत् । निश्चयेन सर्वैकात्म्यमेव दर्शनस्य वेदस्य च उद्घोषः ।अतएवास्मिन् दर्शने सत्कार्यवादतया सर्वस्य परिणामस्य सत्यत्वमङ्गीकृतम् ।

विष्णुसहस्रनामग्रन्थस्य पाठ प्रसङ्गे आचार्यशङ्करस्य रामानुजस्य च भाष्यं समनुपलोकित च स्वसिद्धान्त परिपोषणाय रूपणेतस्य ग्रन्थस्य व्याख्यो-पव्याख्यानक्रमेणाभिगुम्फणम् ।समीचीन ममावकलितम् ।तदेव चास्माभिः सुनिश्चितम् यत् विचारारिपि प्रसङ्गे एतस्यैव ग्रन्थस्य समीक्षात्मकं तुलनात्मकश्च विश्लेषणं करिष्यत इति तथानुष्ठितम् ।आचार्यदृष्ट्या सर्वेषां नाम्नां व्याकरण दिशा विवरणं तदर्थेच तथासमन्वित इति कुत्रापि स्वसिद्धान्तव्याकोपोनोपलभ्यते । अतः व्याकरणदृष्ट्या दर्शनदृष्ट्या च विश्लेषणमेषा च अस्य शोधप्रबन्धस्य रूपम् ।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः

इति सुधियो विभावयन्तु ।

ग्रन्थ सूची

केनोपनिषद्भाष्य

गर्ग संहिता

गूढार्थ दीपिका

श्रीमद्भगवद् गीता

छान्दोग्योपनिषद्भाष्य

तैत्तरीयोपनिषद्

पाणिनि अष्टाध्यायी

नारद भक्तिसूत्रम्

प्रश्नोपनिषद् भाष्य

प्रश्नोपनिषद्

ब्रह्मसूत्र शंकरभाष्य

ब्रह्मसूत्र श्रीभाष्यम्

बृहदारण्यकोपनिषद्

भाष्य वार्तिक

भागवत्

भारतीय दर्शनशास्त्रों समन्वय

भारतीय संस्कृति और साधना

मुण्डकोपनिषद् भाष्य

यतीन्द्र मतदीपिका

मनुस्मृति

वाल्मिकी रामायण

रंग रामायण

अध्यात्म रामायण

विष्णु पुराण

वराह पुराण

वामन पुराण

बृहत् वैष्णव तेस्मिणी

ललितमाधवम्

ऋग्वेद

यजुर्वेद

अथर्ववेद

शामवेद

ईशोपनिषद्

मत्स्य पुराण

मार्कण्डेय पुराण

महाभारत